राष्ट्र-गीताञ्जलिः

कपिलदेव द्विवेदी

विश्वभारती अनुसंधान परिषद्
ज्ञानपुर (वाराणसी)

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

RASHTRA GITANJALI

by

Dr K D DVIVEDI

First Edition, 1978

मूल्य

अजिल्द १०.००

सजिल्द १५.००

उत्तरप्रदेश-संस्कृत-अकादमी प्रदत्त-
आर्थिक साहाय्येन प्रकाशित

प्रकाशक

विश्वभारती अनुसंधान परिषद
शान्ति निकेतन, ज्ञानपुर (वाराणसी)

वितरक

विश्वविद्यालय प्रकाशन, चौक, वाराणसी

मुद्रक

शीला प्रिण्टर्स, लहरतारा, वाराणसी

समर्पणम्

सच्चारित्र्य-गुणोच्चन्द्रयार्जित-यश स्तोमै सदा भास्वरै,
स्वातन्त्र्यार्थ-समर्पितात्म विभवै क्रान्त्येकनिष्ठै प्रियै ।
वीरैर्यैस्तु हुतात्मभिभरतभू कीर्तिर्भवे स्थापिता,
तेभ्य साधु समर्प्यते कृतिरिय 'देवेन' श्रद्धाजुपा ।।

कपिलदेव द्विवेदी

माता भूमि पुत्रो अह पृथिव्या ।
अथर्व० १२-१-१२

वय तुभ्य बलिहृत स्याम ।
अथर्व० १२ १-६२

वय राष्ट्रे जागृयाम पुरोहिता ।
यजु० ९ २३

अह राष्ट्री सगमनी वसूनाम् ।
ऋग० १० १२५-३

विश्वभृत स्थ राष्ट्रदा राष्ट्र मे दत्त ।
यजु० १०-४

आत्म-निवेदनम्

संस्कृतभाषायाम् अनेके प्रौढा ज्ञानविज्ञान-ग्रन्था समुपलभ्यन्ते, परन्तु राष्ट्रीय-भावना प्रधानाना काव्यादिग्रन्थानाम् अभावो नितरा मे मानसम् अदूयत। तदभाव-पूर्त्यै एव मामकोऽय तुच्छ प्रयास। भारतीय-स्वातन्त्र्योत्तर भारतीयाना परममेतत् कर्तव्य यत् कथ भारतस्य स्वातन्त्र्यरक्षा स्यात्, भारतीयेषु राष्ट्रीय-भावना व्याप्नुयाद् जागृयाच्च, भारतीय-युवजनेषु क्रान्तिभावना प्रसर्पेत्, कथ च जना देशहिताय बलिदान-तत्परा भवेयु, इत्यादि-भावना समालम्ब्य काव्यस्यैतस्य प्रणयने प्रवृत्त। यैर्हुतात्मभिर्वीरै भारत स्वाधीनतायै, भारतगौरव-वृद्ध्यै, पराधीनता पाश-निवृत्त्यै च स्वकीयानि जीवनानि तृणवत् परित्यक्तानि, तेषा गुणगाथा कस्य न चरित्रोन्नति विधातु प्रभवति, इति विचार्यात्र तेषा हुतात्मना जीवनवृत्तानि ग्रथितानि। भारतीय-गौरव मातृभूमि-गौरव च विविध-गीतिरूपेणात्र प्रस्तूयते। राष्ट्रिय कर्तव्यम्, राष्ट्रोद्बोधनम्, स्वदेशानुराग, सत्याग्रह, सर्वोदय, दलितोद्धार, श्रम-दानम्, वसुधैव कुटुम्बकम्, इत्यादयो राष्ट्रिय-भावना प्रधाना विषया अत्र सगृहीता। भारतीय-स्वातन्त्र्य-युद्धस्य क्रान्त्यात्मकस्य शान्त्यात्मकस्य च वर्णन नैव उपलभ्यते संस्कृते। तदत्र ख-ण्डे विशेषत प्रस्तूयते।

संस्कृतभाषा लोकप्रिया स्यादिति विचारम् अनुसृत्य सरल सरस-पदावलि-समवेतैव शैली अत्र समालम्बिता। गीतिषु विशेषतो मधुर-पदावली-सयोजन विहितम्। पाण्डित्य-प्रदर्शन सर्वथा परिहृत्य प्रतिपद सरलतम पदानामेव प्रयोगोऽत्र कृत। संस्कृत-भाषाया स्वारस्य यथा न लुप्येत्, तथैव नितरा प्रयतितम्। काव्य-रसास्वादेन सममेव राष्ट्रीय-भावना जन मानसेषु प्रसरेदिति तादृशी एव शैली समालम्बिता।

भाषा-विषये पर्याप्तम् औदार्यमिह उपलप्स्यते। भाषा-दुरूहता-निवारणाय प्रचलित शब्दाना तादृग्रूपेण प्रायश प्रयोगो विहित। व्यक्ति-नामसु, स्थानादि-नामसु च पद्य-नियमान् अनुरुध्य आवश्यकतानुसारं मात्रादि परिवर्तन विहितम्। 'अपि माष मष कुर्यात् छन्दोभङ्ग न कारयेत्' इत्येष नियमोऽपि यथाशक्ति परिपालित। आङ्गल-जनाना यवनादीना च नाम-प्रयोगे छन्दोनियमान् अनुसृत्य किंचित् परिवर्तन विहितम्, क्वचिच्च तेषा सक्षिप्त रूपमाश्रित्यैव कार्यं निर्वाहितम्।

ग्रन्थे निवद्धानि कानिचिद् गीतानि आकाशवाण्या दिल्ली-केन्द्रत, लक्ष्मणपुर-केन्द्रत, प्रयागादि केन्द्रतश्च प्रसारम् आप्तानि। तेषा प्रकाशन-स्वीकृति-प्रदानार्थम् 'आकाश-वाणी' नितरा साधुवादार्हा।

ग्रन्थस्यास्य प्रकाशने 'सस्कृत अकादमी, उत्तरप्रदेश' सार्धसहस्र-रूप्यक-मितम् आर्थिक सहयोगम् अदात्, तदर्थं सस्कृत-अकादमी धन्यवादार्हा।

हुतात्मना जीवनवृत्तमेव मम प्रेरणा स्रोत, इति ममेऽपि ते हुतात्मनो मम श्रद्धाञ्जलि-भाजन सन्ति। कैश्चिद् विद्वद्भि सहयोगिभिश्चात्र साहाय्यम् आचरितम्, तदर्थं ते धन्यवादार्हा। प० अमरनाथशुक्लो मम सहयोगी विविध-परामर्श दानार्थं धन्यवादार्ह। मदीया सूनवो नित्य प्रेरणादानेन सामग्री सकलनादिकार्येषु च साहाय्यदानेन आशीर्वादम् अर्हन्ति। श्रीमती भारती, भारतेन्दु, धर्मेन्दु, प्रतिभा, ज्ञानेन्दु, विश्वेन्दु, आर्येन्दुश्च प्रतिपल वर्धेरन्, क्रान्तिवह्नि च प्रसारयेग्न् इति मे कामना।

गुणग्राहिणो विद्वासोऽत्र प्राथ्यन्ते यत् ते ग्रन्थे परिवर्तनादि-परामर्शान् सप्रेष्य माम् अनुग्रहीष्यन्ति।

'माता भूमि पुत्रो अह पृथिव्या'

शान्ति निकेतन, ज्ञानपुर (वाराणसी)
विजय-दशमी, २०३५ वि०
दिनाक ११-१०-७८ ई०

कपिलदेव द्विवेदी

अनुक्रम
(खण्ड–१)

खण्ड—१

राष्ट्र-गीताञ्जलि

१ भारत-राष्ट्र-वन्दनम्

(गीतिका)

(१)

नमामि राष्ट्र-भारत
गुणाकर प्रभा-रतम् ।
विभाकर सुधाकर
समस्त-लोक-भास्करम् ॥ नमामि० ॥

(२)

गिरीन्द्र-वृन्द-वन्दित
सदा सुधाऽऽपगावृतम् ।
प्रफुल्ल-शाखि-शोभित
खगारवैर्निनादितम् ॥ नमामि० ॥

(३)

प्ररूढ-शस्य-श्यामल
तप -प्रभा-समुज्ज्वलम् ।
श्रुतेर्निनाद-निर्मल
श्रये सदा-समुज्ज्वलम् ॥ नमामि० ॥

(४)

जय-ध्वज-प्रशोभित
त्रिवर्ण-केतु-राजितम्
अमित्र-मान-मर्दन
सुदृप्त-दर्प-भञ्जनम् ॥ नमामि० ॥

(५)

स्वज्ञान-दीप्ति-भास्वर
गुण-प्रभा-विकस्वरम् ।
स्व-पौरुषाप्त-रोचिष
स्वयोजनाप्त-ज्योतिषम् ॥ नमामि० ॥

(६)

प्रबुद्ध-शुद्ध-मानस
तपोविधूत-कल्मषम् ।
सदाऽऽर्यवृन्द-वन्दित
सुधी-प्रवीर-चर्चितम् ॥ नमामि० ॥

(७)

हुतात्म-दीप्ति-भास्वर
प्रवीर-शौर्य-द्योतितम् ।
सुधा दया-गुणाकर
श्रये सुखौघ-शान्ति-दम् ॥ नमामि० ॥

(८)

समस्त-विश्व-वन्दित
गुणोच्चयार्जनोच्छ्रितम् ।
अहिंसया सुखावह
समस्त-विश्व-दोष-हम् ॥ नमामि० ॥

(९)

गुणाञ्चित प्रभाञ्चित
समस्त-गौरवाञ्चितम् ।
दरिद्र-दीन-तारक
सदाऽऽर्य-वर्त्म-धारकम् ॥ नमामि० ॥

(१०)

त्वदङ्घ्रि-पद्म-सेवन
समस्त-दोष-नाशनम् ।
अशेष-शोक-शोषण
सुखौघ सिन्धु-पोषणम् ॥ नमामि० ॥

२ वन्दे भारत-मातरम्

(गीतिका) (मात्रासमक जाति)

(१)

वन्दे भारत-मातरमेता
सुषमा गौरव-गुम्फित-वेषाम् ।
हिमगिरि-शुभ्र-किरीट-सुशोभा
विन्ध्य-राजि-कटि-रत्न-सुमध्याम् ॥ वन्दे० ॥

(२)

शस्य-श्यामला गुण-गण हृद्या
कुसुम-समृद्धि-फलैरभिनन्द्याम् ।
क्रान्तिकारि-बलिदान-मनोज्ञा
शान्तिदूत-जन-त्याग-बलाढ्याम् ॥ वन्दे० ॥

(३)

शौर्य-धैर्य-बल-सचित शक्ति
त्याग-तपोबल-सश्रित-शान्तिम् ।
करुणा-मुदिताऽमृतमय-चित्ता
दीन-हीन-जनतार्पित-वित्ताम् ॥ वन्दे० ॥

(४)

षष्टि-कोटि-जन-घोष-कराला
शान्ति-सरोवर-रुचिर-मरालाम् ।
धान्य-समृद्धि-समेधित-शोभा
सरिता कल-रव-राजित-देहाम् ॥ वन्दे० ॥

(५)

तुहिनदीधितेर्दीधिति-रम्या
तिग्मदीधितेर्दीधिति-दीप्ताम् ।
हास-लास्य-लय-गीति-गुणाढ्या
स्नेह-दया-शुचिता-रुचिराभाम् ॥ वन्दे० ॥

(६)

शत्रु-मर्दिनी खल-दल-दलनी।
दु ख-हारिणी शोक-तारिणीम्।
ताप-शाप-भय-त्रास-वारिणी
दैन्य-दोप-मद-रोप-हारिणीम् ॥ वन्दे० ॥

(७)

सुखदा वरदा सुरुचि-हासिनी
मञ्जुल-वाच स्नेह-धारिणीम्।
दीन-हीन-पतितार्ऽर्ति-हारिणी
साम्य-सौख्य-मुदिता-प्रसारिणीम्॥ वन्दे० ॥

(८)

रोग-शोक-भय-दु ख-प्रहर्त्री
क्षोभ-रोप-क्षय-क्षति-सहर्त्रीम्।
जागृति-ममता-गुण-सधर्त्री
नव्य-चेतनोत्साह-प्रदात्रीम् ॥ वन्दे० ॥

(९)

शान्ति-सौख्य-दा भुक्ति-मुक्ति-दा
जीवन-जागृति-स्फूर्ति-शक्ति-दाम्।
विश्व-ज्ञानदा विश्व प्रेमदा
विश्व-शान्तिदा करुणा-पूर्णाम् ॥ वन्दे० ॥

(१०)

क्रान्ति-शान्ति-कर युग्म-धारिणी
पाप-तापिनी स्वाय-नाशिनीम्।
शक्ति-भक्ति-बल-वीर्य-दायिनी
क्रान्ति-तोपिणी शत्रु-शोपिणीम्॥ वन्दे० ॥

३ राष्ट्र-गानम्

(गीतिका) (मात्रासमक जाति)

(१)

जन-गण-मङ्गलदायक ! जय हे !
भारतदेश ! सदा तव जय हे !
ज्ञान-ज्योतिरयममृत-सूति ,
शक्ति-भक्ति-हृत गौरव-भूति ॥ जन० ॥

(२)

खग-रव-पूर्ण सुषमाऽऽकीर्ण ,
शस्य-श्यामलो गरिमोत्कीर्ण ।
विश्वज्ञानदो विश्व-प्रेम-दो
विश्व-शान्ति-बन्धुत्व-भावद ॥ जन० ॥

(३)

हिमगिरि-शोभित-मञ्जुल-मूर्ति
विन्ध्य-शैल-शिखरार्चित-भूति ।
गङ्गा-यमुना सिन्धु-नर्मदा-
ताप्ती-कृष्णा-जलरव-हृद्य ॥ जन० ॥

(४)

उत्कल-बङ्ग-पञ्चनद-पुष्ट
असम-विहार-हार-सजुष्ट ।
उत्तर-मध्य-देश[1]-सपुष्ट ,
गुर्जर-राजपुत्र[2]-सहृष्ट ॥ जन० ॥

(५)

आन्ध्रदेश-तमिलार्पित शक्ति
महाराष्ट्र-कृत-गौरव-पूर्ति ।
कर्णाटक-कृत-गति-लय-रम्य
केरल-सुषमा-प्रतिपल-हृद्य ॥ जन० ॥

---

१ उत्तरप्रदेश मध्यप्रदेशौ । २ गुजरात-राजपूताना-प्रदेशौ ।

(६)

पष्टि-कोटि-जन-मंगल-घोष ,
वेद-चारु-ध्वनि-सहृत-दोष ।
शौर्य-धैर्य-बल-सहृत-रोष ,
मुक्ता-मणि-गण-सचित-कोष ॥ जन० ॥

(७)

आर्य-पारसी-यवन-सिक्ख-जन-
ख्रिस्त-बुद्ध-जिन-मत-मन्तार
ब्राह्मण-क्षत्रिय-वैश्य-शूद्रजन-
सहृत-भेद-भाव-सचार ॥ जन० ॥

(८)

तव आह्वान-समर्पित-देहा ,
वीरास्त्यक्त-धान्य-धन-गेहा ।
तव चरणार्पित-जीवन-स्नेहा ,
धन्यास्ते बलिदान-प्रवीणा ॥ जन० ॥

(९)

स्नेहपुञ्ज हे ! शक्तिपुञ्ज हे !
ज्ञानपुञ्ज हे ! गौरव-मूर्ति ।
क्रान्ति-दीक्षया देहि चेतना
शान्ति दीक्षया हर भव-तापम् ॥ जन० ॥

(१०)

ज्योतिर्मय हे भुवन-भास्कर !
त्रास-नाश भय-दोष सहर ।
भ्रातृभाव-समता-ममताया
प्रतिपलमविचल-भाव समर ॥ जन० ॥

४ मातृभूमिः
(गं तिका)

(१)

मातृभूमे ! सदा शक्ति-सचारिके !
पादपद्मे शुभे ते नति सततम् ।
ज्ञान-ज्योति -प्रसू सौख्य-सचारिणी
दु ख-दावाग्नि-हर्त्री मनोमोहिनी ॥ मातृभूमे० ॥

(२)

त्वं हि क्रान्ति सदा न्याय-रक्षा-परा
शत्रु-समर्दनी क्रूर-मानापहा ।
ज्ञान-शक्ति-प्रदा उद्यमाधायिनी
शक्ति स्रोत -स्वरूपा सुखाधायिनी ॥ मातृभूमे० ॥

(३)

पावन ते रज सर्व-सौख्याकर
क्रान्तिदूतै शिरोभि सदा धारितम् ।
शक्तिद शौर्यद भक्तिद मुक्तिद
ज्ञानद मानद तापह पापहम् ॥ मातृभूमे० ॥

(४)

पावन ते पयो दुग्ध-धारोपम
पावन ते वन पावना पर्वता ।
पावनी ते सरिद् वृक्षमाला शुभा
पावन ते समस्त मत सौख्यदम् ॥ मातृभूमे० ॥

(५)

पावन ते प्रसून सुगन्धावह
पावन क्षेत्रमेतत् सुसस्यैर्वृत्तम् ।
पावन ते दिन पावनी यामिनी
पावन कन्दमूल फल सौख्यदम् ॥ मातृभूमे० ॥

(६)

यत्र हैमो गिरिस्ते किरीटप्रभो
नाग-कश्मीर-[1]भूस्ते भुजौ समतौ।
यत्र गङ्गा सदा रक्त-सचारिका
विन्ध्यमाला मता पृष्ठवशोपमा ॥ मातृभूमे० ॥

(७)

गुर्जरान्ध्रौ[2] मतौ यत्र जङ्घोपमौ
मध्यदेश[3] कटि सवशोभावृत ।
केरलस्तामिल[4] पादरूपौ मतौ
सागरेणाचित पादयुग्म शुभम् ॥ मातृभूमे० ॥

(८)

विश्ववन्द्या सदा त्व गुणैरचिता
ज्ञानज्योति प्रदाऽध्यात्म-सदेशिका ।
सत्यनिष्ठा सदा सत्यशिक्षापरा
सत्यधर्मोदया सवधर्मप्रिया ॥ मातृभूमे० ॥

(९)

विश्वशान्ति सदा ते मत समत
विश्वबन्धुत्वशिक्षा सदा ते प्रिया ।
त्व तु विश्व कुटुम्ब सदा मन्यसे
ज्ञानदात्री सदा पापहर्त्री मता ॥ मातृभूमे० ॥

(१०)

क्रान्ति-सचारिणी दुष्ट-सहारिणी
सौख्य-सधारिणी दुःख-सतारिणी ।
शक्तिरूपा सदा भक्तिरूपा प्रिया
जीवन मेऽर्पित तेऽङ्घ्रियुग्मे शुभे ॥ मातृभूमे० ॥

---

१ नागालैंड-कश्मीरप्रदेशौ, २ गुजरात-आन्ध्र-प्रदेशौ, ३ मध्यप्रदेश, ४ तमिलनाडु ।

५ मातृभूमि-स्तवः

(गीतिका) (स्त्रग्विणी वृत्तम्)

(१)

मातृभूमि सदा देवभूमि शुभा
देववर्यैर्वृता वीरवर्यै स्तुता ।
भारती भूरिय रत्नगर्भा मता
स्वर्णभूमिर्मणीना खनि समता ॥ मातृ० ॥

(२)

मातृभूमेस्तु तुल्य न किंचिद् भवे
मातृभूमिस्तु स्वर्गादपि श्रेयसी ।
प्राणदात्री सदा चान्नदात्री स्थिता
पालिका पोपिका मातृरूपा मता ॥ मातृ० ॥

(३)

मातृभूमि सदा वन्द्यते स्तूयते
पुत्ररूपा वय स्नेहभाजो मता ।
मातृभूमेर्ऋणान्नैव मुक्तिर्भवे
प्राणदान सदाऽपेक्षते मातृभू ॥ मातृ० ॥

(४)

क्रान्तिदूते सदा प्राणदाने स्तुता
शान्तिदूते सदा स्वार्थत्यागाद् वृता ।
धर्मनिष्ठै स्वदेहार्पणेनाऽऽदृता
देशभक्तैश्च शूलि प्रियेवाऽऽदृता ॥ मातृ० ॥

(५)

स्वर्गरूपा सदा स्नेहरूपा प्रिया
-हैम-विन्ध्याद्रिमाला-गुणालकृता ।
शस्य श्यामा सरिद्भि सुरक्ताञ्चिता
पद्मजा[1] शैलजा[2] नीरजेवा[3]ऽऽदृता ॥ मातृ० ॥

---

१ लक्ष्मी, २ पार्वती, ३ कमलिनी ।

(६)

अन्नदाने सदा तोयदाने स्तुता
कन्द-मूले सुपुष्पे फलैमण्डिता।
पूतपासु श्रिता तीर्थराजै शुभै
मातृशक्ति सदा प्रेरणादायिनी ॥ मातृ० ॥

(७)

शक्तिदात्री सदा स्नेहस्रोत प्रिया
सौख्यधात्री सदा शान्तिरूपा मता।
तेऽङ्घ्रियुग्म सदा पाप-सन्तापहं
दोषहं रोषहं क्लेशहं द्वेषहम् ॥ मातृ० ॥

(८)

विश्वशान्ते सदा शिक्षिका शान्तिदा
शान्तिधामाऽऽश्रया श्रेयसे ज्ञानदा।
विश्वबन्धुत्व-शिक्षाप्रदा भैरवा
शत्रु-संहारिणी दैत्य विध्वंसिनी ॥ मातृ० ॥

(९)

भारतीया समे ते सुता लालिता
पालिता पोषिता स्नेह-सर्वधिता।
भ्रातृरूपा न तेषां विरोध शुभ
स्नेह-भावोदय प्रोन्नतं कारक ॥ मातृ० ॥

(१०)

धर्मभेदो न वा जातिभेद शुभो
वर्गभेदो न वा वर्णभेद शुभ।
मातृभूमे समुत्कर्षहेतोर्मुदा
प्राणदान वर वित्तदान शुभम् ॥ मातृ० ॥

६ भारत त नुमो भारत त नुमः

(गीतिका) (स्रग्विणी-वृत्तम)

(१)

यत्र वेदध्वनि पापसंहारिणी
यत्र शास्त्रादि-चर्चा मनोमोहिनी।
यत्र वेदान्त-विद्या सुधाधायिनी
भारत त नुमो भारत त नुम ॥

(२)

यत्र सत्य शिव सुन्दर राजते
यत्र धर्मार्चना वीरपूजा सदा।
यत्र विश्व कुटुम्ब मत श्रेयसे
भारत त नुमो भारत त नुम ॥

(३)

यत्र गङ्गा नदी, यत्र कालिन्दिका
यत्र गोदा च कृष्णा च कावेरिका।
यत्र सिन्धुर्विपाशा शुभा नर्मदा
भारत त नुमो भारत त नुम ॥

(४)

यत्र रामश्च कृष्णश्च विश्वात्मनौ
यत्र बुद्धो वसिष्ठश्च वल्मीकज।
गोतमो जैमिनि श्रीकणादो मुनि
भारत त नुमो भारत त नुम ॥

(५)

यत्र रामायण च महाभारत
दर्शनाना चयो यत्र ज्ञानामृतम्।
यत्र स्मृत्यादिक धमशास्त्रोच्चयो
भारत त नुमो भारत त नुम ॥

(६)

यत्र सीता सती रामप्राणप्रिया
यत्र कृष्णप्रिया राधिका राजते।
यत्र गार्गी च विद्योत्तमा राजतो
भारतं त नुमो भारत त नुम ॥

(७)

यत्र व्यासो मुनि पाणिनि पिङ्गल
कालिदास कविर्भारविर्भास्वर ।
माघ-हर्षादय काव्यकारोत्तमा
भारत त नुमो भारत त नुम ॥

(८)

यत्र कादम्वरी विज्ञ-चेतोहरी
मेघदूत मनोदूत-कान्त मतम् ।
गीतगोविन्दक कृष्णलीलामृत
भारत त नुमो भारत त नुम ॥

(९)

यत्र हैमो हिमाच्छादित पवतो
यत्र कश्मीर भू स्वर्ग शोभा-स्थली ।
विन्ध्यमालाञ्चली-सतपुडा-सहति
भारत त नुमो भारत त नुम ॥

(१०)

यत्र काशी पुरी ज्ञान विद्या-प्रदा
यत्र काञ्ची पुरी ज्ञान-गौनाश्रया ।
यत्र वृन्दावन कृष्णलीलाश्रयं
भारतं तं नुमो भारतं त नुम ॥

(११)

यत्र तीर्थाधिप सगमो राजते
नेहरू-मालवीयो नृणामादृतौ ।
उत्तर स प्रदेशो जनैर्गीयते
भारत त नुमो भारत त नुम ॥

(१२)

यत्र बौद्धा विहारा अशोको नृपो
ज्ञान-विद्या-स्थल यत्र नालन्दकम् ।
स्तूप-चैत्यैर्विहारोऽस्ति स्याति गतो
भारत त नुमो भारत त नुम ॥

(१३)

क्रान्तिदूत सुभाषो वसुर्भासते
वकिमो देशभक्तो रवीन्द्र कवि ।
रामकृष्णारविन्दादृता[1] वङ्गभू,
भारत त नुमा भारत त नुम ॥

(१४)

नानको भक्तवर्यश्च शिष्याग्रणी[2],
यत्र गोविन्दसिहश्च सिंहोपम ।
लाजपत्रार्चिता[3] पुण्यपञ्चालभू[4],
भारत त नुमो भारत त नुम ॥

(१५)

यत्र राणाप्रताप प्रतापाश्रयो
भक्त-मीरा सुवीरा प्रिया पद्मिनी ।
राजपुत्र-स्थली[5] जैन-पूजा-स्थली[6]
भारत त नुमो भारत त नुम ॥

---

१ रामकृष्ण-परमहस , अरविन्दघोषश्च । २ सिक्खसप्रदायप्रवर्तक ।
३ लाला लाजपतराय । ४ पजाब प्रदेश । ५ राजपूताना-प्रदेश ।
६ आबू-पर्वते जैनमन्दिरम् ।

(१६)

यत्र गान्धिर्गुणाब्धि पटेल[1] सुधी,
घर्ममूर्तिदयानन्द-स्वामी स्थित ।
सोमानायान्वितो गुर्जरो[2] राजते
भारत त नुमो भारत त नुम ॥

(१७)

लौह-सयन्त्र-भूमिर्भिलाई-युतो
विक्रमेणार्चितोऽवन्तिका-सगत ।
मध्यदेशोऽत्र[3] भोपाल-सिप्रान्वितो
भारत त नुमो भारत त नुम ॥

(१८)

बालगङ्गाधरो[4] यत्र ज्ञानेश्वर
सन्त-दास[5] शिवाजी-शिवाराधित ।
यत्र मुम्बापुरी तन्महाराष्ट्रक
भारत त नुमो भारत त नुम ॥

(१९)

शकरो[6] दिव्यधीर्यत्र रामानुज
सायणो माधवो यत्र रामेश्वरम् ।
यत्र कर्णाट-सगीत-शोभा-स्थली
भारत त नुमो भारत त नुम ॥

(२०)

यत्र क्रान्तेश्च शान्तेश्च दूता स्थिता,
ज्ञान विज्ञान-शौर्य-स्थल गीयते ।
विश्वबन्धुत्व-शिक्षा-प्रसार-स्थल
भारत त नुमो भारत त नुम ॥

---

१ सरदार-पटेल । २ गुजरात-प्रदेश । ३ मध्यप्रदेश । ४ बाल-गगाधर तिलक । ५ सन्त समर्थगुरु रामदास । ६ शंकराचार्य ।

७ जयतु जयतु मे भारतदेश

(गीतिका)

(१)

जयतु जयतु मे भारतदेश,
जयतु गुणान्वित-गौरव-वेश ।
वीर-प्रसू सुषमाढ्य-मनोज्ञ,
वीर वृन्द-परिपालित-देश ॥ जयतु० ॥

(२)

शस्य-श्यामलो नव-रस-पूर्णं,
खग-रव-शोभित-द्रुम-दल-पूर्ण ।
नाना-नद-सरिता रव-तूर्णं
सुमन्द-मदागति-गति-रय-पूर्णं ॥जयतु०॥

(३)

हिमगिरि-शोभित-मञ्जु किरीट
विन्ध्य-मेखला-मणिमय-मध्य ।
सागर-पूजित-पद-युग-रम्य
शान्ति-सुधा-रस-गौरव-हृद्य ॥जयतु०॥

(४)

विश्ववन्द्य-कविवृन्द-समिद्ध
ज्ञान-दीप्ति-श्रित-भूति-समृद्ध ।
तत्त्वज्ञान-गरिमाञ्चित शुद्ध
शौर्य-धैर्य-बल-बुद्धि-प्रवुद्ध ॥जयतु०॥

(५)

मति-रति-भक्ति-विरक्ति गुणाढ्य,
कृति-तति शक्ति-समन्वित-काय ।
ज्ञान-भानु-कर हृत-मल-शुद्ध
ऋद्धि-सिद्धि-सुषमा-सुसमृद्ध ॥जयतु०॥

(६)

सर्वकाल-सुषमा-परमाढ्य ,
कुसुम-समृद्धि-समेधित-शोभ ।
शाद्वल-शोभित-सुरभित-क्षेत्र ,
ज्ञान-भक्ति-कृति-रम्य-त्रिनेत्र ।।जयतु०।।

(७)

कालिदास-कपिलादि-प्रसिद्ध ,
माघ-हर्ष-भवभूति-समृद्ध ।
गोतम-जैमिनि-दर्शन-सिद्ध ,
उमा-रमा-गुण-गौरव-शुद्ध ।। जयतु० ।।

(८)

ज्ञानामृत-परितोषित-लोक ,
तत्त्वज्ञान-परिशोषित-शोक ।
शान्ति-सुधा-रस-हृत-कलि-पाप ,
कर्मयोग-हृत-मानस-ताप ।। जयतु० ।।

(९)

गांधि-सुभाष-गुणावलि वन्द्य ,
कवि-अरविन्द-रवीन्द्र-सुनन्द्य ।
भक्तसिंह-तिलकाञ्चित-भाल
स्वामि-दयानन्दार्चित-पाद ।। जयतु० ।।

(१०)

शान्ति-क्रान्ति-समवाय-समिद्ध
शक्ति-भक्ति-नय-सिद्धि-समृद्ध ।
निखिल-विश्व-सुख शान्ति-प्रगुण ,
भवतु भवे गुण-कीर्ति-प्रसिद्ध ।। जयतु० ।।

८ प्रभो, त भारत रक्ष

(गीतिका)

(१)

प्रभो ! दु खाब्धि-सत्रात !
सदेम भारत रक्ष ।
क्षुधा-शोकाग्नि-सतप्त,
सदेम भारत रक्ष ॥ प्रभो० ॥

(२)

सदा विश्वस्य यज्ज्योति ,
सदा य प्रेरणा-स्रोत ।
भुवो मार्गोपदेष्टा य ,
सदा त भारत रक्ष ॥ प्रभो० ॥

(३)

श्रुतीना यत्र सनाद ,
यतीना ज्ञान-सवाद ।
मुनीना दर्शनोत्कर्ष ,
सदा त भारत रक्ष ॥ प्रभो० ॥

(४)

भवे वन्धुत्व शिक्षाया ,
सदैवाग्रेसरो योऽभूत् ।
सदाऽध्यात्मोपदेष्टा यो
मुदा त भारत रक्ष ॥ प्रभो० ॥

(५)

धरेय त्रास-सत्रस्ता
क्षुधा-रोगाऽऽधि-सध्वस्ता ।
अशिक्षा ध्वान्त-सग्रस्ता,
सुधा-वर्षे सदा रक्ष ॥ प्रभो० ॥

(६)

सदा य क्रान्ति-दूताना
निनादै पूर्यमाणोऽभूत् ।
सदा क्रान्तेर्निनादेन
सुदेश भारत रक्ष ॥ प्रभो० ॥

(७)

न शाम्येत् क्रान्ति-सन्देश,
न रुन्ध्याद् राष्ट्र-सन्देश ।
न नश्येत् चेतनोत्साह,
तथैव भारत रक्ष ॥ प्रभो० ॥

(८)

धरेय पाविता पूतै,
स्व-रक्तै क्रान्तिदूतैस्तै ।
यशोमाला सदा विन्देत्,
तथैव भारत रक्ष ॥ प्रभो० ॥

(९)

ज्वलेद् विज्ञान-सज्योति,
प्रणश्येदाधि-दु खाग्नि ।
चरेत् क्रान्तेश्च दावाग्नि,
तथैव भारत रक्ष ॥ प्रभो० ॥

(१०)

ऋषीणा ज्योतिषा पूत
हुतात्म-त्याग-संपुष्टम् ।
सुधीना कीर्ति-मजुष्ट
वरेण्य भारत रक्ष ॥ प्रभो० ॥

९ भारत-देशः
(गीतिका)

(१)

देशोऽस्तु भारतो मे,
कीर्त्या श्रिया समिद्ध ।
देश प्रवुद्ध एप
सुपमा-गुणै समृद्ध ॥ देशोऽस्तु० ॥

(२)

विश्वस्य शान्ति-हेतु,
दैन्याऽऽधि-नाश-केतु ।
गुण-गौरवैक-सेतु,
ज्ञानोन्नति विदध्यात् ॥ देशोऽस्तु० ॥

(३)

कृपका कृपौ नियुक्ता,
तपसा श्रमेण पुष्टा ।
धन धान्य-भूति-युक्ता,
हृष्टा श्रिया भवेयु ॥ देशोऽस्तु० ॥

(४)

ये दीन-हीन-लोका,
दु खाग्नि-ताप-तप्ता ।
शप्ता सुखैर्वियुक्ता,
तेपा समुद्धृति स्यात् ॥ देशोऽस्तु० ॥

(५)

श्रमजीविनो हि लोका
धनिभिस्तिरस्कृता ये ।
वृत्त्यै च शोप्यमाणा,
राज्येन रक्षिता स्यु ॥ देशोऽस्तु० ॥

(६)

श्रम शौर्य-दान-शक्ति ,
सत्याग्रहेऽनुरक्ति ।
परमेश-प्रीति-भक्ति ,
प्रचरेत् समेऽपि लोके ॥ देशोऽस्तु० ॥

(७)

स्यादन्धभक्ति-नाश ,
नैर्घृण्य-दोष-ह्रास ।
करुणा-दया-प्रहास ,
ज्योतिश्च जीवनेऽस्मिन् ॥ देशोऽस्तु० ॥

(८)

विश्वाभिराम-देश
शौर्यास-सौख्य-कोश ।
ज्ञानाग्नि दग्ध दोष ,
क्षेम श्रिय प्रणुद्यात् ॥ देशोऽस्तु० ॥

(९)

क्रान्तेर्ध्वज दधान ,
शान्तेश्च मन्त्रदाता ।
विश्वस्य ज्ञानदाता
दिव्या धिय तनोतु ॥ देशोऽस्तु० ॥

(१०)

हिंसा-क्षुधा-विरोध',
दीनाऽऽर्त-शोष त्रास ।
रोगाऽऽधि-दैन्य-दोष ,
सानन्द विनाशमेयात् ॥ देशोऽस्तु० ॥

१० राष्ट्र-ध्वज-गीतम्

(गीतिका) (मात्रासमक जाति)

(१)

जयति त्रिवर्णं गुणगणपूर्णं
जगति समिद्ध सुषमाऽऽकीर्णम् ।
स्नेह-सौख्य-रस गौरव-मान
धृति-मति शक्ति-सुधौघ-निधानम् ॥ जयति० ॥

(२)

विश्व शान्ति हित-कृत सन्देश
भ्रातृभाव समतैक निदेशम् ।
चारु चरित कृत-जन-सतोषम्
आधि-व्याधि भय-शोषण शोषम् ॥ जयति० ॥

(३)

वीर-केतुरयमुच्छ्रित-दण्ड
शौय प्रधर्षित रिपु दल खण्ड ।
शत्रु सैन्य दलनेन प्रचण्ड
क्रान्तिकारि चरितामृत चण्ड ॥ जयति० ॥

(४)

ध्वजमिममुन्नय, मातरमचय,
अञ्चय देशहितार्पित-जीवम् ।
भञ्जय शत्रु, रञ्जय मित्र
मण्डय देश, खण्डय द्वेषम् ॥ जयति० ॥

(५)

केसर श्वेत-हरित-गुणपूर्णं
वर्णभ्राजित-रुचिर-सुशोभम् ।
केसर-वर्णित त्याग-तपोबल-
शौय धैर्य-गरिमोच्चय-पूर्णम् ॥ जयति० ॥

(६)

श्वेत-वर्ण-धृत-शम-सन्तोष
सत्य-अहिंसा-शान्ति-गुणौघम् ।
हरित-वर्ण-श्रित-वैभव भावम्
उन्नति-प्रगति विकास गुणाढ्यम् ॥जयति०॥

(७)

धम-चक्र-ससूचित धर्मं
धर्मे-नय धर्मार्पित देहम् ।
प्रगति-सूचक चक्रमिदं ते
सूर्य-चक्रमिव ह्याम विकासम् ॥ जयति० ॥

(८)

लोक-हिताय जगद्धित हेतो
भ्रातृभाव समता-सुख-हेतो ।
प्रगति विकास-समुन्नति-हेतो
विलसेद् राष्ट्रध्वज सुख सेतु ॥ जयति० ॥

(९)

क्रान्तिकारिभिर्जीवन-दाने ,
शान्ति-पथे सर्वस्व प्रदाने ।
वीर धीर-जन-जीवन त्यागे ,
अर्चितमेतत् प्रतिपल रम्यम् ॥ जयति० ॥

(१०)

क्रान्ति शौर्य धृति-जीवन-दान
दिक्षय लोक, शोषय शोकम् ।
षष्टि-कोटि-जय-नाद-समुत्थं
विहरेद् विलसेद् गौरव-पूर्णम् ॥ जयति० ॥

११ स्वाधीनता (स्वातन्त्र्यम्)

(गीतिका) (भुजग प्रयातम्)

(१)

स्वतन्त्राप्ति[1]रेषा सदा सौख्य-दात्री
भयाना प्रहर्त्री गुणाना प्रदात्री ।
त्वमेवासि लोके सदा मानदात्री
सदा कीर्तिदात्री सदा मोददात्री ॥ स्वतन्त्रा० ॥

(२)

न त्वत्त पर मानद लोकमध्ये
न त्वत्त पर सौख्यद किंचिदस्ति ।
त्वमेवासि लोकस्य चैतन्य दात्री
सदा प्रेरणाभू सदा शक्ति-स्रोत ॥ स्व० ॥

(३)

विना त्वा जना शक्ति-कीर्त्यादि हीना ,
सुबुद्धेर्विहीना सदा मान हीना ।
नरा पामरास्ते क्षुधा-दैन्य-त्रस्ता ,
अविद्याऽन्ध-ग्रस्ता सदा शोक ध्वस्ता ॥ स्व० ॥

(४)

विना त्वा नृणा जीवन मोघमेव
विना त्वा गति सर्वदा दु खदैव ।
विना त्वा शिरस्थ सदा मृत्युरेव
विना त्वा विकासो न हर्षाप्तिरेव ॥ स्व० ॥

(५)

न यत्रास्ति ते दीधिति[2] सौख्यमूला
न यत्रास्ति ते श्री सदा कीर्तिशीला ।
न राष्ट्र न देश प्रदेशो विशेषो
विना त्वा श्रित कीर्तिमिष्टा श्रिय वा ॥ स्व० ॥

---

१ स्वातन्त्र्य-लाभ । २ किरण , प्रकाश ।

(६)

त्वमेवासि सौख्यस्य मूलं समन्तात्
त्वमेवासि कीर्त्यादिमूलं पुरस्तात् ।
त्वमेवासि मानस्य शक्तेश्च हेतु
त्वमेवासि शस्त्रं त्वमेवासि हेतिः ॥ त्व० ॥

(७)

त्वदीये पदाब्जे मुदा देशभक्ता
बलिं दत्तवन्तो मुदं प्राप्तवन्तः ।
त्वदर्चापरा ये नरा मातृभक्ता
सदा स्यात्सु तेषां यशो राजतेऽत्र ॥ त्व० ॥

(८)

त्वमेवासि शक्तिः, त्वमेवानुरक्तिः,
त्वमेवासि सिद्धिः, त्वमेवासि ऋद्धिः ।
त्वमेवासि मन्त्रं, त्वमेवासि तन्त्रं,
त्वमेवासि शान्तिः, त्वमेवासि क्रान्तिः ॥ त्व० ॥

(९)

त्वमेवासि दुर्गा, त्वमेवासि रम्या,
अधृष्या त्वमेवासि दुर्धर्षरूपा ।
सदा स्नेह-स्रोतः, सदा शक्तिस्रोतः,
त्वदीयां कृपां याचते सर्वलोकः ॥ त्व० ॥

(१०)

सदा भारते ते कृपा सतता स्यात्,
त्वदर्चापरा भारतीया भवेयुः ।
विहाय स्वकं स्वार्थजातं जघन्यं
मुदा जीवनं तेऽर्पयेयुः पदाब्जे ॥ त्व० ॥

१२ प्रयाण-गीतम्

(गीतिका)

(१)

प्रयाहि वीर ! सन्तत
प्रयाहि वीर ! सन्ततम् ।
प्रयाणमेव जीवन,
प्रयाणमेव जीवनम् ॥ प्रयाहि० ॥

(२)

जगत् प्रयाति सतत
धरा प्रयाति सततम् ।
मरुत् प्रयाति सतत
सरित् प्रयाति सततम् ॥ प्रयाहि० ॥

(३)

यति प्रयाति सन्तत
मति प्रयाति सन्ततम् ।
चमू प्रयाति सतत
घन प्रयाति सततम् ॥ प्रयाहि० ॥

(४)

गति सुघोष-दायिनी
गति सदेष्ट साधनी ।
गति सुखावहा मता
गतिश्च दु ख-नाशनी ॥ प्रयाहि० ॥

(५)

प्रघृष्ट शत्रु-सयुता
चमू विदारयन् सदा ।
जय ध्वनि प्रणोदयन्
जय लभस्व सततम् ॥ प्रयाहि० ॥

(६)

स्व मातृ भारती स्तुवन्
स्व-देश-भक्तिमाश्रयन् ।
स्व-राष्ट्र-गौरव भजन्
लभस्व गौरव सदा ॥ प्रयाहि० ॥

(७)

इय धरा हुतात्मभि
स्व-रक्त दान-पाविता ।
न शत्रु-दोष दूषिता
तथा यतस्व सततम् ॥ प्रयाहि० ॥

(८)

अशेष-क्लेश मर्त्ति
समस्त विघ्न सहतिम् ।
सदाऽऽत्म शक्ति संयुत
सहस्व सिंहवद् मुदा ॥ प्रयाहि० ॥

(९)

सदाऽऽशिषा युतो भव
नत स्व मातृ-पादयो ।
सदा श्रयस्व गौरव
स्वदेश-भक्ति भावित ॥ प्रयाहि० ॥

(१०)

सदा अमित्र-मर्दन
सदा सुहृत्त भञ्जन ।
स्वदेश-प्रीति-सेनन
प्रयाहि सिंहवत् सदा ॥ प्रयाहि० ॥

१३ राष्ट्र-रक्षा

(गीतिका) (भुजगप्रयातम्)

(१)

स्व-देश-व्रते जीवन येऽर्पयन्ति
यशस्ते भवे शाश्वत स्थापयन्ति ।
इय भारती भू सदा देवपूज्या
सदा रक्षणीया सदा सेवनीया ॥

(२)

स्वदेशस्य रक्षा विधौ य प्रणाश
स्वरक्तस्य दान श्रमस्यापि दानम् ।
चल यच्च वित्त क्षणध्वसि वर्ष्म
स्वदेशार्पित जायते शाश्वत तत् ॥

(३)

इद जीवन वृक्ष सस्योपमान
सदा जायते नाशमत्यन्तमेति ।
ध्रुव तत् स्थिर तत् चिरस्थायि चैव
यदद्धार्ऽपित देश-रक्षा-प्रयत्ने ॥

(४)

यशो ह्यक्षर शाश्वत चामृत च
तनुनश्वरा चञ्चला क्षीणयोगा ।
स्वदेशस्य रक्षाव्रते कीर्तिरेव
यशश्चामृत गौरव चानवद्यम् ॥

(५)

न जाता मृता वा कियन्त पृथिव्या
कियन्तो न वा नाममात्रेण शिष्टा ।
पर भूतले रोचिषा रोचमाना
स्वदेश व्रता भान्ति भास्वत्प्रकाशा ॥

(६)

न चिन्तोचिता देहनाशस्य जातु
सदा चिन्तनीया प्रिया मातृभूमि ।
धरा मातृरूपा वय पुत्रभूता
स्वमात्रे समर्प्यं धन जीवनं च ॥

(७)

धरा याचते ते बलि नित्यमेव
धरा याचते रक्तदान पवित्रम् ।
अपत्यस्य शौर्येण दानेन नित्य
यशो मातृभूमे परा कोटिमेति ॥

(८)

स्वदेशव्रता ये स्वदेहैरजस्र
बलि मातृभूम्यै ददत्यात्मयुक्ता ।
न तेषा भय शस्त्रपातस्य शूले
स्वयं निर्भया निर्जरास्ते धरण्याम् ॥

(९)

भवे भीरव कातरा स्वार्थलिप्ता
मृति यान्ति भूय श्वपाकादिवत् ते ।
सुवीरा सुधीरा स्वदेशाभिमाना
मृति वारमेकं प्रयान्तीह पूरा ॥

(१०)

यशो वै नृणा श्रेष्ठमेक मदीय
यशोऽर्थं नृणा जीवन वित्तमेव ।
मुधा स्वं यश किं कुरुध्वे जघन्य
ध्रुवे नाशयोगे परं देशहेतो ॥

१४ स्वदेशानुराग

(उपजातिवृत्तम्)

(१)

न यत्र देशोद्धृति-कामनाऽस्ते
न मातृभूमेर्हितचिन्तन च ।
न राष्ट्ररक्षा-बलिदान-भाव
श्मशान-तुल्य नरजीवन्न तत् ॥

(२)

देशस्य रक्षा जनता-समृद्धि
परोपकाराश्रयणेन वृत्ति ।
परार्थ चिन्ता पतितानुरागो
येष्वस्ति तेषा जनिरेव धन्या ॥

(३)

विनश्वर मानव-वर्ष्म नित्य
विनश्वर भौतिकमीश्वरत्वम् ।
अनश्वर शाश्वत-कीर्ति दायि
स्वराष्ट्र-हेतोर्निज-देह-दानम् ॥

(४)

यस्मिन् स्वदेशस्य न गौरव स्याद्
न चाभिमान निज-देश-कीर्तै ।
नराधमोऽय नृ पशुर्मतो मे
स्वदेशभक्त्या रहितो हितोऽपि ॥

(५)

देशोऽस्तु लक्ष्य परम त्वभीष्ट
देशानुराग परमोऽनुराग ।
स्याज्जीवन वा मरण च सद्य
तत् सर्वमेवास्तु स्वदेश-हेतो ॥

(६)

राष्ट्रस्य हेतोर्बलिदानभावो
राष्ट्रस्य कल्याणविधौ प्रयत्नः ।
रात्रिन्दिवं राष्ट्र-समृद्धि चिन्ता
स्याज्जीवनस्य प्रथमोऽभिलापः ॥

(७)

यस्मिन् सुधाऽऽसार-रस प्रसारा
स्वदेश-भक्तिस्तनुते स्वजालम् ।
कर्तव्यमास्थाय तनुंत्यजो ये
त एव धन्या कृतकृत्यवर्या ॥

(८)

सैवाधमो यत्र न देशभक्ति-
र्जागर्ति विद्युज्ज्वलनोपमाना ।
मा स्नेहदात्री सुख-शान्ति-दात्री
धात्री गुणाना यशसा श्रिया च ॥

(९)

स्व-जीवनोत्सर्ग-व्रता अजस्रं
प्राणान् जहुर्ये निज-राष्ट्र-हेतो ।
शान्तेश्च क्रान्तेश्च व्रत चरन्त
त एव देवा अमरा सुराश्च ॥

(१०)

स्व-मातृ-हेतोर्निज राष्ट्र-हेतो
प्राणार्पणं स्याज्जनता हिताय ।
समर्पणं लोकहिताय गर्व
स्याच्चैतमो मे परमोऽभिलाप ॥

१५ भारत-गौरवम्

(द्रुतविलम्बितम)

(१)

जयति भारत-राष्ट्र-वसुन्धरा
जयति गौरव-सौख्य-समुज्ज्वला ।
जयति जीवन शक्ति-सुधाऽऽपगा
जयति भूति-विभूषित-विग्रहा ॥

(२)

सकल-संसृति-संस्कृति-सूत्रधा
निखिल मानव-मान-विवर्धिनी ।
दुरित-दु ख भयौघ निवारिणी
जयति भारतभू सुखदा सदा ॥

(३)

नव-सुकीर्ति-समुज्ज्वल-शोभया
धृत-गुणावलि-दीप्ति-प्रदीपिता ।
सकल-लोक विलोचन-रूपिणी
अभयदा वरदा सुख-सारिणी ॥

(४)

अमित-दान-वितोषित-मानवा
दहन-शक्ति विनाशित-दानवा ।
विबुध गीत-गुणोच्छ्रय-शालिनी
नव-यशस्तति-मौक्तिक-मालिनी ॥

(५)

गुणवतामनिश हित-साधनी
कुकृतिनामनिश भय-साधनी ।
अनुदिन प्रगति दधती मुदा
हरति कस्य नरस्य न मानसम् ॥

(६)

निकष घर्षण-जात-महात्विषो
दधति स्वर्णरुच जयिनो जना ।
श्रम विकास-गुणाजन विश्रुता
जगति नेतृपद दधते बुधा ॥

(७)

खर-मरीचि-मरीचि-सम प्रभा
तुहिन-दीधिति-दीधिति-शोभना ।
वसुधरा वसुधा हित-काम्यया
जहति वर्ष्म निज समरे खरे ॥

(८)

नव-नवाङ्कुर शाद्वल शोभिनी
कुसुम-सहति सभृत-माधुरी ।
हिम समृद्धि समेधित गौरवा
वहति भारतभूगरिमोच्चयम् ॥

(९)

अरुणिमाऽनन-पद्मचये श्रित
तरुणिमा युन मानस-सश्रित ।
मधुरिमा वचने हृदि मर्मणि
प्रथयतेऽन्य यशो भुवोऽखिले ॥

(१०)

युधि जहु यति नैव मम्नेतरं
वरमनस्तु हुतात्मपरता न च ।
प्रलय-वह्नि-समा प्रलयावहा
जगति पौरवरा श्रियमाश्रिता ॥

(११)

श्रुति-निनाद-समुज्ज्वल-मानसा
सुकृत-कर्म-विपाक-विभाभृत ।
बुधवरा भुवि लब्ध-सुकीर्तयो
रुरुचिरेऽत्र जगद्धित-लालसा ॥

(१२)

वसुभृतो वसुधामवगाह्य ये
भव-विभूति-विभूषित-जीवना ।
वसुततिं निज देश-हिताय ये
विपणिनो विजहुस्त इमेऽर्चिता ॥

(१३)

श्रमजयैर्विजय क्व च नार्जित
श्रमिभिरात्त-गुणोच्चय-शालिभि ।
गुरुतर गरिमाणमवाप्य ते
सकल-लोक-ललाम-सृतिं ययु ॥

(१४)

असम-शौर्य-प्रधर्षित-शत्रवो
निज-पतिव्रत-धर्म-श्रित-श्रिय ।
हितमवेक्ष्य भुवो धृतहेतय
कथममूर्ललना न गुणास्पदा ॥

(१५)

वटुजनैर्यददर्शि स्वपौरुष
समरमेत्य तदाऽऽङ्ग्ल-प्रशासकैं ।
जहुरिमे निजजीवनमाहवे
गुणवतामवता च धुरि स्थिता ॥

(६)

निकष घर्षण-जात-महात्त्विषो
दधति स्वर्णरुच जयिनो जना ।
श्रम विकास-गुणाजन विश्रुता
जगति नेतृपद दधते बुधा ॥

(७)

खर-मरीचि-मरीचि सम-प्रभा
तुहिन-दीधिति-दीधिति शोभना ।
वसुधरा वसुधा हित-काम्यया
जहति वर्ष्म निज समरे खरे ॥

(८)

नव-नवाङ्कुर शाद्वल शोभिनी
कुसुम सहति सभृत-माधुरी ।
हिम समृद्धि समेधित गौरवा
वहति भारतभूगरिमोच्चयम् ॥

(९)

अरुणिमाऽऽनन-पद्मचये श्रित
तरुणिमा युव मानस सस्थित ।
मधुरिमा वचने ह्राद कर्मणि
प्रथयतेऽस्य यशो भुवनेऽखिले ॥

(१०)

युधि जहु कति नैव कलेवर
वरममस्त हुतात्मकता न क ।
प्रलय-वह्नि समा प्रलयावहा
जगति वीरवरा श्रियमाश्रिता ॥

(११)

श्रुति-निनाद-समुज्ज्वल-मानसा
सुकृत-कर्म-विपाक-विभाभृत ।
बुधवरा भुवि लब्ध सुकीर्तयो
रुरुचिरेऽत्र जगद्धित-लालसा ॥

(१२)

वसुभृतो वसुधामवगाह्य ये
भव-विभूति-विभूषित-जीवना ।
वसुर्तति निज देश-हिताय ये
विपणिनो विजहुस्त इमेऽर्चिता ॥

(१३)

श्रमजयैर्विजय क्व च नार्जित
श्रमिभिरात्त-गुणोच्चय-शालिभि ।
गुरुतर गरिमाणमवाप्य ते
सकल-लोक-ललाम-सृति ययु ॥

(१४)

असम-शौर्य-प्रर्षित-शत्रवो
निज-पतिव्रत-धम-श्रित-श्रिय ।
हितमवेक्ष्य भुवो धृतहेतय
कथममूर्ललना न गुणास्पदा ॥

(१५)

वटुजनैर्यददर्शि स्वपौरुष
समरमेत्य तदाऽऽङ्ग्ल-प्रशासकै ।
जहुरिमे निजजीवनमाहवे
गुणवतामवता च धुरि स्थिता ॥

(१६)

निजसुखान्यवमत्य धृतव्रता ,
भरत-भू-हित साधन-तत्परा ।
विबुध-वृन्द-सुगीत-गुणोच्चया ,
यतिवरा भुवने श्रितकीर्तय ॥

(१७)

सकलमन्ध-तमस्तति-सतत
जगदभूदिदमेव शुचाऽऽकुलम् ।
श्रुति निनाद-प्रणोदित तामसा
ऋषिवरास्त इमे महिता हिता ॥

(१८)

स्वयशसा तपसा च समेधिता
सकल-लोक हिताय कृतश्रमा ।
निखिल मोह-महासुर-नाशका
मुनिवरा· प्रथिता भुवनेऽखिले ॥

(१९)

भरत भू-गुण-गौरव-कीर्तने
मतिरुदेति मुदा प्रमदावहा ।
स्व धरणी गुण-कीतन-विश्रुत ,
अमरता लभते सुकवि सदा ॥

(२०)

भरत-भू-हित चिन्तन तत्परा ,
भरत-भू हित त्यक्त कलेवरा ।
भरत-भू-गुण-गौरव-सत्कृता ,
भरत-भू-तनयास्त इमे सुरा ॥

१६ राष्ट्रिय जागरणम्

(गीतिका) (भुजगप्रयातम्)

(१)

अये भारतीया ! यतध्व यतध्व
सुख शान्तिमिष्टा लभध्व लभध्वम् ।
सुख दु खजात सहध्व सहध्व
विकास प्रमोद भजध्व भजध्वम् ॥

(२)

इय क्रान्तिरिष्टा समे भारतेऽपि
प्रचार प्रसार भजेल्लोकहेतो ।
युवा वालको बालिका वृद्धवर्यो
ददत्वात्मयोग सदा देशहेतो ॥

(३)

सदा सविधानस्य रक्षापरा स्यु
स्वदेशाभिमान जने जागृयाच्च ।
जने वर्धतामादरो राष्ट्रकेतौ
नरो मोदमाला वहेद् राष्ट्रगीतौ ॥

(४)

सदा देशरक्षा, सदाऽऽदर्श-रक्षा
सदैवोच्च-भावाश्रया वृत्तिरिष्टा ।
विकास प्रकाशो भवेद् ग्राम-मध्ये
ज्वलेज्ज्ञान ज्योति समेषा मन सु ॥

(५)

भवेद् देशकार्ये सदा चित्त-योग
स्वदेशोन्नतौ स्यात् सदैवानुराग ।
विकासस्य कार्ये मनोयोजन स्याद्
दरिद्रातुराणा हित प्रेप्सित स्यात् ॥

(६)

प्रभुत्व स्वदेशस्य लक्ष्य सदा स्याद्
भवेदेकता राष्ट्रवृद्ध्यै जनेषु ।
अजस्र वहेत् स्वाभिमानस्य धारा
सदा प्रेरिता स्युर्जना देशभक्त्या ॥

(७)

जने जागृयाद् भ्रातृभावो भवाय
समत्वस्य भावोदय स्यात् सुखाय ।
न धर्मो न भाषा न देश प्रदेशो
भवेद् भेदकारी, न च क्षोभकारी ॥

(८)

यथैवादृता स्युर्नरा लोकमध्ये
तथा योषितामादर स्यादजस्रम् ।
न याने, न पाने, विवाहेऽन्यदा च
स्त्रिया आदरे न्यूनता लक्षिता स्यात् ॥

(९)

यथा सस्कृतिर्भारतीया प्रथेत
यथा गौरव भारतीय तनोतु ।
विहाय स्वक क्षुद्रभाव श्रमेण
महत्त्व प्रसार्यं भुव सस्कृतेश्च ॥

(१०)

न दैन्यस्य भावोदय स्याज्जनेषु
क्षुधा-हीन-भावावलिश्च प्रसर्पेत् ।
विलाप क्वचिन्न श्रुत स्याज्जनाना
निवासाश्रयो वृत्ति-लाभार्थमेव ॥

(११)

विपत्ति स्वदेशे यदेवाऽऽपतेत्तु
यदाऽऽह्वानलेशोऽपि रक्षार्थमायात्।
तदा सगतै सवमेवावमत्य
नरैर्भारतीयै सदा भाव्यमेव ॥

(१२)

दया-भाव-वृद्धिजने जीव-जाते
गवादेर्विवृद्धि पशूना सुरक्षा।
नदीना ह्रदाना वनाना नगाना
सुरक्षा कृता स्यात् पथामापणानाम् ॥

(१३)

विकास व्रजेद् भावना देशभक्ते
नराणा हितायेहित स्यादजस्रम्।
सुधारे रुचिर्ज्ञानवृद्धौ प्रवृत्ति
भवेद् दृष्टिकोणश्च विज्ञानमूल ॥

(१४)

न हिंसाश्रया वृत्तिरिष्टा जनेषु
भवेत् स्नेह-भावोदय सौख्यकारी।
सदा सपदो रक्षिता स्युर्जनाना
समाजाश्रया वा नरैराश्रिता वा ॥

(१५)

तथा स्याद् विकासो यथा लक्ष्यपूर्ति
भवेद् राष्ट्रकार्ये, न रोध क्वचित् स्यात्।
समष्टेश्च व्यष्टेर्हित स्यात् समान
सदोत्कर्षकारी विकास श्रिय स्यात्॥

(१६)

भवेद् राष्ट्रवृद्धिर्जनाना समृद्धि
सुख शान्तिरिष्टा सदैव प्रथेत ।
सदा स्याच्च यूना सुदृष्टि प्रकर्षे
गुणोच्छ्रायकार्ये समष्टेर्हिताय ॥

(१७)

यथाऽऽलस्यलेशो न व्याघातकारी
भवेत् तादृशो मार्ग एवावलम्ब्य ।
क्रियाशीलकत्व महत्त्वाभिधान
क्रियारोध एवात्मघाताभिधेय ॥

(१८)

प्रवृत्तिर्नराणा भवेद् राष्ट्रकार्ये
रुचि स्याज्जनाना सुधारे विकासे ।
जनैराश्रित स्यात्तु मार्गं प्रशस्त
सुखोदर्क एवास्तु सर्वो विधिश्च ॥

(१९)

स्वदेशे रति सस्कृतौ सस्कृतत्व
सदा स्वाभिमान महत्त्व प्रकृष्टम् ।
सदाऽऽशाश्रयत्व निराशाक्षयश्च
गुणोत्कर्षहेतोर्मुदाऽऽधेयमेव ॥

(२०)

स्वदेशस्य माहात्म्यमिष्ट भवेच्चेत्
स्वदेहस्य त्यागो वर देशहेतो ।
स्वदेशाश्रया श्रीर्नृणा जीवन च
स्वदेशे समृद्धे सुख सर्वमेव ॥

१७ राष्ट्रिय कर्तव्यम्

(तोटकम्)

(१)

सुखदा वरदा भय-ताप-हरी
भव-भूति-विभूषित-सौख्यकरी ।
नव-संस्कृति-संस्कृत-संहृति-दा
भरतावनिरस्तु सदा प्रथिता ॥

(२)

नव-जागरण प्रथता भुवने
नव-दीप्ति-रुदेतु मनसु सदा ।
नव-शक्ति-समुच्चय शोभित धी
जनता जन-ताप हरी विलसेत् ॥

(३)

नहि मानवता नवता रहिता
नहि दानवता नवता-सहिता ।
नवता प्रतिपद्य समे भुवने
दनुजावलि-नाशनमस्तु कृति ॥

(४)

कृतिना कृतिरस्तु जनोद्धरण
जन-मानस-मान-समुद्धरणम् ।
नव-चेतनता तनुता नवता
सकले विकलेऽपि जने प्रमुदे ॥

(५)

युवशक्तिरिय जन-शक्ति-युता
जन-ताप-हृती लभता सुयश ।
व्यपनोद्य तमस्तति-संसरण
निज-राष्ट्र-हिते रुचिमावहताम् ॥

(६)

नहि सा भुवने कठिनाऽपि कृति
युव-शक्तिरिय न करोतु मुदा ।
जन-शिक्षणमार्थिकमुन्नयन
पतितार्त-दशोद्धरण भरणम् ॥

(७)

युवकेषु विराजत एव विभा
गुण-शक्ति-समुच्छ्रय-सकलनम् ।
मृदुता दृढता विनयावनति
गुण-सग्रहणेऽभिरुचि सुकृतौ ॥

(८)

युवका निजकर्मणि सन्तु दृढा
पर-दु ख निवारण-सक्त धिय ।
गुण गौरव शौर्य सुधा-सरसा
सरसामवनि दधता कृतिभि ॥

(९)

अबला नहि सन्त्यबला अधुना
सबला प्रबला नय-वत्म-विद ।
नव-जागरणे दधतेऽभिरुचि
नय-कर्मणि शमणि वमणि च ॥

(१०)

प्रमदा प्रमुदा मुदमादधता
निज-देश-समुद्धरणे निरता ।
विरता परदेश-परपरया
शुभ-शक्ति-समन्वित शौर्य-युता ॥

(११)

सुधियो ह्यवमत्य निज व्यसन
निजराष्ट्र-हिते सुकृते निरता ।
वर-वर्त्म-निबोधन-शक्त-धियो
विलसन्तु भवे भव-ताप-हरा ॥

(१२)

अयि शूरवरा प्रखरा प्रबला
रिपु-सहृति-नाशन-सक्त हृद ।
समरे प्रखरे च विनाश्य रिपून्
गुरु-गौरव-माप्नुत शौर्य-धना ॥

(१३)

वणिजो निज-वित्त-चय ददता
पतितात हिताय सुखाय सदा ।
मलिना सरणि परिहृत्य निजा
निज-देश-हिताय धन दधताम् ॥

(१४)

श्रमिणोऽपि श्रमे रुचिमादधत
स्व-यश प्रथयन्तु समे भुवने ।
श्रम एव समुन्नति सिद्धि-कर
श्रम एव सुकीर्तिकर सुखद ॥

(१५)

श्रम एव हित कुरुते भुवने
श्रम एव समीहितमालभते ।
श्रम एव गुणोच्छ्रयमातनुते
श्रम एव सुखौघ-समृद्धि-कर ॥

(१६)

इदमार्थिकमुन्नयन प्रसरेद्
नव-योजन-योजन-मवलितम् ।
दयनीय-दशा पतिता क्षुधिता
मुदिता हृषिता स्युरिमे सुखिता ॥

(१७)

निज-राष्ट्र-हित सतत प्रवल
निज-जीवन-दान-मपीह शुभम् ।
निज-देश-हिते मरण सुखद
निज-वित्त-समुच्चय-सन्यसनम् ॥

(१८)

विलसेद् वसुधा, विकसेद् जनता,
धन-धान्य-समुन्नतिरस्तु शुभा ।
नव-शक्ति-समुच्चय-शान्तधियो
नर-वीर-वरा विलसन्तु सदा ॥

(१९)

न विरोधकृता गतिरस्तु शुभा
नहि देशहिताय विरोध-मति ।
समवेत्य समे निज-राष्ट्र-हिते
दधता स्व-मनासि मनस्विवरा ॥

(२०)

युव-शक्ति-चये जनता हृदये
नव शक्ति-चयो विलसेत् प्रसरेत् ।
वसुधाऽस्तु सुधालय-सौख्य-करी
भरतावनिरस्तु मुदे प्रमुदे ॥

१८ राष्ट्रोद्बोधनम्

(उपजातिर्वृत्तम्)

(१)

प्रवर्तित साधु प्रशासनेन
यद् योजनाऽऽयोजनमत्र हृद्यम् ।
सर्वस्य साहाय्यमपेक्षते तद्
हृदा प्रयोज्य सुख शान्ति-हेतो ॥

(२)

राष्ट्रस्य वृद्ध्यै जनता-समृद्ध्यै
प्रवर्तित योजन-सूक्ष्म-जालम् ।
देश श्रिया श्लिष्यतु येन सद्यो
दीनार्त-लोकोद्धृति-रक्षण स्यात् ॥

(३)

उद्योगमास्थाय विकास-कार्ये
औद्योगिके वा कृपि-कार्य-जाते ।
तन्त्राश्रिते यन्त्र-समाश्रिते च
सर्वात्मना साधु प्रयत्यमेव ॥

(४)

देशस्य रक्षामधिश्रित्य सद्य
स्याज्जागरूकत्वमजस्रमेव ।
विरोधि शक्तेर्दलनेन नित्य
स्वपौरुपस्याभिनवा विवृद्धि ॥

(५)

बल निधीयेत विकास-कार्ये
समाज-कल्याण-परम्परासु ।
स्यादेकता सौख्यकरी जनेपु
विभेदलेशो न भुव स्पृशेच्च ॥

(६)

भाषाश्रित प्रान्त-समुत्थितो वा
धर्माश्रयो जाति विवर्ग-निष्ठ ।
य कोऽपि भेदो न स वृद्धिमेयात्
सर्वे वय भारत-भू-सुपुत्रा ॥

(७)

राष्ट्रस्य वृद्ध्यै नितरामपेक्ष्य
श्रम कठोरो मनुजै समस्तै ।
निर्माणमूला प्रहिता सुदृष्टि
स्यात् सर्वकार्येषु मनोबलाढ्या ॥

(८)

देशे विदेशे यदि वा कुचक्र
स्वातन्त्र्य नाशाय प्रवर्तित स्यात् ।
ध्वस्य प्रमथ्य च तदायसेन
करेण सर्वैर्दृढ निश्चयेन ॥

(९)

आचारहीनत्वमुपेक्षण च
भ्रष्टाऽऽश्रयाऽऽचार परपरा वा ।
अनैतिकत्व परशोषण च
सर्वं समाप्य निजराष्ट्र-वृद्ध्यै ॥

(१०)

शान्त्यै प्रगत्यै अवमत्य भेदान्
लोका समे सघटिता भवेयु ।
चारित्रिकी प्राप्य समुन्नति च
सर्वापराधापनय क्रियेत ॥

१९ भारतीय-जनतन्त्रोपलब्धय

(उपजातिवृत्तम्)

(१)

यल्लोकतन्त्रोद्धरणाय हृद्य
प्रक्रान्तमासीज्जनता हिताय ।
आयोजन पञ्च-सुवप मूल
साफल्यमाप्त सुख-शान्ति-वृद्ध्यै ॥

(२)

कृषेर्विकासाय नवप्रयोगै
यन्त्रैर्नवै क्रान्ति-समुद्भवोऽभूत् ।
हरिच्छद-क्रान्ति-समुन्नयार्थं
विधिर्नवो लोक मनोहरोऽभत् ॥

(३)

यत्रापि कुत्रापि कृषेस्तु योग्या
भूमिर्ह्रशोर्गोचरतामयासीत् ।
राज्येन सगृह्य तथाविधा भू
कृषौ प्रयुक्ता जनता-समृद्ध्यै ॥

(४)

ससेचनार्थं परियोजना या
युक्ता प्रयुक्ताश्च विभिन्नभागे ।
क्रान्ति कृषौ हर्ष-समुद्भवश्च
व्यलोकि लोकैर्जन-मानसेषु ॥

(५)

उद्योग-क्षेत्रे नव-पारपत्र-[१]
प्रदान-कायस्य विधि ऋजूकृत ।
येनात्म-नैर्भर्य-समाश्रयेण
विकास-कार्य-प्रगति प्ररुढा ॥

---

१ लाइसेन्स ।

(६)

भाषाश्रित प्रान्त-समुत्थितो वा
धर्माश्रयो जाति विवर्ग-निष्ठ ।
य कोऽपि भेदो न स वृद्धिमेयात्
सर्वे वय भारत-भू-सुपुत्रा ॥

(७)

राष्ट्रस्य वृद्ध्यै नितरामपेक्ष्य
श्रम कठोरो मनुजै समस्तै ।
निर्माणमूला प्रहिता सुदृष्टि
स्यात् सर्वकार्येषु मनोबलाढ्या ॥

(८)

देशे विदेशे यदि वा कुचक्र
स्वातन्त्र्य-नाशाय प्रवर्तित स्यात् ।
ध्वस्य प्रमथ्य च तदायसेन
करेण सर्वैदृढ निश्चयेन ॥

(९)

आचारहीनत्वमुपेक्षण च
भ्रष्टाऽऽश्रयाऽऽचार परपरा वा ।
अनैतिकत्व परशोषण च
सर्वं समाप्य निजराष्ट्र-वृद्ध्यै ॥

(१०)

शान्त्यै प्रगत्यै अवमत्य भेदान्
लोका समे सघटिता भवेयु ।
चारित्रिकी प्राप्य समुन्नति च
सर्वापराधापनय क्रियेत ॥

१९ भारतीय-जनतन्त्रोपलब्धय

(उपजातिर्वृत्तम्)

(१)

यल्लोकतन्त्रोद्धरणाय हृद्य
प्रक्रान्तमासीज्जनता-हिताय ।
आयोजन पञ्च-सुवर्ष-मूल
साफल्यमाप्त सुख-शान्ति-वृद्ध्यै ॥

(२)

कृषेर्विकासाय नवप्रयोगै
यन्त्रैर्नवै क्रान्ति-समुद्भवोऽभूत् ।
हरिच्छद-क्रान्ति-समुन्नयार्थं
विधिर्नवो लोक-मनोहरोऽभूत् ॥

(३)

यत्रापि कुत्रापि कृषेस्तु योग्या
भूमिर्दृशोर्गोचरतामयासीत् ।
राज्येन सगृह्य तथाविधा भू
कृषौ प्रयुक्ता जनता-समृद्ध्यै ॥

(४)

ससेचनार्थं परियोजना या
युक्ता प्रयुक्ताश्च विभिन्नभागे ।
क्रान्ति कृषौ हर्ष-समुद्भवश्च
व्यलोकि लोकैजन-मानसेषु ॥

(५)

उद्योग-क्षेत्रे नव-पारपत्र-[१]
प्रदान-कायस्य विधि ऋजूकृत ।
येनात्म-नैर्भय-समाश्रयेण
विकास-काय-प्रगति प्ररूढा ॥

---

१ लाइसेन्स ।

(६)

यच्चार्यभट्टो गगने चकासन्
भूपग्रहो भाति श्रयन् सुकीर्तिम् ।
स भारतीयाय-जनस्य लोके
वैज्ञानिकीमुन्नतिमातनोति ॥

(७)

यद् भारतीयै परमाणु अस्त्र-
परीक्षणे या कृतिता त्वदर्शि ।
वैज्ञानिकाना गरिमाणमेतद्
लोकत्रयेऽपि प्रथयत्यजस्रम् ॥

(८)

विद्युद्गृहाणामणु चालिताना
सस्थापन भारत-गौरवाय ।
फ्रिगेट-नाम्ना जल-पोतकाना
निर्माणमिष्टा श्रियमादधाति ॥

(९)

औद्योगिकं प्रापयितु विकास
सयन्त्रकाणीह प्रवर्तितानि ।
सलौह[१]-वृद्ध्यै परिशोधनार्थं
तैलस्य, चैवोवरकस्य देशे ॥

(१०)

या चाप्यपूर्वा समुपागता श्री
भव्य नव भारतवर्षमेतत् ।
यङ्गाहवे पाक-चमू दलन्त
स्थले जले व्योम्नि च सर्वतोऽपि ॥

(११)

पार्कविपाको युधि यश्च लब्ध
स्वक्रूर कृत्यस्य नृशसताया ।
पैशाचिक चार्चरित जघन्य
कृत्य फल तत् तनुतेऽनुरूपम् ॥

(१२)

वङ्गीय-बाला वनिता नराश्च
सपीडिता शान्तिलव न भेजु ।
अवाप्य ते भारत-भू-सुसख्य
स्वातन्त्र्यमाप्ता विनयावनम्रा ॥

(१३)

लक्षाधिका पाकचमूचरा ये
योधा गृहीता विवशा विवर्णा ।
लब्ध्र फल तैर्निज-धृष्टताया
ते चान्वभूवन् नरक पृथिव्याम् ॥

(१४)

यश्चापि सधि शिमला-प्रदेशे
देश-द्वयेऽभूद् जनता-हिताय ।
आश्रित्य त भारत-पाक-देशौ
सबन्ध-सामान्यमुपागत च ॥

(१५)

आहृत्य लोकस्य विचार-जात
प्रान्ता नवीना विहिताश्च केचित् ।
मेघालयश्च अरुणाचलश्च
मणेपुर च त्रिपुराभिधान ॥

(१६)

सचिन्त्य देशैक्यमवेक्ष्य नीतिं
राज्यं गृहीतं सिक्खिमाभिधानम् ।
सम्प्रेक्ष्य चैव जनता-मतं तु
अभूदिदं भारत-भूमि-भागम् ॥

(१७)

यल्लोकतन्त्र, निरपक्षिता च
धर्मे, व्यवस्था विनियोजिताऽर्थे ।
सामाजिकी स्यात् प्रगति प्ररूढा
सैवाऽऽश्रिता नीतिरदक्षभावात् ॥

(१८)

शान्ति स्वदेशे, प्रगतिर्विकासे,
मैत्री विदेशे, करुणाऽऽर्तदेशे ।
निर्भीकताऽऽजौ, विमतिर्विरोधे,
सर्वोदया नीतिरुपास्यते च ॥

(१९)

अर्थ-व्यवस्था सुविरूढ-मूला
कर्तुं श्रिता नीतिरुदार-भावा ।
लोकाश्रयोद्योग-परम्पराणाम्
अग्रेसरत्वं प्रतिपादितं च ॥

(२०)

राष्ट्रीकृता केचन लब्धवर्णा
उद्योगजाता नृहितं समीक्ष्य ।
समाश्रिता च सुविधा समस्ता
राज्ञा समत्व प्रतिपादनायम् ॥

(२१)

अवर्षणादे कृपि-कार्य-जाते
रुद्धो विकासो जन शोपणाय ।
हरिच्छद-क्रान्तिमुपास्य सर्वो
रोघोऽवरुद्ध कृपकार्य सिद्ध्यै ॥

(२२)

मुद्रा-गत-स्फीति निवारणार्थं
समाश्रिताश्च वहवो ह्युपाया ।
साफल्य-लाभाद् जनता-मन मु
विश्वास-भावोदय-वृद्धिरासीत् ॥

(२३)

उद्योग-कृत्ये कृपि-कार्य-जाते
निरन्तर वृद्धिमुपैति राष्ट्रम् ।
प्रवर्तिते योजन-कार्य-जाते
व्यलोकि लोकैरुदय समस्तै ॥

(२४)

कठोर-दण्डाश्रयणेन राष्ट्रे
विलोक्यते सयम-वृद्धिरिष्टा ।
शान्तिर्व्यवस्था स्वनुशासन च
तापार्त-लोके धृतिमादधाति ॥

(२५)

उन्मूलितास्ते ऋणजाश्च वन्धा
प्रणाशित शोपित-शोपण च ।
दीनार्त-लोकोद्धरण समीक्ष्य
भूमि प्रदिष्टा सुख-वास-हेतो ॥

(२६)

आक्रामका येऽविरत यतन्ते
देशा अशेषा अहित निरीक्ष्य ।
तेषा विमर्दार्थमभीष्ट-साधनी
नृ-वाहिनी सिंह-सम-क्रमाऽऽस्ते ॥

(२७)

सचार कार्ये विपुला विवृद्धि
इष्टा विशिष्टा प्रगति तनोति ।
दूरेक्षणे दूर-प्रभाषणे च
समुन्नति कस्य मुद न धत्ते ॥

(२८)

ग्रामेषु पुर्यां नगरेषु चैव
चिकित्सकाना भिषजा नियुक्ति ।
आरोग्य-हेतोर्नव-यन्त्र-वृद्धि
शय्या-विवृद्धिश्च हित तनोति ॥

(२९)

शिक्षा-प्रसाराय प्रवर्तिताश्च
राज्येषु नूत्ना विविधा ह्युपाया ।
शुल्क-प्रमुक्ति-र्बुक-बैंक-युक्ति
प्रोत्साहनार्थं बहु-छात्रवृत्ति ॥

(३०)

स्त्रीणा च यूना च हिताय प्रेष्ठा
कार्यक्रमा शासन-दिष्ट-रूपा ।
एव प्रदृष्टा नव-योजनान्ते
समुन्नति सर्व दिगाश्रया सा ॥

२० नवयोजना-साफल्यम्

(द्रुतविलम्बितम्)

(१)

सुखद-सिद्धिकर नवयोजन
दिशतु भारत-भू-वलये सुखम् ।
अनुदिन जनता जन-ताप-हृ
स्वकृतिमिश्च समर्थनमेधयेत् ॥

(२)

इदमभेद्य-तमस्तति-नाशक
दुरित-दुष्कृत-दैन्य-निवारकम् ।
सुकृत शान्ति-सुधारस-वर्षक
जयतु सन्ततमेव नियोजनम् ॥

(३)

वसन-भोजन-पेय-समुच्चयो
भवन-भूति-निवास-सुखोच्चय ।
कृपि-समुन्नति-राष्ट्र-गुणोच्छ्रयो
वसतु भारत-भू-जनताऽऽलये ॥

(४)

नव-नवोद्यम-शक्ति-प्रदोद्यमोऽ-
नवरत वसु वृद्धि-कर श्रम ।
सततमात्म हिताय श्रमाश्रयो
दिशति शम सुखौघ समेधितम् ॥

(५)

कृपिकृतौ नलकूप-समाश्रय
प्रतिदिश तनुते कृपि-वर्धनम् ।
हरितिमा हरते कृपकाऽऽवले
सकल-दु खतति सुख-साधनै ॥

(६)

भवन-हीन-जनैर्भवन कृतम्
अवनि-हीन-नरैरवनि श्रिता ।
वसन-हीन-नृभिर्वसन धृत
कृषि-विहीन-नरै कृषिभूर्वृता ॥

(७)

प्रतिदिश नगरेषु सुखोच्चय
प्रतिपद सुषमा श्रमिणा गृहे ।
भवन भोजन-सौख्य समुच्चयो
वसन वास-सुख तनुते हितम् ॥

(८)

नव-विधान-समाश्रयणेन यद्
हितमिद विहित हित काम्यया ।
ऋणज-बन्धन-ग्रस्त-जनावलि
सुखद-मुक्तिमहो लभतेतराम् ॥

(९)

धनिवरा धन सग्रहमेव ये
हितधिया व्यदधुर्दुरितावहम् ।
सकलमेव तु तद्धन-सग्रहम्
अपहृत्त नृ-हिताय प्रशासकै ॥

(१०)

निखिल-ग्रामचयेऽद्य विराजते
विपुल विद्युदुपस्कर-सग्रह ।
कृषिज धान्यततिवसनावलि
नव-विकासज-सौख्य-समुच्चय ॥

(११)

सुखविधा विविधा नगरेषु च
प्रतिपद वितनोति सुखश्रियम् ।
सरणि-नीर-प्रकाश-गृहाश्रया
कतिविधा सुविधा नहि लम्भिता ॥

(१२)

सततमद्य विलोक्यत एव यत्
प्रशमिता जन-ताप-करी क्रुति ।
वटुजने नगरे न पुरेऽपि च
क्वचिद-शान्ति-ततिस्तनुते पदम् ॥

(१३)

वटुजने विततोऽभिरुचिर्गुणे
श्रमचये रुचिरा हितधी श्रिता ।
जन हिताय समाज-सुखाय ते
श्रममवेक्ष्य हित दधते शिवम् ॥

(१४)

पठन पाठन-साधन सग्रहे
हिततर्ति तनुतेऽत्र प्रशासनम् ।
वटुजनस्य च शिक्षक-सहते
दिशति शासनमद्य सुखावलिम् ॥

(१५)

गुणधि-गाधि महात्मभिराश्रिता
भरत भू-विषये रुचिरा स्थिति ।
सुखमहो स हि स्वप्न-समुच्चय
सफलतामिह याति सुखावह ॥

(१६)

प्रतिदिन यदुपैत्युपयोगिता
तदिह वस्तु नियन्त्रित-मूल्यकम् ।
न सहतेऽर्घ-विवृद्धिमथ क्वचिद्
अनय-वारण-दारुण शासनम् ॥

(१७)

कृषक-कर्मणि ये नियत रता,
धरणिमापुरिमे कृषि-कर्मणे ।
वितरतीह प्रशासन-सूत्रक
जलमल विमल वर-बीजम् ॥

(१८)

लयमुपैति कुरीति-प्रथाऽखिला
प्रशममेति दिव गमन क्षुधा ।
सुखदमेत्यनुशासन-जालकम्
उदयमेति च भारत-गौरवम् ॥

(१९)

प्रतिदिश परिवर्तनमीक्ष्यते
प्रतिगृह धन धान्य-समुच्चय ।
प्रतिजन जनता हित लालसा
प्रतिपल प्रगति सुख-साधने ॥

(२०)

वरद-योजन-कायमिद मुदे
सुख-समुन्नति शान्ति-हितावहम् ।
जन-मन सु दधद् नवचेतना
सकललोक-समर्थनमावहेत् ॥

●

२१ भारतस्य विजयोद्घोष

(उपजातिवृत्तम्)

(१)

वालप्रणाश बुधवृन्दहानि
बङ्गोद्भवाना वधमार्यनाशम् ।
दुर्वृत्तपाकैर्हृतदार-बन्धु
विलोकयन् को लभते न क्षोभम् ॥

(२)

अनार्यपाकैर्भुवि भारते यो
व्यधायि घात स्वविनाशहेतो ।
दैत्य-प्रणाशार्थमभिप्रवृत्तो
दोषाशयोऽभूत् सफलो जनौघ ॥

(३)

पाकस्य भू-व्योम-समुद्रमध्ये
कृत प्रहारो वर-भारतीयै ।
योधैस्तथा येन समग्रमेव
पाकस्थल प्राप विनाशलीलाम् ॥

(४)

सप्रेक्ष्य वीरान् वर-भारतीयान्
निराशया शत्रुप्रवीर-योधा ।
सत्यज्य शस्त्राणि गृहाणि युद्ध
भयाकुला स्वात्मसमर्पण दधु ॥

(५)

जगत् समग्र प्रविलोक्य शौर्यं
जय-ध्वनि सतनुते समोदम् ।
शौर्यप्रकर्षाहृत कीर्ति-लक्ष्मी-
विराजते भारतभूर्मनोज्ञा ॥

२२ लोकतन्त्रं जयेत्

(स्रग्विणी वृत्तम्)

(१)

लोकतन्त्रं हितं लोकतन्त्रं सुखं
लोकतन्त्राश्रया वृत्तिरिष्टा जने ।
लोकतन्त्रे जनानां समृद्धिः शुभा
लोकतन्त्रे जनानां विवृद्धिर्ध्रुवा ॥

(२)

लोकतन्त्रे जनानां मतं शासनं
लोकतन्त्रे जनानां हितं साधनम् ।
लोकतन्त्रे जनानां प्रभुत्वं मतं
लोकतन्त्रे जनानां गुरुत्वं मतम् ॥

(३)

लोकतन्त्रे क्रिया राष्ट्र-संवर्धनी
लोकतन्त्रे गतिर्गौरवाधायिनी ।
लोकतन्त्रे सृतिः सत्यनिष्ठा मता
लोकतन्त्रे धृतिः सर्व-दुःखौघहा ॥

(४)

लोकतन्त्रे न किं किं सुखं साध्यते
लोकतन्त्रे न किं गौरवं प्राप्यते ।
लोकतन्त्रे न किं मानमासाद्यते
लोकतन्त्रे न वा किं हितं लभ्यते ॥

(५)

लोकतन्त्रे न धर्मादि-भेदो मतः,
लोकतन्त्रे न जात्यादि-भेदः शुभः ।
लोकतन्त्रे न वा शोषणं संमतं
लोकतन्त्रे न हिंसा-प्रवृत्तिर्मता ॥

(६)

लोकतन्त्रे गुणा सर्व-धर्मोदयो
वर्ण-भेदो न वा वर्ग-भेदो मत ।
लोकतन्त्रे न व्यष्टेर्महत्त्व मत
लोकतन्त्रे समष्टेर्गुणा सहता ॥

(७)

लोकतन्त्रे न दैन्य न वा शोपण
क्षुत्पिपासाऽऽधि-व्याधे सदा शोपणम् ।
दीन-हीनार्त-लोकस्य सरक्षण
सस्कृतेर्रक्षण सभ्यता-रक्षणम् ॥

(८)

लोकतन्त्रे गुणा, वर्जिता सा घृणा,
लोकतन्त्रे प्रिय, वर्जिता यातना ।
लोकतन्त्रे सुख, वर्जित शोपण
लोकतन्त्रे हित, वर्जित पीडनम् ॥

(९)

लोकतन्त्रे शिव सुन्दर राजते
सत्यभावाश्रय सत्य-कर्माश्रय ।
विश्वबन्धुत्व-भावोदय सतत
विश्वशान्तेश्च क्रान्तेश्च मार्गो मत ॥

(१०)

लोकतन्त्रे तु निर्वाचन मन्यते
लोकतन्त्रे मत समत गण्यते ।
लोकतन्त्राश्रया राजनीतिर्मता
लोकतन्त्राश्रयैव व्यवस्था मता ॥

(११)

लोकतन्त्रे तु राज्य मत साधन
लोक-सौख्य सदा साध्यमेवाश्रितम् ।
व्यक्ति-स्वातन्त्र्यमेवात्र मुख्य मत
निर्णयो निग्रहो वा मतेनाऽऽस्थितम् ॥

(१२)

लोकतन्त्रे मताना महत्त्व मत
राजनीतिश्च निर्वाचने सस्थिता ।
राजतन्त्र तु निर्वाचितैश्चाल्यते
राष्ट्रसूत्र च तैरेव सधार्यते ॥

(१३)

लोकतन्त्रे विधानं सुधारो विधि,
निर्णयो निग्रहो लोक-सस्थापनम् ।
देशनीतिर्विदेशस्थ-नीति समा
लोक-निर्वाचितैरेव निर्णीयते ॥

(१४)

लोकतन्त्रेऽधिकारा समे मौलिका,
राजनीति समानाधिकाराश्रया ।
बन्धुता मित्रता स्निग्धता सश्रिता,
भ्रातृभावोदय सौरय सचारक ॥

(१५)

ग्राम-पञ्चायतताना दृढा मस्थिति
मण्डलाना विभिन्नाश्च सस्था स्थिता ।
स्थानमूल स्वराज्यस्य सस्थापन
लोकतन्त्रस्य मूल मत सवत ॥

(१६)

लोकतन्त्र तु वेदादिभि स्वीकृत
विश्ववन्द्यैं सुधीभिश्च समानितम् ।
लिकनेनादृत[1] गान्धिना पोषित
विश्वशान्तेश्च सौख्यस्य मूल मतम् ॥

(१७)

लोकतन्त्रे स्थिता देशभक्तिदृढा
देशरक्षा सुरक्षा स्वराज्य शुभम् ।
देशभक्ति विना देशरक्षा विना
जीवित निष्फल निष्फल निष्फलम् ॥

(१८)

लोकतन्त्रे विकासो विलासो ध्रुव ,
आर्थिकी उन्नति मौलिकी उद्गति ।
उद्यमस्यापि पूर्ण महत्त्व मत
भाषणे लेखने चापि स्वातन्त्र्यकम् ॥

(१९)

लोकतन्त्रे स्वदेशेऽस्ति शान्तिदृढा
क्रान्तिरिष्टा मताना प्रयोगाश्रया ।
क्रान्ति-शान्त्योश्च समेलन दृश्यते
दु ख-दावाग्नि-नाशोऽत्र सस्थीयते ॥

(२०)

लोकतन्त्र सुखस्यैक-मूलं मत
लोकतन्त्र मत शान्ति-सस्थापकम् ।
लोकतन्त्र भजेत्, लोकतन्त्र श्रयेत्,
लोकतन्त्र जयेत्, लोकतन्त्र चरेत् ॥

●

---

१ अमेरिका राष्ट्रपति अब्राहम लिंकन ।

२४ गणतन्त्र-दिवसः

(गीतिका)

(१)

गणतन्त्र ! स्वागत ते,
गणतन्त्र ! स्वागत ते।
तव गौरव पुरस्तात्,
कीर्ति श्रियं तनोति ॥ गणतन्त्र० ॥

(२)

राष्ट्रोद्धृतावपूर्वां
शक्तिं तनोषि नित्यम्।
त्वद्गानमेव ज्योति,
क्रान्तेश्च दाववह्नि[1] ॥ गण० ॥

(३)

सस्मृत्य गौरव ते,
वीरा गुणानुरक्ता ।
शक्ता स्वदेश-भक्ता,
शूलिं मुदा श्रितास्ते ॥ गण० ॥

(४)

त्व देशभक्ति-भाव
समता क्रियाऽनुरागम्।
धर्मान्धता विराम
तनुषे च लोकतन्त्रम् ॥ गण० ॥

(५)

कार्ये प्रमापणे च,
स्वातन्त्र्यमेव लेखे।
स्वत्वाधिकार-रक्षा
सृष्ट त्वयैव सत्यम् ॥ गण० ॥

---

१ दावाग्नि ।

(६)

त्वा प्राप्तुमेव सत्य
शान्तैश्च क्रान्तिशीलै ।
आत्माहुति प्रदत्ता
शूलिर्वृता मुदैव ॥ गणतन्त्र० ॥

(७)

साम्राज्यवादिनस्ते,
त्वा वीक्ष्य भीतभीता ।
कृत्यैर्निजैजघन्यै,
भस्मान्तभावमाप्ता ॥ गणतन्त्र० ॥

(८)

सपूर्ण-शक्ति-युक्त
लब्ध तु भारतीयै ।
गणतन्त्रमेतदेव
क्रान्ति तनोतु लोके ॥ गणतन्त्र० ॥

(९)

गुण-गौरवाभिवृद्धि,
धन-धान्य-सौख्य वृद्धिम् ।
सद्भाव-स्नेह-वृद्धि
सिद्धि तनोतु सद्य ॥ गणतन्त्र० ॥

(१०)

त्वद्रक्षणेऽनुरक्ता,
भक्त्यार्पिताऽऽत्मदेहा ।
क्रान्तेर्दवाग्नि-दूता
कुर्वन्तु देश-स्वर्गम् ॥ गणतन्त्र० ॥

●

२५ राष्ट्र-सन्देशः

(गीतिका) (प्रमाणिका वृत्तम्)

(१)

विकासता प्रकाशता
स्वदेश एप राजताम् ।
ज्वलत्प्रताप-रोचिषा
दिगन्त-व्याप्त-कीर्तिभाक् ॥ विकासता० ॥

(२)

स्फुरद्-दहत् त्विपा दहेद्,
अराति-वृन्द-वाहिनीम् ।
स्वतन्त्र देश-भारतो
विभा-रतो विभासताम् ॥ विकासता० ॥

(३)

धरा प्रपीडिता रुपा,
समस्त-आङ्ग्ल शासके ।
हृता मृतेव चोज्झिता
न सान्त्वना-ध्वनि श्रुत ॥ विकासता० ॥

(४)

विदेश-चोर-लुण्ठके,
चिराय तापिता मही ।
स्वदेश-वीरमात्मज
स्व-रक्षण प्रयाचते ॥ विकासता० ॥

(५)

नहीदृश क्वचित् सुख
यथा स्वमातृ-तर्पणम् ।
स्वमातृभूमि रक्षण
स्वदेश शक्ति-पोपणम् ॥ विकासता० ॥

(६)

स्वदेश-बन्धु-पोषणं
स्व-राष्ट्र-शत्रु-शोषणम् ।
स्वमातृभूमि-तोषणं
सदा सुखं मुदावहम् ॥ विकासता० ॥

(७)

यदीष्टमात्म गौरवं
स्वदेश-मान-रक्षणम् ।
स्वदेश-केतु-सारणं
तदा भजस्व मातरम् ॥ विकासता० ॥

(८)

उपास्य क्रान्ति-पद्धतिम्
अपास्य दोष-सहृतिम् ।
निरस्य दैन्य-दानवीं
सृतिं श्रयस्व मानवीम् ॥ विकासता० ॥

(९)

श्रमाश्रया सृतिः शुभा
गुणावहा मतिः शुभा ।
गतिः शुभा सुखावहा
कृतिः शुभा मुदावहा ॥ विकासता० ॥

(१०)

स्व-जीवनं समर्प्यतां
स्वमातरं च रक्ष्यताम् ।
स्व-भारतं प्रपोष्यतां
हुतात्मनश्च तोष्यताम् ॥ विकासता० ॥

२६ क्रान्ति-गीतम्

(गीतिका) (स्रग्विणी वृत्तम)

(१)

क्रान्तिगीत भजध्व भजध्व सखे ।
क्रान्तिमार्गं श्रयध्व श्रयध्व सखे ।
क्रान्ति-गीतामृत पीयता पीयता
देशहेतोर्मुदा जीवन दीयताम् ।।क्रान्ति०।।

(२)

पालिता पोषिता वर्धिता लालिता ,
मातृभूम्या स्वरक्तार्चितास्तोषिता ।
दुष्ट-दैत्यैर्हृता शोषिता पीडिता
क्लेश-घातेन दु खेन सपीडिता ।।क्रान्ति०।।

(३)

धर्म एषोऽस्ति मातु सदा रक्षणे
प्राणदान मुदा सश्रयध्व सखे ।
पासुभि पूतपूतैर्विवृद्धि गता ,
रक्षणीया सदा प्राणदानेन सा ।।क्रान्ति०।।

(४)

क्रान्तिवह्नि समन्ताच्चरेद् भारते
क्षोभ-दावाग्नि-दाहो दहेज्जीवनम् ।
लोभ-कामादि-कीटाणु-नाशो भवेत्
स्वायनाशोऽस्तु दैन्याऽघिनाशो भवेत् ।।क्रान्ति०।।

(५)

जागृति सचरेत्, क्रोधवह्नि सरेद्,
मातृ-दु खाग्नि-दाहो जने सचरेत् ।
व्योममाला प्रसर्पेत् स्फुलिङ्गान् सदा
जीवने क्षोभमाला प्रवृद्धि व्रजेत् ।।क्रान्ति०।।

(६)

त्रायता त्रायता रक्ष्यता रक्ष्यता
मातृभूमिहृता हीनवृत्तैरियम् ।
त्रास-शोकेन सततग्लाना सदा
रक्षण याचते स्व-सुपुत्रानियम् ।।क्रान्ति०।।

(७)

क्रान्ति-मन्त्रोदय स्यात् समन्तात् शुभ,
क्रान्ति दावाग्नि-दाहश्चरेज्जीवने ।
शोक-शोष प्रणाशो न यावद् भवेद्
मातृपादेर्ऽपित स्यान्निज जीवनम् ।।क्रान्ति०।।

(८)

शत्रुनाशो भवेद्, दैत्यनाशो भवेत्,
तापनाशो भवेत्, शोष-नाशो भवेत् ।
स्वार्थलिप्सा-पर कीट-मृत्यु व्रजेद्
देशद्रोही न देशेऽवशिष्टो भवेत् ।।क्रान्ति०।।

(९)

ये तु विश्वासघाता[१] नरा भारते
क्रान्ति-वह्नौ समे ते लय प्राप्नुयु ।
देशद्रोही न क्षम्य कदाचिद् भवे
देश-विश्वास-घाती च घात्य सदा ।।क्रान्ति०।।

(१०)

क्रान्तिगान चरेत्, क्रान्तिगान सरेत्,
क्रान्तिगान लसेत्, क्रान्तिगान फलेत् ।
क्रान्तिगान मत शान्ति-मूल सदा
क्रान्तिगान तु देशस्य सौभाग्यदम् ।।क्रान्ति०।।

●

---

१ विश्वासघातिन ।

२७ सत्याग्रह

(गीतिका) (मात्रासमक जाति)

(१)

सत्याग्रह इति शस्त्रमुदार
दीन-हीन-भय-दारकमस्त्रम् ।
देश-शत्रु समर्दन-युक्ति
आङ्ग्ल-राज्य-सहारक-शक्ति ॥ सत्या० ॥

(२)

सत्य-निष्ठता, सत्य-श्रेष्ठता,
सत्य-प्रेष्ठता, सत्या वाणी ।
सत्य-कर्मता, सत्य धर्मता,
सत्याग्रह इति सत्य-चित्तता ॥ सत्या० ॥

(३)

सत्याग्रह इति 'सत्य' ज्योति ,
'शिव'-मिति लोक-क्षेम-सपुष्टि ।
'सुन्दर'-मिति जन-मानस-तुष्टि
'सत्य शिव सुन्दर' सिद्धि ॥ सत्या० ॥

(४)

आत्मशक्ति-सपोषण-मन्त्र ,
ग्लानि-दोष-सशोषण-यन्त्रम् ।
शोक-शोष-परिशोषण-तन्त्र
पराधीनता पाश-लविन्नम्[१] ॥ सत्या० ॥

(५)

सत्याग्रह इति परमा शक्ति
शौर्य-धैर्य-गुण-भवन्यनुरक्ति ।
पराधीनता-पाप निवृत्ति
स्वातन्त्र्यामृत-पान-प्रवृत्ति ॥ सत्या० ॥

---

१ छेदनम्, छुरिका ।

(६)

सत्याग्रह इति परमा बुद्धि ,
गुण-गण-वृद्धिर्मानस-शुद्धि ।
परद्रोहाद् विरतिर्गुण-राग
सत्य-रक्षणे जीवन-त्याग ॥ सत्या० ॥

(७)

सत्याग्रह इति पावन-शस्त्रम्
अरि-दल-दलन-सुदर्शन-चक्रम् ।
जीवन-ज्योति , शुचिता-तन्त्र
देश-समृद्धि शान्ति-सुख-मन्त्रम् ॥ सत्या० ॥

(८)

सत्याग्रह इति वीर-विभूति ,
घोर-शूर-जन-रक्षक-हेति ।
त्याग-तपोवल-गौरव-भूति ,
मानसशक्ति-मान-धन-सूति ॥ सत्या० ॥

(९)

सत्याग्रह इति शक्ति-संग्रह ,
रोष-दोष मद-मोह-निग्रह ।
भारतभूमि-पाश-भय-नाश ,
स्वातन्त्र्यामृत-विरचित-हास ॥ सत्या० ॥

(१०)

सत्ये सुखद सदा आग्रह ,
गाधि-वर्णितो दैन्य निग्रह ।
भारत-शक्ति, भारत-शस्त्र,
शत्रु-सैन्य-दल-नाशकमस्त्रम् ॥ सत्या० ॥

●

(६)

न ह्यत्र जात्यादि-विभेद-भावो
न वर्णभेदो न च वर्ग-भेद ।
अस्पृश्यता नात्र न चोच्च-नीच
सर्वे समाना परमेश-पुत्रा ॥

(७)

सार्वाङ्गिको ह्यत्र विकास-भाव
समाज-शुद्धिर्जनता विशुद्धि ।
शान्तिर्व्यवस्था ह्यनुशासन च
देशे विदेशे सकले समाजे ॥

(८)

आध्यात्मिक मूल्यमिहास्ति मुख्य
श्रमो वचो वा कृतिरस्ति तुल्या ।
न वृत्ति-भेदाश्रय उच्च-नीच
सर्वाऽपि वृत्ति सममेव मान्या ॥

(९)

व्यष्टेर्हित चास्ति समष्टि-निष्ठ
श्रम प्रधान श्रमजो विकास ।
श्रमाऽऽश्रया वृत्तिरदोण-भावा
श्रमाऽऽश्रया देश-समाज-वृद्धि ॥

(१०)

सत्यज्य हिंसा पर-शोषणानृतम्
अहिंसया सत्य-समाज-पुष्टि ।
समत्व-भावो वसुधा-कुटुम्बकं
सर्वोदयस्यास्ति मत पवित्रम् ॥

२९ वसुधैव कुटुम्बकम्

(गीतिका) (स्रग्विणी वृत्तम्)

(१)

विश्वबन्धुत्व-मन्त्र सदा गीयता
विश्व कल्याण-भाव सदा धीयताम् ।
लोक-कल्याण-भावामृत पीयता
लोक-शोकाऽऽधि-तापावलि क्षीयताम् ॥ विश्व० ॥

(२)

स्वार्थमूल मत दीन-सतापन
शोक-मोहादि-मूल मत नाशनम् ।
स्वार्थ एवास्ति लोकस्य सशोषक,
क्लेश-हेतु सदा शान्ति-सरोधक ॥ विश्व० ॥

(३)

द्वेष-वुद्धि सदा ताप-सचारिणी
स्वार्थवुद्धि सदा शान्ति-सहारिणी ।
भेद-वुद्धि सदा स्नेह-सवारिणी
लोभ-वुद्धि सदा दु ख-ससारिणी ॥ विश्व० ॥

(४)

विश्वशान्ते समस्याऽस्ति घोराऽधुना,
राष्ट्रसघ समाधातुकाम सदा ।
विश्वशान्ति विना नास्ति लोके सुख
नैव दु खाऽऽधि व्याधेश्च सहारणम् ॥ विश्व० ॥

(५)

रागद्वेषावविश्वास-भावोदयो
देश-सशोषण राष्ट्र सहारणम् ।
स्वार्थसिद्ध्यै परस्यापि सशोषण
विश्वशान्तेस्तु सस्थापने रोधकम् ॥ विश्व० ॥

(६)

विश्वबन्धुत्व-भावोदय सौख्यद ,
विश्व-कल्याण भाव सदा मोदद ।
विश्वबन्धुत्व-भावेन शान्ते सुधा
भ्रातृभावोदय स्नेह-भावोद्गम ॥ विश्व० ॥

(७)

प्रेममूला सदा सपद सौख्यदा ,
द्वेषमूला सदैवाऽऽपदो दु खदा ।
द्वेषनाशो नृणा सौख्य-सचारक ,
शान्ति-सस्थापको राष्ट्र-क्षेमावह ॥ विश्व० ॥

(८)

वेद-शास्त्रेषु बन्धुत्व भावोद्गम ,
सर्वधर्मेषु बन्धुत्व-भावाऽऽश्रय ।
सार्वभौमा यमा [१] शान्ति-सस्थापका ,
स्नेहदा सौख्यदा भ्रातृभावोदया ॥ विश्व० ॥

(९)

यत्र जागर्ति बन्धुत्व-भावावलि ,
स्नेह-भावोदयो दीन-सरक्षणम् ।
ताप-नाश क्षुधादेश्च सवारण
तत्र शान्तिव्यवस्थोन्नति सपद ॥ विश्व० ॥

(१०)

विश्वबन्धुत्व-मन्त्र सदा श्रेयसे
विश्वबन्धुत्व शक्ति सदा प्रेयसे ।
विश्वशान्त्यै समृद्ध्यै सदा सपदे
विश्वबन्धुत्व-भावोद्गति समुदे ॥ विश्व० ॥

●

---

१ अहिंसा-सत्यास्तेय-ब्रह्मचर्यापरिग्रहा यमा ।

३० हुतात्मान

(उपजातिवृत्तम्)

(१)

गायन्तु लोका बलिदान-गान
गायन्तु क्रान्तेश्चरित पवित्रम् ।
हुतात्मना कीर्ति-सुधा पविना
निपीय देशव्रतमाश्रयन्तु ॥

(२)

न व्यर्थमेयाद् बलिदान-रक्त
नाऽऽत्माहुते क्रान्तिफल विनश्येत् ।
क्रान्ते सुवृक्ष सुषमा-समृद्ध
पुष्पै फलै पुष्टिमियादजस्रम् ॥

(३)

हुतात्मना पावनमत्र वृत्त
सुधा-रस जीवन ज्योतिरेव ।
देशाभिमान निज-देश-कीर्ति
स्वातन्त्र्य-भाव प्रथयत्यजस्रम् ॥

(४)

हुतात्मना यत्र वृता सपर्या[1],
गुणार्चन कीर्तनमेव नित्यम् ।
तत्रैव शान्ति सुख-वृद्धिरिष्टा
देशोन्नतिर्गौरव-मान वृद्धि ॥

(५)

यस्मिस्तु देशे बलिदान-भावो
व्याप्त समाजे युव-नेतृ-वर्गे ।
तत्रैव कीर्तिर्निज-देश-वृद्धि,
आत्माभिमान गुण-गौरवर्द्धि ॥

---

१ पूजा ।

(६)

हुतात्म-वृत्त ज्वलितो दवाग्नि,
हुतात्म-वृत्त परम च ज्योति ।
हुतात्म-वृत्त जनता प्रबोध,
हुतात्म-वृत्त निज-देश-कीर्ति ॥

(७)

यदा यदा देश-समृद्धि नाश,
स्वातन्त्र्य-नाशो जन-शोषण च ।
तदा तदा देश-स्वतन्त्रतार्थं
हुतात्मनामन शुभोऽवतार ॥

(८)

हुतात्म-ज्योतिर्जन-शक्ति-दातृ
हुतात्म ज्योत्स्ना भय-ताप-मुक्ति ।
हुतात्म शक्तिर्निज-देश-शक्ति
हुतात्म-भक्तिर्निज-देश-भक्ति ॥

(९)

ये शूरवीरा बलिदान भावा,
देशार्थं सत्यक्त-समस्त-वित्ता ।
त एव देशोद्धरणे प्रवृत्ता,
मातुर्भुव क्लेश-र्तात हरन्ति ॥

(१०)

ते क्रान्ति-निष्ठा जनताऽभिनन्द्या,
देशार्पिता देश-समाज-वन्द्या ।
देशस्य स्वातन्त्र्य दवाग्नि-दग्धा,
त एव वीरा अमरा सुराश्च ॥

३१ राष्ट्र-प्रहरी

(गीतिका) (भुजगप्रयातवृत्तम्)

(१)

अये राष्ट्रयोधा ! अये वीरवर्या !
अये छात्र-सघर्ष-सेनाऽधिनाया ।
सदा सावधाना सदा दत्तचित्ता
स्वदेशस्य रक्षा-कृतौ जागरूका ॥ अये० ॥

(२)

इमे स्वार्थलीना नरा वित्तलुब्धा,
निजा स्वार्थसिद्धि वर मन्यमाना ।
जनाना सदा शोषणे लीनचित्ता,
नरा पामरास्ते सदा ताडनीया ॥ अये० ॥

(३)

धन देशहेतोर्न स्वार्थस्य सिद्ध्यै
तनुर्देशहेतोर्न भोगोपभुक्त्यै ।
कृतिर्देशहेतोर्न त्रासस्य वृद्ध्यै
मनो देश चिन्ता निमग्न न स्वैरम् ॥ अये० ॥

(४)

इमे पापलीनाश्चरित्रेण हीना,
सदोत्कोचजीवा[१] मुधाऽऽहिण्डमाना[२] ।
धनैर्वा जनैर्वा स्व-स्वार्थविसक्ता,
क्रूरा ताडनीया बहिष्कार-योग्या ॥ अये० ॥

(५)

युवा नेतृवर्गोऽथवा मन्त्रिवर्यो
यदा स्वार्थमग्नश्चरित्रेण हीन ।
स्वदेशस्य द्रोही नरो दैत्यरूप
स दण्डय स वध्य स न्यक्कारपात्रम्[३] ॥ अये० ॥

---

१ अन्यायोपार्जित धन-जीविन । २ भ्राम्यत । ३ तिरस्कारयोग्य ।

(६)

न यत्रास्ति देशे विधान सुपुष्ट
न वा न्याय-दण्ड-व्यवस्था सुपुष्टा ।
न चैवाऽनुशिष्टि[१] समाजे प्रदेशे
न देशो विकासोन्नति कर्तुमर्हं ॥ अये० ॥

(७)

सदा देशभक्ते सदा जागरूके,
स्वकर्म प्रवृत्ते स्वधर्मैक-निष्ठे ।
सदा सत्यनिष्ठे स्वदेहार्पणैस्तु,
स्वदेशोन्नति शक्यते कर्तुमिष्टा ॥ अये० ॥

(८)

नरा जातिवादेऽथवा धर्मवादे,
श्रिता सम्यवादेऽथवा भूतिवादे ।
कुटुम्बाश्रया[२] हीनवृत्तापचारा,
इमे देश द्रुग्धा सदा दण्डनीया ॥ अये० ॥

(९)

इमे हीनवृत्ता सदा कर्मचोरा,
स्व-जात्यादिवादैर्विवादैक निष्ठा ।
धनस्यैव गृध्रा कुकृत्याऽऽप्तवित्ता,
सदा शासनेन क्रुधा नाशनीया ॥ अये० ॥

(१०)

अये कर्मवीरा ! स्वकर्मैक-निष्ठा,
सदा राष्ट्र-रक्षापरा जागरूका ।
भय देशज पारदेश्य कुतो वा
समग्र समाप्य स्वदेहार्पणेन ॥ अये० ॥

●

---

१ अनुशासनम् । २ स्व-कुटुम्बोन्नति-वादिन ।

३२ दलितोद्धार

(भुजगप्रयात वत्तम)

(१)

इमे बान्धवा भ्रातर प्रेमपात्र
क्षुधा हीनवित्ता क्षुधा हीनवृत्ता ।
सदा शोक-ग्रस्ता सदा दैन्य नस्ता
सदैवाऽऽयजातेस्त्विमे रत्नभूता ॥

(२)

इमे जाति-भेदेन वर्ग-प्रभेदै,
सदा पीडयमाना सदा शोष्यमाणा ।
सदोच्चावचैर्भेदभावैर्विनष्टा,
इमे पोपणीया इमे तोपणीया ॥

(३)

इय हिन्दु-जाति प्रणष्टा प्रभेदै,
सदा भेदभावै स्वय कृश्यमाना ।
न देशस्य जातेस्तु चिन्ता कदाचित्
सवर्णाऽसवर्णेपु नाऽभेद-बुद्धि ॥

(४)

इय द्वेप-वृद्धि, इय भेद वृद्धि,
इय स्पृश्यताऽस्पृश्यतायाश्च वृद्धि ।
इय चोच्च नीचाऽऽश्रया हीनवृत्ति
सदा हिन्दुजातेस्तु सहारकर्त्री ॥

(५)

दयानन्दवर्यो मुदा दीन-त्राता,
सदा हिन्दुजातेश्च प्राण-स्वरूप ।
विजातीय-लोकैर्हृतान् वीक्ष्य चैतान्
शुचाऽऽक्रान्त चित्तो न लेभे तु शान्तिम् ॥

(६)

सदा हिन्दुजातेस्तु क्षीणामवस्था
निरीक्ष्याऽवदद् धर्म-जातेरधीशान् ।
इयं भेद-वुद्धि कुठारावघात
स्वपादे, कदाचिद् धिया चिन्तनीयम् ॥

(७)

न चैते विमूढाम्तु जातेरधीशा
सदा जाति-वादान्ध प्रज्ञा-विवेका ।
न जातेर्हित जातु ते कामयन्ते
स्वधमस्य हानि न ते चिन्तयन्ति ॥

(८)

सुधीर्गान्धिवर्योऽपि हीनामवस्था
निरीक्ष्यावदद् धम धी-हीन-वित्तान् ।
इमे भ्रातरो रत्नभूताश्च जाते
समानाधिकारेण सरक्षणीया ॥

(९)

विधर्मं गतास्ते शुच कारणानि,
सृति यावनीमाङ्गली वा श्रयन्ते ।
विधर्मं श्रिता लोभ-मोहादि-हेतो,
त एवाऽऽर्य-जाति क्रुधा नाशयन्ति ॥

(१०)

अये । आर्य-जातेर्युवानो बुधाश्च
हित वाक्यमेतत् तु शृण्वन्तु स्निग्धा ।
इमे शिल्पिन कर्मिण शूद्रप्रख्या,
सदा पोषणीया सदा तोषणीया ॥

३३ श्रमदानम्

(गीतिका) (भुजगप्रयात वृत्तम्)

(१)

श्रम सौख्यमल श्रम शान्तिमूल
श्रमो दैन्यहर्ता श्रमो व्याधि हन्ता ।
श्रम साधन भुक्ति-मुक्तेरजस्त्र
श्रमो मानवाना चरित्र पवित्रम् ॥

(२)

श्रमो राजते यत्र ज्योति स्वरूप,
श्रमो भासते यत्र वह्नि-प्रकाश ।
श्रमो द्योतते यत्र भानु प्रतापो
न तत्रास्ति दैन्य न वा रोग शोक ॥

(३)

सुधादीधिति प्राणिना ताप हर्ता
खराशु-प्रभश्चित्त-चैतन्य-दाता ।
कुबेर श्रिय, शक्ररूपश्च शक्ते
श्रम सर्वदु खाऽधि-नाशैक-हेतु ॥

(४)

श्रमस्यैव दानेन नित्य विकासो
विलास प्रहास सुवास प्रकाश ।
विनोबो[1]-पदिष्ट श्रियो मूलमेतत्
स्वदेशोन्नतेर्मूलमेतत् प्रदृष्टम् ॥

(५)

श्रमस्यैव दानेन कूपा सरण्य
शुभा ग्राममार्गा घना वाटिकाश्च ।
प्रकाश-प्रबन्ध, पुरे स्वच्छता सा
वनालि प्रणालि[2] शिवा सेचनार्था ॥

---

१ आचार्य विनोबाभावे । २ नालिया निर्माणम् ।

(६)

श्रमस्यैव दानेन स्वार्थाऽवरोध
परार्थार्पण त्याग-भावोदयश्च ।
सहास्तित्व-भावाभिवृद्धि प्रमोद
क्रियाशीलकत्व जनाऽऽह्लादकत्वम् ॥

(७)

श्रमस्यैव दानेन ग्रामोन्नति स्यात्
पुराणा विकासो नराणा प्रहास ।
वनाना विवृद्धि, जलाना सुयोग
सदैवाऽऽर्थिकी उन्नतिर्वृद्धिरिष्टा ॥

(८)

श्रमस्यैव दान शुभ सौख्य-मार्ग
सदा भ्रातृ-भावोदयस्यास्ति मूलम् ।
शुभा विश्व-बन्धुत्व-भावाभिवृद्धि
सदैवोन्नतिर्मानसी दैहिकी च ॥

(९)

पुरेय सहास्तित्व-भावाऽभिसक्ति
सदा सस्थिता भारते बद्धमूला ।
श्रमो वा धन वा निज देहमेव
स्वभूनि परार्थोपयोगाय दत्ता ॥

(१०)

यदीष्टा हृदा भारतस्याऽभिवृद्धि
विकास प्रसादोऽथवा सौख्य-सिद्धि ।
श्रमस्यैव दानेन साध्य समस्त
श्रमो मूलमन्त्र सुखस्योन्नतेश्च ॥

३४ रक्तदानम्

(भुजगप्रयात वृत्तम)

(१)

इद भारत याचते रक्तदान
धरेय सदा भिक्षते देहदानम् ।
सदा पीडिता शोषिता भारती भू,
सदा तप्तगात्रा शुचा क्षीर्णकान्ति ॥

(२)

सुता येऽमुना स्वार्थ-समुग्ध चित्ता,
धनैर्गर्हितैर्गौरव कामयन्ते ।
निज स्वार्थ लिप्ता धनैकाश्रयास्ते
न मातु शुच चेतसा चिन्तयन्ति ॥

(३)

न नीचै खलैरेभिरेषा धरित्री
शुचाऽऽक्रान्त-चित्ताऽवमोक्तु तु शक्या ।
इय धीर-धुर्यैर्मुदा देहत्यागै
स्व-रक्त-प्रदानै मदा सान्त्वनीया ॥

(४)

इय शोषिनाऽऽङ्लै सदा क्रूरधीभि,
इय पीडिता पामरैर्यवनैश्च ।
इय शोष्यते भूतिवादैरजस्र
सदा धर्महीनै सदा क्रूरकृत्यै ॥

(५)

धरेय विनष्टा प्रतप्ता कुपुत्रै
खलैर्धर्महीनै सदा स्वार्थपूरै ।
न ते मातृभूमे शुच चिन्तयन्ति
नरा पामरास्ते सदा गर्हणीया ॥

(६)

न तेष्वस्ति देशोन्नते काचिदाशा
न देशाभिमान न वा देशभक्ति ।
सदा शोषणे दत्तचित्ता समे ते
नराणा भवेयु सदा कोपभाज ॥

(७)

स्वदेशे विदेशे च ये देशभक्ता ,
नरैस्तर्पिता तैर्धरा रक्तदानै ।
वलिस्ताद्दशा कीर्तिभाजा धरित्री
सदा सौख्ययुक्ता सुपुष्टा विधत्ते ॥

(८)

अये भारतीया निज कर्मजात
हृदा चिन्तयध्व तथा च कुरुध्वम् ।
इय मातृभू शाक-सन्ताप-ग्रस्ता
सदा याचते तेऽवधान समग्रम् ॥

(९)

मुदा रक्तदान मुदा वित्तदान
मुदा भूमिदान मुदा स्वार्थ-दानम् ।
मुदा आत्मत्यागो मुदा देहत्याग
स्वमातुर्हितायेप्सित सौख्यसिद्ध्यै ॥

(१०)

विना रक्तदान न सभाव्यते श्री ,
न वा शोकनाशो न दु खाऽऽधि-नाश ।
सदा रक्तदानाऽऽश्रया श्री समृद्धि
गुणाना विवृद्धि सुखाना च सिद्धि ॥

३५ दयानन्द-स्तव

(गीतिका) (प्रमाणिका वृत्तम्)

(१)

नमामि मूलशंकर
दयाऽऽकर गुणाऽऽकरम् ।
प्रभाऽऽकर सुधाऽऽकर
समस्त-लोक-भास्करम् ॥ नमामि० ॥

(२)

स्व-ज्ञान-दीप्ति-भास्वर
गुण-प्रभा-विकस्वरम् ।
स्व-योग-रोचिषाऽऽवृत
तपो-विधूत-कल्मषम् ॥ नमामि० ॥

(३)

महर्षि-वृन्द-वन्दित
श्रुतेर्निनाद-नन्दितम् ।
अनाथ-नाथमाश्रय
सदा सदार्य-सश्रयम् ॥ नमामि० ॥

(४)

भजे गुणैक-मानिन
श्रुति-प्रभैक-ध्यायिनम् ।
भवाऽब्धि-दोष-पायिन
सुखौघ-शान्ति-दायिनम् ॥ नमामि० ॥

(५)

तमोऽपह रजोऽपहम्
अजस्रमात्म-दोष-हम् ।
तप -प्रपूत-मानसम्
अनार्य-वृन्द-शासनम्[१] ॥ नमामि० ॥

---

१ नाशकम् ।

(६)

श्रये गुणोच्चयाऽऽश्रय
मनोज्ञ-भाव-सश्रयम् ।
भवाऽब्धि-दु ख-वारकम्
अशेप-दोप-हारकम् ॥ नमामि० ॥

(७)

श्रुति-स्मृति-प्रचारक
सदाऽऽर्य-वर्त्म धारकम् ।
दरिद्र-दीन-तारक
गुण-प्रभा-प्रसारकम् ॥ नमामि० ॥

(८)

त्वदङ्घ्रि-पद्म-सेवन
समस्त-शोक-शोपणम् ।
अशेप-दोप-दूपण
सुखौघ सिन्धु पोपणम् ॥ नमामि० ॥

(९)

गुणाऽऽश्रय प्रभाऽऽश्रय
समस्त-गौरवाऽऽश्रयम् ।
पराथ-त्यक्त-विग्रह[1]
त्विपा-प्रदीप्त-विग्रहम् ॥ नमामि० ॥

(१०)

नमामि लोक-लोचन
स्फुरत्प्रभा-प्ररोचनम् ।
सुधी-प्रवीर-रञ्जक
समस्त-दोप-भञ्जकम् ॥ नमामि० ॥

---

१ शरीरम् ।

३६ दयानन्द स्वामी जयति भुवने भास्कररुचि

(शिखरिणी वृत्तम)

(१)

गुणानामाधारो विदित-श्रुति शास्त्राथ-निचय,
समुद्धर्ता भर्ता पतित-जन-चित्ताऽऽर्ति-हरण ।
श्रयन्नात्मोत्सर्गं पर-हित-रत स्वार्थ-विरतो
दयानन्द स्वामी जयति भुवने भास्कर-रुचि ॥

(२)

'दयाया आनन्दो' विलसति गुणाना समुदय,
'ऋषि'-र्वेदार्थाना गहन-मननावाप्त-शुभ धी ।
श्रुतीना राद्धान्तान् विशदयति वेदार्थ विवृतौ,
सरस्वत्या स्रोतो जयति यतिवर्यो गुणनिधि ॥

(३)

अनाथाना नाथ शरणमबलाना गुणि-गुरु,
विनेता भीताना सुपथमुपनेता च सुधियाम् ।
शरण्यो दीनाना गुणि-गण-वरेण्य श्रुति-मति,
दयानन्दो योगी जयति भुवने भास्कर-रुचि ॥

(४)

प्रणेता भाष्याणा श्रुति-गदित-तत्त्वार्थ-निलयो
यति सत्यार्थं य प्रकटयति 'सत्याथ०'-सुकृतौ ।
श्रुतीना तत्त्वार्थं विशदयति 'ऋग्भाष्य'-विवृतौ
दयानन्दो वाग्मी जयति भुवने भास्कर-रुचि ॥

(५)

ऋषीणा प्रत्ना य सरणिमनुसृत्याऽऽशु विदधे
श्रुतीना शिक्षार्थं गुरुकुल-तति ज्ञान-रुचिराम् ।
विरुद्ध वेदाना तदिदमिह हेय सुपथगै,
दयानन्दो दान्तो जयति भुवने भास्कर-रुचि ॥

(६)

जगन्नेता धीर सकल-गुण-राशिर्बुध-सुहृद्,
नदीष्णो वेदाना जनहित कृत-स्वार्थ-विरह ।
अविद्याया ध्वान्त व्यगमयदिहाऽध्यात्म-सुदृशा
मुनीन्द्रो व्यारेजे सकल-सुख-सौभाग्य-सरणि ॥

(७)

समाज त्वार्याणा प्रति-नगरमस्थापयदिह,
समुन्मूल्याऽऽमूल श्रुति विपथ-पाखण्ड-निचयम् ।
सदादर्श प्राच्य भुवि विनिदधे शान्ति-सुखद
दयानन्दो धीरो जयति भुवने भास्कर-रुचि ॥

(८)

गवा रक्षा कार्या, पदमनुविधेय च सुधिया,
गुणा ग्राह्या हेया सततमशिवा दोष-निकरा ।
सदाऽऽर्याणा भाषा प्रचरतु भवे भव्य-गुण-वा,
य एव व्याचख्यौ जयति स यतिर्भास्कर-विभ ॥

(९)

जने ह्यस्पृश्यत्व नहि श्रुति-मत नापि हित-कृद्,
विजातेर्जनिश्च बहुविध-विभागो नहि हित ।
विदेशीय राज्य नहि मतिमता मान-गुण-द,
मनोज्ञ स्वातन्त्र्य निज-बलि-कृतेनापि सुखदम् ॥

(१०)

सुशिक्षा नारीणा, विविध-मत शुद्धि प्रचलयन्,
पदाऽऽक्रान्त-त्राण विदधदनिश जीवन-पणै ।
'सम लोक चाऽऽर्यं कुरुत' इति लोकानुपदिशन्,
दिव यातो जीवत्यमर इव वन्द्यो यतिवर ॥

३७ दयानन्दवीरो यतिर्भातु शश्वत्

(गीतिका) (भुजगप्रयातम्)

(१)

दयानन्दवीरो यतिर्भातु शश्वद्
गुणाना निधिर्वेद-शास्त्रोपदेष्टा ।
सदा सयमे रक्तधीर्धीर-चेता
वरेण्य शरण्यो मुनि साधुवृत्त ॥ दयानन्द० ॥

(२)

सदा देशभक्त सदा धर्मभक्त
सदा दीन-हीनाऽऽर्ति-नाशानुरक्त ।
स्वदेशव्रतो देशभक्त्येक-मूर्ति
स्वदेशाभिमानेन सदोप्तमूर्ति ॥ दयानन्द० ॥

(३)

सदा देशचिन्ता, सदाऽनाथ चिन्ता
दरिद्रातुराणा समुद्धार-चिन्ता ।
गवा योषिता दु ख-नाशस्य चिन्ता
सदा यस्य चित्ते स देवो वदान्य ॥ दयानन्द० ॥

(४)

न यस्यास्ति चित्ते भयाना विभीति
न रोषाग्नि-दाहो न वा शोक शोष [1] ।
न यत्रास्ति चिन्ता स्वदेहस्य जातु
सदा देशचिन्ता निमग्न स धन्य ॥ दयानन्द० ॥

(५)

ऋषीणा मुनीना सदाऽऽदर्श-पाना
स्ववित्तस्य दाता, स्वदेहस्य दाता ।
सदा मातृभूमे सुरक्षाऽनुरक्तो
विदेशीय धर्मे प्रहारानुरक्त ॥ दयानन्द० ॥

---

१ शोकेन शोषणम् ।

(६)

सदैवाऽऽङ्ग्लभाषा सृतिं[1] खण्डयन् स,
सदा भारतीयं मतं मण्डयन् स ।
चरित्राभिमानं सदा दर्शयन् स
स्वदेशानुरागे रतो धर्मधुर्य ॥ दयानन्द० ॥

(७)

स्वदेशीय राज्यं मतं सर्वश्रेष्ठं
विदेशीय-राज्यं सदाऽनर्थकारि ।
स्वदेशीय राज्ये सुखं शान्तिरिष्टा
सदा स्वाभिमानं विकासोन्नती च ॥ दयानन्द० ॥

(८)

कुरीतिं सदा दुःखद्वन्द्वादि-कर्त्री
कुनीतिं[2] सदा मानवाऽऽचार-हर्त्री ।
सदैवाऽन्धविश्वास मूला अनर्था
वदन् देशहेतो पपौ यो विषं च ॥ दयानन्द० ॥

(९)

सदा योषितां मान-रक्षाऽवसक्त
सदा देश-स्वातन्त्र्य-कार्यानुरक्त ।
सदा आर्य धर्म प्रचारानुरागी
विरागी व्रती विश्वबन्धुत्व-मानी ॥ दयानन्द० ॥

(१०)

मुदा दुःखजातं[3] प्रसेहे परार्थं
जहौ देशहेतो सुखं चार्थजातम् ।
सदा क्रान्ति-सन्देशदं तं नतोऽहं
सदा मातृभू दत्त चित्तं श्रितोऽहम् ॥ दयानन्द० ॥

●

१ आङ्ग्ल-भाषाम् आङ्ग्ल पद्धतिं च । २ अनीतिं, दुर्नीतिर्वा ।
३ दुःखसमूहम् ।

३९ जयतु सुभाष

(गीतिका) (मात्रासमक जाति)

(१)

जयतु सुभाषो गुणि-गण-हासो
रिपु जन-त्रासो भुवन-विलास ।
देश-भक्ति-गुण गौरव-दीप्तो
भारत-मातृ-दुःख-सतप्त ॥ जयतु० ॥

(२)

आत्मत्याग-रुचिरशुचि-विरोद्धा
आङ्ग्ल-शत्रु-सत्रासक-योद्धा ।
कुनय-प्रदर्शन शोषण-रोद्धा
मातृभूमि-सन्ताप-निरोद्धा ॥ जयतु० ॥

(३)

त्याग-तपोबल-गौरव पूर्ण
क्रान्ति-शौर्य-बल-गात-रय-तूण [१] ।
स्वाभिमान-ममता-गुण-पूर्ण
कृत-रिपु दलन-मान-मद-चूर्ण ॥ जयतु० ॥

(४)

भारत-दुःख-ताप-सतप्तो
दीन-हीन-जनताऽर्ति प्रतप्त ।
वैदेशिक-शासन-मतप्त
आत्माहुति-रतिरति-सदीप्त ॥ जयतु० ॥

(५)

क्रान्तिदूत-गरिमाऽमृत-शौण्ड [२]
शत्रु सैन्य-समदन चण्ड ।
दुष्ट-दृप्त-जन-धृत-खर-दण्ड
मातृभूमि-वरदात्मज-चण्ड [३] ॥ जयतु० ॥

---

१ त्वरितगति, २ उद्वेल्लित, उत्तेजित, मत्त । ३ वरद-पुत्र-श्रेष्ठ ।

(६)

हिन्द-सैन्य[1]-सस्थापन-शक्त ,
अनुपम धीर-कृतावनुरक्त ।
जन-सग्रह-सघर्ष-सुदक्ष ,
धृत-चितरजनदास-सुपक्ष ॥ जयतु० ॥

(७)

सदा लोकप्रिय-भारत-नेता
'नेताजी'-प्रिय-पदवी-जेता ।
अग्रगामि-दल[2]-स्थापन-कर्ता
भारत-वसुधोत्पीडन-हर्ता ॥ जयतु० ॥

(८)

आङ्ग्ल-राज्य-सहार-प्रकेतु ,
भारत-गौरव-रक्षण हेतु ।
श्रम-दम-त्याग तपोबल-युक्त ,
दैन्य-त्राम-भय सशय मुक्त ॥ जयतु० ॥

(९)

'जय हिन्दे'-ति[3] घोष-सजुष्ट ,
सेनापतिरति-गुण-गण-पुष्ट ।
भारत-जननी-शोषण-हर्ता
मातृभूमि परिपोषण-कर्ता ॥ जयतु० ॥

(१०)

सिंहशक्तिरयममृत-ज्योति ,
देशोद्धृति-हित-धृत खर-हेति[4] ।
ज्ञानपुञ्ज हे ! शक्तिपुञ्ज हे !
भारत-गौरव ! अमृतमूर्ति ॥ जयतु० ॥

---

१ 'आजाद हिन्द फौज' इत्यस्य । २ 'फावर्ड ब्लाक' इत्यस्य । ३ 'जय हिन्द' उद्घोषस्य प्रवतक । ४ तीक्ष्ण-शस्त्र-धारक ।

४० अरविन्दो विजयते

(उपजातिर्वृत्तम)

(१)

ज्ञानप्रभा-भासित-मानसं तं
सद्धर्म-धौरेयमसक्त-चित्तम् ।
अध्यात्म-पीयूष-हृताऽघवृन्दं
ज्ञानारविन्दं गुणिनं नतोऽहम् ॥

(२)

क्रान्तेः सृतिं यः समुपास्य पूर्वं
कारागृहे वासमुरीचकार ।
सन्यस्य सर्वं विभवं विरक्तो
यो योगमाधात् तमहं नमामि ॥

(३)

पाण्डीश्चरीये सुखदाश्रमे यः
तपोऽन्वतिष्ठत् मुनिवृन्द-वन्द्यः ।
स्वाध्यात्म-विज्ञान-परम्परार्थं
यः स्तूयते विश्वमुनिप्रवीरैः ॥

(४)

सदा जगद्ध्वान्त निवारणार्थं
घोरं तपो यः समुपास्त लोके ।
यज्ज्ञानज्योतिर्ज्वलतीह दिव्यं
गुणारविन्दं तमहं प्रपद्ये ॥

(५)

यद्दर्शनं ज्ञानदृशामुपास्य
मर्त्यं ह्यमर्त्यं विदधाति सद्यः ।
भवाब्धिपारोत्तरणाय सेतुं
पापारविन्दं व्रतिनं श्रयेऽहम् ॥

४१ हिमाद्रि-वैभवम् (क० श्रीबद्रीनाथ.)

(गीतिका) (मात्रासमक जाति)

(१)

जय जय जय हैमाद्रि-सुकीर्ते !
जय हे भारत-गौरव ! जय हे !
हैम-मुकुट धृत-मञ्जुल-मूर्ते !
रुचिर-हिमानी[1]-सश्रित-भूते[2] ! ॥ जय० ॥

(२)

नील-कण्ठ[3]-शिखराञ्चित-भूति ,
नर-नारायण गिरि-कृत-कान्ति ।
देवालय-सुषमा-श्रित-कीर्ति ,
ऋषि मुनि-बुध-जन-गीत-सुकीर्ति ॥ जय० ॥

(३)

ज्ञान-ज्योत्स्ना-हृत-कलि-पाप ,
शान्ति-सुधा-प्रशमित भव-ताप ।
दिव्य-चेतनोत्साह-प्रताप ,
आध्यात्मिक-शुभ शक्ति-प्रपात[4] ॥ जय० ॥

(४)

तप्त-कुण्ड-[5]-जल-गौरव-पूण ,
तप्त-वारि-हृत-दैहिक-ताप ।
अलकनन्द-[6]-जल-पावित-भूमि ,
देवभूमिरयममृत-सूति[7] ॥ जय० ॥

(५)

हिम-द्रोणि[8] जल-पात[9]-सुरम्य ,
सुरुचि-स्रोतसा कल-रव-हृद्य ।
हिम-वृष्ट्याऽऽहृत-मानस तुष्टि ,
हैम प्रभा-गरिमाऽञ्चित-सृष्टि ॥ जय० ॥

---

१ हिमसमूह (Glacier) २ ऐश्वर्य-युक्ते ! ३ नीलकण्ठगिरि । ४ निझर । ५ तप्तकुण्ड-नमक उष्णजलसरोवर । ६ अलकनन्दा सरित् । ७ सुधा-प्रद । ८ घाटी (Valley) । ९ जल-प्रपात ।

(६)

माणा-नीति-दरी[1]-धृत-शक्ति,
शत्रु-सहृति गौरव-गीति ।
वसुधारा[2]-सुप्रपात-सुशोभ,
हिममय गिरिगण-गौरव-गण्य ॥ जय० ॥

(७)

अलकनन्द-सरितो जनि-भूमि,[3]
वदरी-फल-भर-भूपित-भूमि ।
द्रुपदा पुष्ट्या अनुमित शक्ति,
शक्ति-भक्ति-गरिमाञ्चित-सिद्धि ॥ जय० ॥

(८)

सतत-पूत जल-स्रोतो-रम्य,
सुरभि-समीरण-प्रतिपल हृद्य ।
शाप-पाप-भवताप विहीन,
आधि व्याधि-सचार विहीन ॥ जय० ॥

(९)

बद्रीनाथ ऋषि-मुनि-नाथ,
सुकृत-कर्मणा प्रतिपल-साथं[4] ।
शान्ते स्थान जागृति-धाम,
विश्व शान्ति-परिपूरित-काम ॥ जय० ॥

(१०)

काष्ठ-पुष्प-फल-तरतति-रम्य,
हिममय-हिमतति-सतत-हृद्य ।
भारत-त्राता भारत-भूति
जयति हिमाद्रि गौरव-मूर्ति ॥ जय० ॥

●

---

१ नीति-माणा-नामक-दरीद्वययुक्त । २ वसुधारा-नामको दिव्य प्रपात ।
३ जन्मभूमि । ४ सहयोगी ।

४२. हिमाद्रि-वैभवम् (ख श्रीकेदारनाथः)

(गीतिका) (मात्रासमक जाति)

(१)

जय जय जय हे जय केदार ।
भारत सुषमा-गरिमाऽऽधार ।
कीर्ति सुधा ते प्रतिपल-हृद्या,
मानस-पाप-नाश-सुमनोज्ञा ॥ जय० ॥

(२)

हैम-मण्डितो हिम गिरि-शोभ ,
सतत-हिमानी-सुषमा-हृद्य ।
हिमतति-गूत-मनोरम-वेप ,
हैम-शान्ति-हृत-मानस-क्लेश ॥ जय० ॥

(३)

देवागारमिद सुपवित्र
शैव-धर्म कृत-मूर्ति-गुणोच्चम् ।
शैव-मन्दिराऽऽहूत जन-सघ
केदाराऽञ्चित-पावन-धाम ॥ जय० ॥

(४)

शिल्पकला-गरिमोच्चय-पूर्ण ,
सुन्दर-सुघटित दृपदभिराम ।
स्वण शृग-मुकुटाञ्चित-शोभ ,
भक्ति-भावना-हृत-जन-क्षोभ ॥ जय० ॥

(५)

जाति-भेद-सदूषण-हीन ,
मानस-मान मोद-मति-लीन ।
आधि-व्याधि-भय-नाश-मनोज्ञ ,
शान्ति-सुधा सचार सुहृद्य ॥ जय० ॥

(६)

मन्दाकिनि[1]-जल-वेग-सुरम्य ,
हैम-प्रपात-पात-अभिनन्द्य ।
गाधि-सरोवर[2] शोभा-रम्य ,
मन्दाकिनि-जनिभूरतिहृद्य ॥ जय० ॥

(७)

मन्दाकिनि द्रोणी[3]-शुभ-रम्य ,
देवदारु-सरलै[4]-रतिहृद्य ।
गौरीकुण्ड[5] मध्ये रम्य
तप्तजलैर्हरते जन-श्रान्तिम् ॥ जय० ॥

(८)

पुष्पाणा परितो रुचिराभा
हरति श्रम वितनोति मुद च ।
शाद्वल शोभित पूत-वनालि ,
सरिता तुङग-तरङ्ग-मनोज्ञ ॥ जय० ॥

(९)

शान्ति-मुक्ति-सन्देश-प्रदाता,
आत्मिक-शक्ति-भक्ति-मति-दाता ।
ज्ञान भानु हृत-भव-भय-शोक ,
शान्ति-सुधा-हृत-मानस-ताप ॥ जय० ॥

(१०)

विश्व शान्ति-सन्देश-सुशोभ ,
विश्वप्रेम शुभ भाव-प्रणुन्न[6] ।
जगति ज्ञान-ज्योतिर्वितनोतु
हरतु पाप भवताप-समूहम् ॥ जय० ॥

●

---

१ मन्दाकिनी नदी । २ मन्दाकिनी-नद्या उत्पत्तिस्थान गाधि-सरोवर-नामकम् । ३ घाटी (Valley) । ४ देवदार-चीढ-नामक-तरुभि । ५ केदारनाथस्य मध्येमार्गं स्थित तप्तवारियुक्त गौरीकुण्डम । ६ प्रेरित ।

४३ हिमाद्रि-वैभवम् (ग हैमकुण्ड पुष्पघाटी च)

(गीतिका) (मात्रासमक जाति)

(१)

जय जय जय हे हैम-सुकुण्ड !
सिक्ख-धम-सपूजित-रत्न !
गुरु-गोविन्द[१]-तपस्या-भूमि
लक्ष्मण-मन्दिर[२]-शोभित-भूमि ॥ जय० ॥

(२)

हैमकुण्डमिदमद्भुत-मूर्ति
हिम-गिरि-शोभित-हिममय-मूर्ति ।
हिमाच्छादित हिममय-वारि
हैम-प्रपात-पात-द्वय[३]-रम्यम् ॥ जय० ॥

(३)

घाघरियात[४] कठिने मार्गे,
स्थित सदा हैमावृत एव ।
सतत हिमानी[५]-सुषमा-हृद्य ,
गुरुद्वारा[६]ऽश्रित-गौरव-कीर्ति ॥ जय० ॥

(४)

मार्गे तत्र सोपान-सहस्र[७]
कठिन विलष्ट सतत-सदुर्गम् ।
आरुह्यैतदजस्रमुदार
कुण्ड प्राप्य शान्ति-सुखमेति ॥ जय० ॥

(५)

गुरु गोविन्दसिंह-यति-वय ,
तीव्र तप्त्वा तपसा राशिम् ।
म्लेच्छ-त्रास-जनताप हतुं
भुवमापेदे भव-भय-हर्ता ॥ जय० ॥

---

१ सिक्खगुरु श्री गुरुगोविन्दसिंह । २ जीर्णं शीण लक्ष्मणमन्दिरम् ।
३ हैम निर्झर-द्वयम । ४ घाघरिया-स्थानम । ५ ग्लेसियर (Glacier) ।
६ सिक्ख-गुरुद्वारा इति । ७ १०६७ सोपानानि ।

(६)

सिक्ख धर्म शुभ तीर्थमुदार
शौर्य-शक्ति-सचार मनोज्ञम् ।
गुरुद्वारा-दर्शित निजभक्ति,
सिक्ख-जन श्रयते त्वविरामम् ॥ जय० ॥

(७)

पावनतीर्थं प्रतिपल-रम्य
शान्ति-सद्म चिर-चिन्तन धाम ।
जगति तनोतु शान्तिमविरामम्
आत्मिक-शक्ति वितरतु लोके ॥ जय० ॥

(८)

हैमकुण्ड ! तव कीर्तिरुदारा
लोके शान्ति श्रिय वितनोतु ।
विश्वशान्ति-सन्देशमुदार्य[1]
भ्रातृभाव समता प्रययेच्च ॥ जय० ॥

(९)

पुष्प-द्रोणि[2]-रियमक्षयकीर्ति,
गन्धमादनाद्रि[3] सुविख्यात ।
कठिन हिमानी-पार[4] व्याप्ता
क्रोशद्वय सुम शोभा-राशि ॥ जय० ॥

(१०)

नैसर्गिक-सुमनोभिरभिख्या
लभते मासत्रय सुषमाढ्या ।
पुष्पद्रोणि हृत्वा खेद
कोमलभाव तनुयाच्चित्ते ॥ जय० ॥

●

---

१ उक्त्वा, प्रचाय । २ Valley of flowers ३ गन्धमादन-पर्वत ।
४ ग्लेसियरस्य अपरपारे ।

४४ ग्राम-लक्ष्मी

(गीतिका) (भुजगप्रयात वृत्तम्)

(१)

इय ग्रामलक्ष्मीर्मुद सततनोतु
इय ग्रामलक्ष्मी श्रिय सददातु ।
क्वचित् पुष्पवृद्धि क्वचित् सस्य वृद्धि
क्वचिद् धान्यपुष्टि श्रिय सतनोति ॥ इय० ॥

(२)

कृपेरुन्नतौ दत्तचित्ता समेऽपि
सदा खाद्य-योगो जलादेर्निषेक ।
क्रमोणा विनाशेन सस्यादि-वृद्धि
मुद कर्षकाणामजस्र तनोति ॥ इय० ॥

(३)

अविद्याऽन्ध-ग्रस्ता पुरा शोक-त्रस्ता
क्षुधा रोग ग्रस्ता मुधा दैन्य ध्वस्ता ।
इदानी नवैर्योजनै सगतास्ते
नव ग्राम लोका श्रिया सयुतास्ते ॥ इय० ॥

(४)

क्वचित् कूप-योगो नलाना[1] नियोग
क्वचित् कुल्यकाभिजलाना निषेक ।
क्वचित् क्षारभूमिजलैरुर्वराऽऽस्ते
क्वचित् चक्रबन्धेन[2] सस्याऽभिवृद्धि. ॥ इय० ॥

(५)

क्वचिद् योजना स्वास्थ्य वृद्धयथमिष्टा ,
रुज ग्रामजाना क्षय प्रापयन्ति ।
रुजा मृत्युयोग क्षय याति नित्य
जना स्वास्थ्य-लाभेन मोदेन हृष्टा ॥ इय० ॥

---

१ नल-कूपानाम । २ चकबन्दी प्रयागेण ।

(६)

क्वचिद् दृश्यते योजना सततैव
कुटीराश्रया वृत्ति-लाभार्थमेव ।
समे ग्रामजाता धन प्राप्य हर्षाद्
निज क्लेशजात मुदा विस्मरन्ति ॥ इय० ॥

(७)

क्वचित् प्रौढ शिक्षा क्वचिद् बाल शिक्षा
अविद्याऽन्धकार हृदो नाशयन्ति ।
अय सर्वतो ज्ञान-शिक्षा-प्रसार
शुच ग्रामजाना निहन्त्याशु घोराम् ॥ इय० ॥

(८)

पथामापणाना विकासैर्विवृद्धया
पशो पालनेनाऽर्थ-वृद्धया च ग्रामा ।
नवाऽऽविष्कृतैर्बीजजातै प्रहृष्टा
कृषेरुन्नति वीक्ष्य मोद भजन्ते ॥ इयं० ॥

(९)

विहायाऽन्ध विश्वास-मूला प्रवृत्ती
विहायाऽऽश्रय पारदेश्य[1] स्वतन्त्रा ।
जनान्दोलनेनाऽऽत्म-नैर्भर्य-वृत्त्या
मुद सश्रिता शोक-सन्ताप-मुक्ता ॥ इयं० ॥

(१०)

सुख धान्यवृद्धिर्जनाना समृद्धि
सदा साधुभावाश्रया वृत्तिरिष्टा ।
प्रिये ग्रामलोके सुख शान्तिमिष्टा
जनाना विकाम प्रमोद तनोतु ॥ इय० ॥

---

१ वैदेशिकम् आश्रय त्यक्त्वा ।

४५ कृषक

(गीतिका) (मात्रासमकजाति)

(१)

जयतु कर्षको भारत-त्राता,
अन्न-धान्य-धन जीवन-दाता ।
शान्त-साधक प्रतिपल योद्धा
कृति-तति-रक्त[1]-दोष-सशोद्धा ॥ जयतु० ॥

(२)

शीत-ग्रीष्म-भय-सशय-मुक्त ,
शक्तिशालि-वृषभ-द्वय-युक्त ।
आत्मत्यागरतिरन्न-प्रदाता,
भारत-भू-हित-जीवन-दाता ॥ जयतु० ॥

(३)

कर्मरत कृषि-कर्म-प्रवीणो
दैन्य शोक-सशोषण-क्षीण ।
लोक-रक्षको लोक शोषित ,
पौर-रक्षक पौर-भक्षित ॥ जयतु० ॥

(४)

मान-लोभ-मद-दोष-वर्जित ,
शिक्षित-शासक-वर्ग-तर्जित ।
सकल-लोक-सस्यान्न-प्रदाता
सततमभाव-दैन्य-सधाता ॥ जयतु० ॥

(५)

क्लान्ति श्रान्ति-भय-क्षोभ-विमुक्त ,
पौर शान्ति-सुख-वैभव रिक्त ।
अज्ञानान्ध-प्रसारण-युक्त ,
ज्ञान-दीधितेर्गौरव मुक्त ॥ जयतु० ॥

---

१ कार्यसमूहेऽनुरक्त ।

(६)

त्याग-तपस्या-संयम-मूर्ति ,
दु ख-द्वन्द्व-सहनाऽऽश्रित-शक्ति ।
ताप-शीत-वर्षा-भय-मुक्त ,
निज-कृषि-कर्मणि प्रतिपल-युक्त ॥ जयतु० ॥

(७)

भारत-भूमि कृषक-निर्भरा,
कृषक-पोषिता, कृषकैर्गुप्ता ।
कृषक-पोषणे भारत-पुष्टि
कृषक-पीडने भारत-पीडा ॥ जयतु० ॥

(८)

बीज-खाद्य-सुविधा तु समस्ता
भारत-ग्रामे प्रतिपदमिष्टा ।
धान्यवृद्धिरिह देश-समृद्धि ,
सस्यवृद्धिरिह गौरव-वृद्धि ॥ जयतु० ॥

(९)

ग्राम शोषण दीन-शोषण,
कृषक-शोषण भारत-दु खम् ।
कृषेरुन्नति भारत-वृद्धि ,
कृषेर्विकासो जनता-ह्रास ॥ जयतु० ॥

(१०)

कृषक-गौरव प्रतिपद रम्य
कृषक-समृद्धि भारत-वृद्धि ।
कृषक-सुरक्षा भारत-रक्षा
कृषक-विभूति भारत-भूति ॥ जयतु० ॥

४६ गीर्वाणवाणी

(गीतिका) (भुजगप्रयात वृत्तम्)

(१)

इय देववाणी सदा सेवनीया
सदा पोषणीया सदा रक्षणीया।
इय भारतश्रीरिय देशकीर्ति
इय देशवन्द्यैर्वृता वन्दनीया ॥ इय० ॥

(२)

यदीष्ट भवे भारतस्याभिवृद्धि
स्वदेशस्य कीर्ति स्वदेशस्य मानम् ।
सदाऽध्यात्म-ज्योति -प्रसारेण शान्ति ,
तदा देववाणी वुधै सेवनीया ॥ इय ॥

(३)

कथ शोभते देववाणी प्रकृष्टा
कथ राजते देववर्यै स्तुतेयम् ।
गुणाना निधान वुधाना प्रधाना
सुधीना सदा ज्ञान-विज्ञान-दात्री ॥ इय० ॥

(४)

सदा सस्कृता सस्कृतेर्मूलमन्त्र
जनै सस्तुता प्रेम-सद्भाव-दात्री ।
अघाना निहन्त्री सुधा-धाम-धर्त्री
जनाना समस्त मल नाशयित्री ॥ इय० ॥

(५)

इय भारते वद्धमूला प्रशस्ता
स्वदेशे विदेशे स्तुता विज्ञवर्यै ।
चरित्रोन्नतेर्भाव-सद्भावनाया
सदा शिक्षणे दत्तचित्ता वरेण्या ॥ इय० ॥

(६)

पराधीनता-पाश-नष्टाऽप्यनष्टा,
सदा दानवै पीडिताऽप्यक्षतेयम् ।
सुधाऽऽगार रूपा क्षुधाऽऽधार-रूपा,
गुणाऽऽकार-रूपा जनाऽऽह्लाद-रूपा ॥ इय० ॥

(७)

अजस्र गुणाऽऽधायिनी ज्ञान-मूला,
श्रुतेर्नाद-जुष्टा, प्रपुष्टाऽऽगमैश्च ।
सदाऽध्यात्म-पुष्टा, श्रिता दर्शनैश्च
वृता ज्ञान-दीप्त्या, धृता धर्मधुर्यै ॥ इय० ॥

(८)

श्रिता ज्ञानिभिर्वेद विद्योपलब्ध्यै
वृता योगिभिर्योग-ज्ञानाऽऽगमाय ।
श्रिता काव्यकारैरसाऽऽस्वाद-हेतो,
धृता नाट्यकारैर्जनाऽऽह्लाद-हेतो ॥ इय० ॥

(९)

इय शान्ति-दात्री, इय ज्ञानदात्री,
इय भारतोत्थान-तन्त्र प्रकृष्टम् ।
इय गौरवाऽऽधान-हेतु प्रकृष्ट
इय ज्ञान-ज्योति, सुविद्या प्ररोचि[१] ॥ इय० ॥

(१०)

इद सस्कृत देशबन्धस्य मूलम्,
इद देश-प्रान्तादि भेदस्य हर्तृ ।
इद भारतस्याक्षय कोषजातम्,
इद शान्ति मूल सदा पोषणीयम् ॥ इय० ॥

●

१ प्रयाग ।

४७ सस्कृत-भाषा-गरिमा

(१) (शिखरिणी)

ऋपीणामाद्याना
गहन-मननावाप्त-सुयशा,
श्रुतीना शास्त्राणा
निखिल-गुण-तत्त्वार्थ निलया।
पुरातत्त्वाऽऽधारा[1]
सकल-भव ज्ञानाब्धि-विभवा,
जयेद् देवी वाणी
त्रिभुवन-मनोज्ञा बुध प्रिया ॥

(२) (अनुष्टुप्)

दिव्या गीर्वाणवाणीय
ज्ञान-शक्ति-सुख-प्रदा।
मानसे रमता नित्य
हृदि मे सुखमावहेत् ॥

(३)

संस्कृते सुन्दर सर्वं
सस्कृते मधुर समम्।
सस्कृते ज्ञान-विज्ञान
सस्कृते सुपमा शुभा ॥

(४)

सस्कृत देवभापाऽस्ति
विदुपा च मनोरमम्।
सस्कृत जन-तापस्य
हारक परम मतम् ॥

---

१ पुरातत्त्वानुशीलनस्य आधारभूता।

(५)

देशभक्ति गुणप्रीति
शिक्षितु यदि ते मन ।
सस्कृते मन आधत्स्व
ज्ञान विज्ञान-वारिधौ ॥

(६)

सस्कृते नहि काठिन्य
यथेदमवमानितम् ।
लोक-भापा-पद प्राप्ता
विद्वद्भापेति वन्द्यते ॥

(७)

सस्कृत भारतस्यास्ति
गौरव मान-वर्धनम् ।
वेदै शास्त्रैर्युत काव्यै
गीता-रामायणादिभि ॥

(८)

सस्कृते मस्कृति पूता
राष्ट्र-गौरव-वृद्धि दा ।
ज्ञान विज्ञानमध्यात्म
शिक्षा विश्वसुखावहा ॥

४८ आदर्श-शिक्षा-पद्धतिः

(शार्दूलविक्रीडित वृत्तम्)

(१)

ज्ञानोद्रेक-प्रणाशिताखिलमला
दु खौघ-विध्वसिनी,
कर्तव्याऽऽश्रयणे प्रवृत्ति-मति-दा
दुष्कर्म-सहारिणी ।
लोकाज्ञान निवारणे धृतिमति-
विज्ञान-धी-भास्वरा,
शिक्षा स्याज्जगता हिताय नितरा
कल्याणधुक् कीर्तिदा ॥

(२)

लोकस्याऽभ्युदय तनोति सतत
नि श्रेयस शासती,
लोके ज्ञान-तप -प्रमोद-सुख-धा
दु खाऽऽधि-सहारिणी ।
सद्भावाऽऽश्रयता गता, गुणगणे
निष्ठा दधत् सात्त्विकी,
शिक्षा-पद्धतिरस्तु सर्व-जगत
क्षेमाय शान्त्यै श्रियै ॥

(३)

सा शिक्षा न, गुणोच्चय गुणिजने
नो पोपयेत् पुष्टिदा,
या नो जागरयेज्जने कृति-रति
सत्ये च निष्ठा ध्रुवाम् ।
सा शिक्षा, श्रुति-शास्त्र-बोध-निपुणा
या धर्म-वृत्ति प्रदा,
सच्चारित्र्य-प्रदान-तोषित-मन -
कामा, न कामाऽऽश्रया[१] ॥

---

१ न तु कामभावनाया आश्रयभूता ।

(४)

अज्ञानाऽन्ध-तम -प्रणोद-प्रवणा[१]
लोकोपकृत्येकदृक्[२],
पापण्डादि-निवारणैक-मतिदा
मोदावहा मानिनाम् ।
सद्वृत्तेन विवर्धिताऽखिल-गुणा
या शस्यते ज्ञानिषु,
या देहाऽऽत्म-मनो विकास-रुचिरा
शिक्षाऽस्तु सा श्रेयसे ॥

(५)

सत्याऽऽचार-विचार-शिक्षण-परा,
सार्वाङ्गिकीमुन्नति,
छात्राणा विदधद्, विवेक विनयाऽऽ-
चार-प्रचारैकधी ।
चारित्र्योन्नति-साधिका, गुणगणे
सारल्य-ससाधिका,
लोकेषु प्रचरेत् सुशिष्य-जनि-दा,[३]
शिक्षा सदा कामधुक् ॥

---

१ विनाशोन्मुखी, २ लोकोपकारस्य मुख्यत्वेन साधिका, ३ सुशिष्य-जन्मदात्री ।

४९ राष्ट्र-कुसुमाञ्जलि

(गीतिका) (मात्रासमक जाति)

(१)

कुसुमाञ्जलिरयमुपचित-भावो
देशभक्त-चरणेषु समर्प्य ।
करुणा मुदिता हृत-वर चित्तो
देशभक्ति-शुभ भाव सनाथ ॥ कुसुमा० ॥

(२)

निज-सुख-लाभ-दु ख-परिहीणै
माया-ममता-मोह विहीनै ।
मातृभूमि-गुण-गरिमाऽऽकृष्टै
वीरैर्भाग्यवती वसुधेयम् ॥ कुसुमा० ॥

(३)

येषा कृति ततिरद्य सुवासा
कोटि-कोटि-जन मानस-हासा ।
शक्ति-भक्ति-मति-बोधन-कर्त्री
तेषा जनिरिह गौरव धर्त्री ॥ कुसुमा० ॥

(४)

पाप-ताप-भय-शोषण-क्षुब्धा
राग-रोष-जनद्वेष विमुग्धा ।
देशद्रोहिभिरतिशय-क्लिष्टा
भारत-भूर्बलिवीरैस्त्राता ॥ कुसुमा० ॥

(५)

देश-दु ख-परिशोषित-गात्रा ,
भारत-दैन्य-कष्ट-सक्षुब्धा ।
स्वातन्त्र्यार्थं समर्पित-देहा ,
धन्यास्ते बलि-वीर-वदान्या ॥ कुसुमा० ॥

(६)

ताप-शोक-भय चिन्ता-मुक्ता ,
भारत-जननी-ताप-प्रतप्ता ।
देशार्पित-निज-जीवन वित्ता
धन्या क्रान्ति-सुधा-रस-स्फीता ॥ कुसुमा० ॥

(७)

येषा कृतिर्गिह जीवन-दात्री
गौरव-गाथा सुख-तति धात्री ।
स्वार्थ-नाशिकोद्‌बोधन-कर्त्री
सशय-क्लेश-भ्रान्ति भय-हर्त्री ॥ कुसुमा० ॥

(८)

येषा कीर्ति अविचल हृद्या
देशवासिभि परमभिनन्द्या ।
शक्ति प्रेरणा स्रोतोरूपा
जन-जन-मानस-मोहनरूपा ॥ कुसुमा० ॥

(९)

क्रान्तिकारिभिर्जीवनदानै ,
शान्तिपरै सर्वस्वप्रदानै ।
वीरै शौर्य-धैर्य-परिपुष्टा,
भारत-जननी गुण-गण-तुष्टा ॥ कुसुमा० ॥

(१०)

भारतमातुर्गौरव-भूता ,
देशभक्ति-गुण-पावित चित्ता ।
तेषा चरण-युग्ममभिनन्द्य
तेषा चरित सतत वन्द्यम् ॥ कुसुमा० ॥

५० जय भारत-माता (नीराजना, आरती)

(गीतिका)

(१)

जय भारत-माता
जय जय भारत माता ।
शक्ति भक्ति-सुख-दात्री,
जय भारत-माता ॥ जय० ॥

(२)

स्नेह-सुधा-रस सिक्ता,
गुण-गण-भूति-वहा ।
ऋषि-मुनि-पूजित-पादा,
गौरव-शान्ति-सुधा ॥ जय० ॥

(३)

विश्वशान्ति-उपदेष्ट्री,
ज्ञान-भानु-हृत-शोका ।
अरि-दल-दलन-सुपूता,
आत्म-त्याग-कृत-तोषा ॥ जय० ॥

(४)

जीवनदात्री सुखदा
वरदा भूतियुता ।
संसृति शोक-निरोद्घ्री,
करुणामय हृदया ॥ जय० ॥

(५)

तव चरणार्पित-देहा,
परिहृत निज शुचि-गेहा ।
क्रान्ति-सुधा रस-स्फीता,
कति न स्वर्गमुपनीता ॥ जय० ॥

(६)

क्रान्तिकारि-जन-वन्द्या,
शान्तिपरैरभिनन्द्या ।
गरिमाऽऽहृत भव-भूति,
मुक्ता-मणि-गण-सूति ॥ जय० ॥

(७)

देशभक्त बलिदाने,
परिहृत-निज-सतापे ।
अद्य शान्ति-सुख-हृष्टा
गुणि-गण-गुण-सपुष्टा ॥ जय० ॥

(८)

तव चरणामृत-पूता,
भरत-सुता रवि-रूपा ।
तव चरणे बलिदान
विदधतु वीर-वरा ॥ जय० ॥

खण्ड–२

भारतीय-क्रान्ति-वृत्तम्

५१ भारतीय-क्रान्ति-वृत्तम्

(क) १८५७ ईसवीय स्वातन्त्र्य-युद्धम्

(उपजातिर्वृत्तम्)

(१) (उपोद्घातः)

यथाऽऽङ्ग्ल-राज्य प्रथित जगत्या
यथा प्रसृत भरतावनौ च।
इद च वृत्त विदित समेषा
न विस्तर वाञ्छति वर्ण्यमेतत् ॥

(२)

क्रूर-स्वभावै कुनय-प्रवृत्तै,
स्व-स्वार्थ-सिद्धौ सतत प्रवृत्तै ।
दुष्टैस्तथाऽऽङ्ग्लै परिपीडितेय
धरा यथा स्याद् विधवेव नारी ॥

(३)

पापिष्ठमास्थाय कुकर्म-जात
गर्ह्यां समालम्ब्य सृतिं च पापै ।
तथा प्रदुग्धा भरतावनिस्तु
यथा भवेद् धान्य-धनादि-हीना ॥

(४)

निरीक्ष्य तेषा कुसृतिं प्रवीरा
स्वदेश-भक्ता कुशला युवान ।
स्वदेश-स्वातन्त्र्य-समीहयेरिता
स्व-जीवनोत्सर्ग-व्रता समीयु[1] ॥

(५)

राजन्य वर्गं सकलोऽपि देशे,
सामान्य-लोका दयनीय-भावा ।
आङ्ग्लाऽधिपाना समवेक्ष्य क्रौर्यं
समे समेता निज-तन्त्र-हेतो[2] ॥

---

१ सगता, समवेता । २ स्वतन्त्रता-हेतो ।

(६)

आङ्ग्लाऽधिपा शासन-मत्त-चित्ता
न सेहिरे भारत-वैभव तत् ।
स्व क्रौर्य क्रत्य निज शौर्य-वृत्त
विज्ञाय मोहान्ध-धियो बभूवु ॥

(७)

तदैव क्रान्तिर्जन-क्षोभ-मूला
देशे विवृद्धा जनता-बलेन ।
स्वातन्त्र्य-वातेरित क्रान्तिवह्नि,
समेऽपि देशे प्रसृत समन्तात् ॥

(८)

श्री धोधुपन्तो[1] वर-वीर-तात्या-
टोपे[2] च बाबू-कुवरश्च सिंह[3] ।
लक्ष्मीश्च बाई[4], नृप-वेणि-माधो[5]
श्री मौलवी शाह-मदुल्ल[6]-वर्या ॥

(९)

नवाब-खानश्च बहादुरोऽमी[7],
सा वीर-बेगम् हजरत् महल् च[8] ।
आङ्ग्ली चमू नाशयितु प्रवीरा,
नेतृत्व-कार्ये प्रमुदा प्रवृत्ता ॥

(१०)

इमे समेता निज-शौर्य-कृत्यै,
आङ्ग्लाऽधिपाना भयमेव तेनु ।
आङ्ग्लैमत भारत शासन तु
मक्षीयमाण मृता-प्रायमेव ॥

---

१ श्री नानासाहब धोंधुपन्त-नामा । २ सेनापति श्री तात्या टोपे ।
३ श्री बाबू कुंवरसिंह । ४ झांसी रानी श्रीमती लक्ष्मी-बाई ।
५ श्री राना बेनीमाधो । ६ मौल्वी अहमदुल्ला शाह ।
७ नवाब खान बहादुर खाँ । ८ बेगम हजरत-महल-नाम्नी ।

(११)

दौर्भाग्य ग्रस्ता सकलाऽपि क्रान्ति
न देश स्वातन्त्र्य-सुखाय जाता ।
आङ्ग्ली चमूर्नव्य-मुहेति-युक्ता
जय च लेभे जनताऽहिताय ॥

(१२)

य क्रान्ति-वह्नि प्रसृतश्च देशे
स्वातन्त्र्य-हेतोर्न स नाशमाप ।
भस्मावृतो वह्निरिवातिगुप्तो
देश समस्त ज्वलयन्निवाऽऽस्त ॥

(१३)

विचार-धारा द्विविधा प्रवृत्ता
स्वातन्त्र्य-हेतोजनता-हिताय ।
स्वातन्त्र्य-प्राप्तिर्नृपनीति-मूला[1]
सुधार-मूला च समाज-शुद्धि ॥

(१४)

केचित् प्रवृत्ता नृप-नीति-कार्ये
क्रान्त्याश्रये शान्ति-समाश्रये च ।
केचित् समाजस्य सुधार-कार्ये
स्वदेश-मानोन्नति-गौरवाय ॥

(१५)

तपस्विन केचिदिहात्र जाता
समाज धर्मोन्नति-दत्त-चित्ता ।
एभि समाजस्य सुधार-कार्ये
स्वजीवन देशहिताय दत्तम् ॥

---

१ राजनीत्याश्रया ।

(१६)

बुधाग्रणी　श्री-नृप-राममोहन[1]
श्री-केशव सेन[2]-बुधश्च वङ्गे।
लोकोद्धृतौ धार्मिक-प्रोन्नतौ च
मुदा प्रवृत्तौ जन-सग्रहे च॥

(१७)

स्वभापणैर्लेखन-कार्य-जाते
निजाभिमानोन्नति शौर्य-कृत्यम्।
समाज-शुद्धि　निज-धर्म-वृद्धि
प्रावर्तयन् ते जनता-मनःसु॥

(१८)

यतिर्दयानन्द[3]-वर　स्वदेशे
प्रासारयज्जीवन-ज्योतिरेव　।
स्वधर्म-वृद्ध्यै निज-मान-वृद्ध्यै
अस्थापयत् चाऽऽर्यसमाजमेव॥

(१९)

वेदादि-भाष्यैर्जनता प्रचारे
'सत्यार्थ'[4]-कान्त्या निजदेश-भक्त्या।
सस्थाप्य स्व गौरवमायजाते
क्रान्ते सृतिं चारुतरा व्यधत्त॥

(२०)

श्री-रामकृष्णस्य[5]　वटुर्गुणज्ञ
आनन्द-युक्तश्च विवेकनामा[6]।
देशे विदेशे　निज-देश-मानम्
अस्थापयद् भारत-गौरवं च॥

---

१ श्री राजा राममोहनराय। २ श्री केशवचन्द्रसेन। ३ श्री स्वामी दयानन्द। ४ सत्यार्थ-प्रकाश-ग्रन्थस्य। ५ श्री रामकृष्ण-परमहंस। ६ स्वामी विवेकानन्द।

(२१) (स्वातन्त्र्य-युद्धम्)

स्वाधीनताया प्रथम तु युद्ध
प्रारब्धमेतद् भरतावनौ यत् ।
तन्मूलभूत कुनय-प्रचार
स्वार्थाऽऽश्रया दुर्धर-कूट-नीति ॥

(२२)

अन्याय नीत्या सुदुराग्रहेण
दुष्टेन राज्येन कुकृत्य-जाते ।
स्वाधीनता-युद्धमिद प्रवृत्त
विदेशि-राज्योत्खननस्य हेतो ॥

(२३)

यल्लार्ड-डलहौजि[1]-कुकृत्य मूला
साम्राज्य-सस्थापन-कूटनीति ।
अन्यायमूला च स्वराज्य-हर्त्री
सक्षोभकर्त्री पप्रथेऽत्र देशे ॥

(२४)

राजन्यवर्गोऽप्यधिकार-हीन
च्युताधिकारो विवशीकृतश्च ।
झासी-सताराऽवध-राज्य-नाशात्
क्रुधाऽऽङ्ग्ल-राज्य-क्षय-हेतुरासीत् ॥

(२५)

यच्चाऽऽर्थिक शोपणमत्र वृत्तम्
उद्योग-नाशाय स्वदेशजानाम् ।
कृपीवला शिल्पि-जना समेऽपि
विक्षोभ-वह्नौ सतत प्रदग्धा ॥

(२६)

सामाजिके धार्मिक-कृत्य-जाते
आङ्ग्लै कुकृत्याऽभिनय कृतश्च।
ख्रिस्तीय धर्मस्य प्रचार हेतो
र्भापेयमाऽऽङ्ग्ली परिचालिताऽऽसीत्॥

(२७)

सैन्यप्रबन्धेऽपि विभेद-मूला
नीति श्रिता आङ्ग्ल-जनोच्चतायै।
विभेदमाश्रित्य समस्त-सैन्या
विद्रोह-कार्ये रुचिमादधुन्ते ॥

(२८)

गो-शूकरस्यैव वसाऽभिनिर्मित
यद् गोलिकाया मुखमस्ति तत्तु।
दन्तेन छेद्यमिति रोष हेतो
विद्रोहमास्थुर्यवनाऽऽर्य-योधा ॥

(२९) (श्रीमङ्गल-पाण्डेय)

तत्रैव श्री मगल-पण्डितो[१]ऽपि
बैरक्पुरे[२] सैन्य-निवास भूमौ।
सैन्याधिप ह्यूसन[३]-मत्र हत्वा
विद्रोह-कार्योद्घटना व्यधत्त ॥

(३०)

सैन्याधिपैराङ्ग्ल-चमू प्रदृष्टै
धृत स योधो वर-वीर कीर्ति ।
मूर्ति श्रितो हर्ष-भर-प्रहृष्टो
लेभे यश स्यात्तु पवित्रमेव ॥

---

१ श्री मगलपाण्डेय । २ कलिकाता-समीपस्थे बैरकपुरे । ३ सार्जेन्ट मेजर ह्यूसन-नामकम् ।

(३१) (श्रीनाना-साहब)

'नाना'-वर क्रान्ति-पवित्र-दूत
साहाय्यमाप्त्वाऽजिमुलस्य[1] योद्धु ।
सशस्त्र-क्रान्ते सुविचार्य योजना
व्यधत्त देशस्य स्वतन्त्रतायै ॥

(३२)

सम्प्रेष्य दूतान् नगरे वने च
राज्येपु सैन्येपु नरेश वर्गे ।
सम्प्रापयत् क्रान्ति-निदेशमेत
रक्तेन पद्मेन च रोटिकाभि[2] ॥

(३३)

मे-मास-त्रिंशैक[3]-तिथिर्नियुक्ता
विद्रोह वह्नेज्वलनस्य हेतो ।
सैन्यालये पौर-समुच्चये च
विद्राह-वह्नि सहसा प्रवर्त्यं ॥

(३४)

विद्रोह-वह्निर्मयराष्ट्र-क्षेत्रे[4]
व्याप्तो विदेशीय कुकृत्य हेतो ।
सघपमेत्याऽऽङ्ग्ल-प्रशासकैस्तु
शस्त्रालये भूत् क्षुभिताऽधिकार ॥

(३५)

सम्प्राप्य दिल्ली सहसा निशीथे
ते रक्त-दुर्गे[5] यवन-प्रकेतुम् ।
प्रासारयन्, शाह्-बहादुर[6] तम्
अस्थापयन् भारत-राष्ट्र-राजम् ॥

---

१ नाना-साहबस्य मन्त्री अजीमुल्ला-नामक । २ क्रान्ति चिह्न भूत-रक्तकमल्दानेन, ग्रामेपु रोटिका-वितरणेन च । ३ ३१ मई १८५७ ईसवीय-तिथि । ४ मेरठ-छावनी-क्षेत्रे । ५ लाल-किला भूमौ । ६ मुगल-सम्राज बहादुर-शाह जफर-नामानम् ।

(३६) (बेगम-जीनत महल)

तत्रैव दिल्ल्या नरराज-पत्नी
शूरा महल् बेगम-जीनता[1] मा ।
क्रान्तेर्धुरं वोढुमसौ समर्था
स्व-प्राणदानेन यशो दधार ॥

(३७)

साञ्चोपयद् वीर-वरान् वरेण्यान्
स्व-देश-रक्षा निज-धर्म-रक्षा ।
प्राणै प्रिया, प्राण-समर्पणेन
आङ्ग्ला विनाश्या निज-भूश्च रक्ष्या ॥

(३८)

विद्रोह-वह्नि प्रसृत प्रदेशे
वाराणसी-कणपुर-प्रभागे ।
प्रयाग-झांसी-अवधादि-क्षेत्रे
विद्रोह-केन्द्राणि बभूवुरादौ ॥

(३९) (श्री नाना-साहब)

विठूर-क्षेत्रे वर-वीर-नाना[2]
विद्रोह-नेतृत्वमधात् सुधीर ।
साहाय्यमाप्त्वा जनता-बलस्य
संस्थापयत् स्वीय-प्रशासनं च ॥

(४०)

भीता जिताश्चाङ्ग्ल-चमू-प्रवीरा
प्रस्थापितास्ते सहसा प्रयागम् ।
श्री कर्नलो नील[3]-खल: प्ररोषाद्
भस्मावशेषं नगरं[4] चकार ॥

---

१ मुगल-सम्राड्-बहादुरशाहस्य पत्नी बेगम जीनत महल-नाम्नी । २ श्री नाना साहब, धुन्धूपन्त-नामा (मृत्यो सम्भावित तिथि २४-९-१८५९ ई०) ३ प्रयागस्य कर्नल-नील महोदय । ४ प्रयाग-नगरम् ।

(४१)

आङ्ग्ली चमू कर्णपुर[1] पुनश्च
सम्प्राप्य तत्र विदधे नृशंसम्।
निहत्य विद्रोहि वरान् तु क्रौर्याद्
अस्थापयत् कर्णपुरेऽधिकारम् ॥

(४२)

सम्प्राप्य दिल्ली च सु-रक्त-दुर्गे[2]
ते[3] प्राहरन् शक्ति-बलेन युक्ता।
निहत्य योधान् वर-भारतीयान्
दुर्गे पुरे स्वाधिकृतिं वितेनु ॥

(४३)

निगृह्य शाहं तु बहादुरं तं
पुत्रैः प्रपौत्रैः सहितं तदैव।
निहत्य पुत्रान् च, बहादुरं तं
प्रावासयन् रंगुन[4] क्षेत्र-मध्ये ॥

(४४) (बेगम हजरत-महल)

प्रान्तोत्तरे[5] लक्ष्मण-पौर-मध्ये[6]
वाजिद् अलीशाह[7]-प्रिया सुवीरा।
नाम्ना तु बेगम् हजरत् महल्[8] सा
स्व-शौर्य-कृत्यैरजराऽमराऽभूत् ॥

(४५)

सधार्य क्रान्तेर्धुरमात्त-शौर्या
शूरान् प्रवीरान् समबोधयत् सा।
स्वातन्त्र्य-वह्नेर्नहि जातु नाशः
प्राणार्पणेनाऽपि भवेत् स्वदेशे ॥

---

१ कानपुर-नगरम्। २ लाल किला क्षेत्रे। ३ आङ्ग्ला योधा। ४ बर्मा-देशे रंगून-नगरे। ५ उत्तरप्रदेशे। ६ लखनऊ-नगरे। ७ लखनऊ-शासक श्री वाजिद अली शाह। ८ वाजिद अली शाहस्य पत्नी बेगम हजरत महल-नाम्नी।

(४६)

गजेन्द्रमारुह्य खरान् सुयोधान्
सा प्रैरयत् शत्रु-विनाशनाय ।
न्यायस्य सैन्यस्य च सुव्यवस्था
विधाय साऽयुध्यत युद्ध-क्षेत्रे ॥

(४७)

युद्धे परास्ताऽपि गुरिल्ल-युद्धं[1]
सा चाऽहमद् शाह[2]-सुनायकत्वे ।
प्रावर्तयद् देश स्वतन्त्रतायै
चण्डीव शत्रोर्हननाऽऽप्त-कीर्ति ॥

(४८) (झांसी-राज्ञी लक्ष्मीबाई)

राज्ञी च झांसी-नगरस्य 'लक्ष्मी'[3]
'बाई'-ति ख्याता समराऽऽप्त-लक्ष्मी ।
राजन्य-गङ्गाधर-राव-पत्नी
दुर्गेव शौर्येण जगाम ख्यातिम् ॥

(४९)

सा दत्तक पुत्रमवाप्य राज्ये
दामोदरं[4] तं चक्रमेऽभिषेक्तुम् ।
आङ्ग्ला निषिध्यैतदभीष्ट-कृत्यं
झांसी-सुराज्यं जगृहुर्बलेन ॥

(५०)

सा चाऽऽत्म समान-सुरक्षणार्थं
योधेव धीरा रिपु-व्यूह-हर्त्री ।
ह्यूरोज[5]-सेना सहसा विहत्य
सा प्रस्थिता काल्पिया[6]-समीपम् ॥

---

१ गुरिल्ला-युद्धम् । २ मौलवी अहमदशाह फैज़ाबादीय । ३ श्री मोरोपन्त ताम्बे इत्यस्य पुत्री राज्ञा गङ्गाधर रावस्य पत्नी (जन्म १९-११-१८३५ ई०, मृत्यु १८-६-१८५८ ई०) । ४ दामोदर राव नामकम् । ५ आंग्ल-जनरल सर ह्यूरोज़ (Sir Hugh Rose) । ६ काल्पी-नगरम् ।

(५१)

"नाना'-प्रवीरस्य सुयोध-मुख्यैः
　　सगत्य सा ग्वालियर[1] प्रपेदे ।
　　　　टोपे तु तात्या[2] समवाप्य हृष्टा
　　　　　　साऽस्थापयद् ग्वालियरेऽधिकारम् ॥

(५२)

ह्यू रोज-वीरोऽपि सशस्त्र-सैन्यैः
　　युतो रुषा ग्वालियरं प्रपन्न ।
　　　　प्रचण्ड-युद्धे सह तात्यया सा
　　　　　　दुर्भाग्य-हेतोर्विजयं न लेभे ॥

(५३)

सा शत्रुसेना निज-पूर्व-द्वारे
　　सहृत्य दुर्गेव कराल-रूपा ।
　　　　स्मिथ[3] विजित्याऽपि ह्यु रोज-सेनया
　　　　　　धृता प्रहारैस्त्रिदिवं प्रयाता[4] ॥

(५४)

श्री रामचन्द्रो[5] निज-स्वामि-भक्त्या
　　तस्यास्तनुं शस्त्र-निकृत्त-गात्राम् ।
　　　　सगृह्य सद्यस्तृण काष्ठ-वह्नौ
　　　　　　चितां विधायाऽन्त्यक्रियां व्यधत्त ॥

(५५)

सा राजपुत्री वर-वीर-योधा
　　वीराङ्गनाऽग्रेसरतां प्रपन्ना ।
　　　　स्वदेश-स्वातन्त्र्य-कृतौ प्रवृत्ता
　　　　　　आ-सूर्य-चन्द्रं यशसाऽभियुक्ता ॥

---

१ ग्वालियर नगरम । २ नानासाहबस्य सेनापति श्री तात्याटोपे । ३ आंग्ल-सेना-नायक जनरल स्मिथ-महोदयम् । ४ १८-६-१८५८ ईसवीये । ५ लक्ष्मीबाई-सेवक श्री रामचन्द्रराव देशमुख ।

(५६)

त्रि-विंश-वर्षैव[1] गुणाऽऽप्त-कीर्ति
धीरा सुवीरा वर-वीर-पुत्री ।
समर्प्य देशाय स्व-देह-वैभव
न कस्य श्रद्धाञ्जलि-भाजनं सा ॥

(५७) (श्री तात्या टोपे)

श्री पाण्डुरंगस्य भटस्य[2] सूनु
तात्या तु टोपे[3] नरपुङ्गवोऽयम् ।
सेनापति क्रान्ति-दवानलस्य
'नाना'-प्रवीरस्य सुनायकत्वे ॥

(५८)

नाना[4] च तात्या वर-वीर-राव
लक्ष्मीश्च बाई चतुरङ्ग-रूपा ।
अहर्निशं देश-स्वतन्त्रतायै
प्राणार्पणेनाऽप्ययतन्त वीरा ॥

(५९)

तात्या तु टोपे रणनीति-विज्ञ
आंग्ली चमू नव्य-सुशस्त्र-सज्जाम् ।
मुहुर्मुहुर्भग्न शूर-वीरै
समेत्य युद्धे तरसा जघान ॥

(६०)

पराजयेऽप्यात्म-बलाभिमानी
हिमाद्रि-शक्तिर्युधि कर्मशूरः ।
अन्ते पताका नयनाभिरामाम्
आदाय बभ्राम विभिन्न-राज्ये ॥

---

१ समाविंशवर्षीया । २ श्री पाण्डुरंगभट्टस्य । ३ तात्या टोपे, वास्तविक नाम रामचन्द्र पाण्डुरंग येवलेकर इति । (जन्म १८१४ ई०) । ४ नाना साहब पेशवा, तात्या टोपे, राव साहब पेशवा, लक्ष्मीबाई च ।

(६१)

रावट्'स-होम्सौ[1] सह यार्ककेण[2]
तात्या-चमू ता तु जिघासया ते ।
निरोध्य युद्धे ननु भीलवाडे[3]
तात्या निरोद्धु सफला वभूवु ॥

(६२)

उत्तीर्य सद्य स तु नर्मदा ता
सप्राप्तवान् दक्षिण-भारत तम् ।
न दक्षिणे क्रान्तिरिय प्रसर्पेद्
आग्ला वभूवुर्भय-कम्प-क्षुब्धा ॥

(६३)

श्री होनर स्मिथ् च मिचेल-वर्या[4]
त रोद्धुकामा सहसा समेता ।
वृतोऽपि सैन्यैर्न मुमोच धैर्यं
न शेकुरेतेऽपि च त निरोद्धुम् ॥

(६४)

श्रीमानसिंहस्य[5] गृहे स्थितोऽसौ
विश्वासघातेन निरोधमाप ।
शूलिं श्रितो हर्ष-भर-प्रसन्नो
दिव ययौ[6] भारत-राष्ट्र-भूति ॥

(६५) (श्री कुवरसिंह)

विहार-राज्ये जगदीश-पुर्यां[7]
राजा स वाबू कुवरश्च सिंह[8] ।
विहार-राज्ये निज-शौर्य-धैर्याद्
आग्ली चमू स कतिधा जघान ॥

---

१ आग्ल-चमू-सेनाध्यक्षौ रावट् स होम्स महोदयौ । २ ब्रिगेडियर यार्क । ३ भीलवाडा-स्थले । ४ ब्रिगेडियर होनर ब्रिगेडियर स्मिथ , मेजर-जनरल मिचेलश्च । ५ ग्वालियर राज्ये नरवराधीशस्य । ६ १८-४-१८५९ ईसवीये । ७ जगदीशपुर (आरा, बिहार) । ८ जगदीश-पुराधीश बाबू कुवरसिंह ।

(७१)

राजा च वीरः स हि शाहदेवः
स्वातन्त्र्य-वह्नौ शलभावतारः ।
विश्वास-घातेन गृहीत एषः
शूलिं श्रितो हर्ष-भर-प्रहृष्टः[1] ॥

(७२) (श्री अमरसिंह)

श्रिया युतः श्री अमरस्तु सिंहो[2]
भ्राता प्रियः श्री कुवरस्य[3] राज्ञः ।
स्व-भ्रातृ-निर्दिष्ट-पथः प्रपन्नः
आंग्ली चमूं नाशयितुं प्रवृत्तः ॥

(७३)

आरा-नगर्यां विजय-प्रकेतुं
संस्थाप्य मासत्रयमेष वीरः[4] ।
वनं श्रितो घोर-गुरिल्ल-युद्धे
स्वातन्त्र्य-हेतोः सततं प्रवृत्तः ॥

(७४) (श्री मर्दनसिंह)

श्रीमदनो[5] वानपुरस्य भूपः
क्रान्तेदवाग्निं ललिता-नगर्याम्[6] ।
प्रसार्य बुन्देल-भुवः प्रभागे[7]
अस्थापयत् स्वीय-प्रशासनं सः ॥

(७५)

स प्राणदानं प्रददे शरण्यः
श्री गोर्डन[8] डॉक्टर-ग्रीथन[9] च ।
तात्या च लक्ष्मी[10] समवाप्य सद्यः
सैन्यस्य नेतृत्व-कृतौ नियुक्तः ॥

---

१ १६-४-१८५८ ई० । २ बाबू कवरसिंहस्य भ्राता अमरसिंह । ३ श्रीकुवरसिंहस्य । ४ जून अक्टूबर १८५७ ई० । ५ वानपुर-नरेश श्रीमदनसिंह । ६ ललितपुर-सैन्यालये । ७ बुन्देलखण्ड-क्षेत्रे । ८ ललितपुर-जिलाधीश श्रीगोर्डनम् । ९ डा० ग्रियन-नामकम । १० तात्या टोपे लक्ष्मीबाई च ।

(७६)

कालप्रिया[१]-क्षेत्रमवाप्य वीर
आंग्ली चमू प्राहरताऽर्यनेता ।
मुरार-क्षेत्रे विजिनन्तु आंग्लै
आजीवन बन्दिगृह प्रपन्न[२] ॥

(७७) (श्री बखतबली)

श्री छत्रसालस्य कुलप्रदीपो
बभूव वख्तश्च बली[३] सुधीर ।
श्री मर्दनस्यास्य सुहृद्वरोऽसौ
आंग्ली चमू सह्वतवानजस्रम् ॥

(७८)

झांसी-सुदुर्गे, सगरस्य दुर्गे[४]
मालथौन-क्षेत्रे, मदनो पुरे[५] च ।
आंग्ली सुसेना तस्मा विजित्य
स्वातन्त्र्य-केतु प्रमुदा न्यधत ॥

(७९)

दुर्गेऽधिकारस्य यथा यदाऽसा
सुखावहा ग्वालियरस्य क्षेत्रे ।
सदैव लक्ष्म्या[६] निधन निशम्य
वज्राहतो वृक्ष इवावनम्रो ॥

(८०)

मुरार-क्षेत्रे राह मर्दनेन[७]
बन्दीकृतोऽराति-निपूदनाऽसौ ।
कारागृहे पञ्चनद-प्रदेशे
लाहौर-पुर्यां त्रिदिवं प्रयात[८] ॥

---

१ काल्पी-क्षेत्रे । २ जन्म २८-९-१८५८ ई०, मृत्यु २२-७-१८७४ ई० । ३ शाहगढ़-नरेश श्री बखतबली । ४ सागर-स्थित दुर्ग । ५ मालथौन घाटी, मदनपुर घाटी च । ६ [illegible] बाई [illegible] । ७ [illegible] गढ़ । ८ मृ० २८-९-१८७२ ई० ।

(८१) (श्रीराव-तुलाराम-)

श्री तेजसिंहस्य सुपौत्रवर्यो
राव तुलाराम-रिवाडि-भूप [1] ।
सगृह्य लक्षाधिकमेव वित्त
स्वातन्त्र्य-युद्धे प्रददौ मुदैव ॥

(८२)

नार्नौल-क्षेत्रे[2] यदभूत् युद्धम्
आग्लै सुयोधै प्रखर प्रचण्डम्[3] ।
शौर्य-प्रहृष्टा विजयस्य लक्ष्मी
मुदैनमेव चकमे प्रसर्तुम् ॥

(८३)

आग्लस्य सैन्यस्य सहायतार्थं
सैन्य ददुर्देशद्रुहो नरेशा ।
आग्ली चमूरेवमवाप लक्ष्मी
रावो ययौ शूरवर तु तात्याम् ॥

(८४)

विदेश-साहाय्यमवाप्तुकाम
सन्यासि-वैद्यादि-सुवेपमेत्य ।
ययौ विदेशान् यवन-प्रदेशान्
तत्रैव देशर्द्धि-व्रत श्रितो द्याम्[4] ॥

(८५) (लाला हुक्मचन्द्र-जैन)

सुतो दुनीचन्द्र-जिनस्य दक्ष
श्री हुक्मचन्द्रो[5] नर-वीर-वय ।
हासी-नगर्यां[6] समवाप्य जन्म
स्वशौर्यकृत्यै प्रबभूव योध ॥

---

१ रिवाडी-नरेशो राव तुलाराम । २ नारनौल-नगर-समीपे । ३ १६ नव० १८५७ तियौ । ४ ८ सित० १८६२ तियौ । ५ लाला हुक्म चन्द्र-जैन, जन्म १८१६ ई० । ६ हरियाणा-प्रदेशे हिसार-मण्डले हासी-नागरी ।

(८६)

सेवा-कृतौ शाहबहादुरस्य
युक्तोऽपि क्रान्ते सुनिशम्य घोषम् ।
सम्प्राप्य दिल्ली नरवीर-तात्यां
समार्पयद् देशहिताय सेवाम् ॥

(८७)

मिर्जा-मुनीरस्य[1] सुयोगमाप्त्वा
आभीर-क्षेत्रे[2] जन-सग्रहेण ।
तथाऽऽङ्ग्ल-सेनोत्खननाय शूरो
युद्धं परं स व्यदधात् सुधीर ॥

(८८)

आङ्ग्लै खलै स निजगेह एव
शूली समारोप्य समापितोऽभून्[3] ।
अन्त्येष्टि-कार्याय न तस्य देह
समर्पितोऽभूत् तु तदाऽऽङ्ग्लदेश्यै ॥

(८९) (श्रीराव गोपालदेव)

गोपालदेवो वर-वीर-योधो
राव तुलाराम-सुहृद्-युवाना[4] ।
स नारनौले प्रवरे तु जन्ये[5]
नेतृत्व-कार्यं प्रमुदा चचार ॥

(९०)

आङ्ग्ली चमू क्रान्ति-दुरात्मना तु
सम्प्रेक्ष्य योध वर-वीर-यावम् ।
स्टेपाउ-नेप्टन्-निज-युद्धवृत्ते
रावस्य चम्वा प्रचचार पौरुषम् ॥

---

१ मिर्जा मुनीर-नामक सहयोगी । २ हिसार-क्षेत्रे । ३ १९ नव० १८५८ ई० तिथौ । ४ रिवाड़ी-नरेशस्य राव-तुलारामस्य भ्राता ।
५ १६ नव० १८५७ ई० ।

(९१)

तत्रैव युद्धे स हि राववर्य
क्रुधा दलन् शत्रु चमू पुरस्तात् ।
स्वदेश-रक्षार्थं धृतव्रतोऽसौ
युद्धे हतो वीरगतिं प्रपेदे ॥

(९२) (नर्तकी अजीजन)

अजीजनाख्या[1] यवनी सुवीरा
नृत्याङ्गना हास-विलास-गेहा ।
निशम्य 'नाना'-[2]प्रवरस्य घोष
मुदा स्वदेशाय समापयत् सा ॥

(९३)

आश्रित्य सा सैनिक-वेषमेव
सगृह्य बालाश्च स्वदेशभक्ता ।
युद्धेऽश्वमारुह्य निगृह्य खड्ग
मुहुर्मुहुर्युद्धपरा बभूव ॥

(९४)

'नाना'-वर[3] कणपुरस्य क्षेत्रे
अस्थापयत् स्वीय-सुराज्यमेव ।
आग्ली चमू प्राप्य सहायता तु
चक्रे पुन कर्णपुरे स्व-राज्यम् ॥

(९५)

ता बन्दिनी प्रेक्ष्य स हेवलाको[4]
रूप-श्रिया मुग्धतरो बभूव ।
क्षमा तु तस्यै स प्रदातुकाम
क्षमा तु ता याचितुमादिदेश ॥

---

१ अजीजन-नाम्नी कणपुरस्य नृत्यागना यवन-महिला । २ श्रीनाना-साहवस्य । ३ श्रीनाना-साहव । ४ आग्ल-सेनापति हेवलाक (Havelock) ।

(८६)

सेवा-कृतौ शाहबहादुरस्य
युक्तोऽपि क्रान्ते सुनिशम्य घोषम् ।
सम्प्राप्य दिल्ली नरवीर-तात्या
समार्पयद् देशहिताय सेवाम् ॥

(८७)

मिर्जा-मुनीरस्य[1] सुयोगमाप्त्वा
आभीर-क्षेत्रे[2] जन-सग्रहेण ।
तत्राऽऽङ्ग्ल-सेनोत्खननाय शूरो
युद्ध खर स व्यदधात् सुधीर ॥

(८८)

आङ्ग्लै खलै स निजगेह एव
शूली समारोप्य समापितोऽभूत्[3] ।
अन्त्येष्टि-कार्याय न तस्य देह
समर्पितोऽभूत् तु तदाऽऽङ्ग्लदेश्यै ॥

(८९) (श्रीराव गोपालदेव)

गोपालदेवो वर-वीर-योधो
राव तुलाराम-सुहृत्-सुभ्राता[4] ।
स नारनौले प्रखरे तु जन्ये[5]
नेतृत्व कार्यं प्रमुदा चकार ॥

(९०)

आङ्ग्ली चमू क्रान्ति-हुतात्मना तु
सम्प्रेक्ष्य शौर्यं वर-वीर-कायम् ।
स्टेफड-केप्टन्-निज-युद्धवृत्ते
रावस्य चम्वा प्रशशस शौर्यम् ॥

---

१ मिर्जा मुनीर-नामक सहयोगी । २ हरियाणा-प्रदेशे । ३ १९ जन० १८५८ ई० तिथौ । ४ रिवाड़ी-नरेशस्य राव-तुलारामस्य भ्राता । ५ १६ नव० १८५७ ई० ।

(९१)

तत्रैव युद्धे स हि राववर्य
क्रुधा दलन् शत्रु चमू पुरस्तात् ।
स्वदेश-रक्षार्थ वृतव्रतोऽसौ
युद्धे हतो वीरगतिं प्रपेदे ॥

(९२) (नर्तकी अजीजन)

अजीजनाख्या[१] यवनी सुवीरा
नृत्याङ्गना हास-विलास-गेहा ।
निशम्य 'नाना'- प्रवरस्य घोष
मुदा स्वदेशाय समार्पयत् सा ॥

(९३)

आश्रित्य सा सैनिक-वेषमेव
सगृह्य बालाश्च स्वदेशभक्ता ।
युद्धेऽश्वमारुह्य निगृह्य खड्ग
मुहुर्मुहुर्युद्धपरा बभूव ॥

(९४)

'नाना'-वर[३] कणपुरस्य क्षेत्रे
अस्थापयत् स्वीय सुराज्यमेव ।
आग्ली चमू प्राप्य सहायता तु
चक्रे पुन कर्णपुरे स्व-राज्यम् ॥

(९५)

ता बन्दिनी प्रेक्ष्य स हेवलाको[४]
रूप-श्रिया मुग्धतरो बभूव ।
क्षमा तु तस्यै स प्रदातुकाम
क्षमा तु ता याचितुमादिदेश ॥

---

१ अजीजन-नाम्ना कणपुरस्य नृत्यागना यवन-महिला । २ श्रीनाना-साहबस्य । ३ श्रीनाना-साहब । ४ आग्ल-सेनापति हेवलाक (Havelock) ।

(९६)

सा वीर-योषित् तु जगर्ज रोषाद्
जगाद वाक्य—शृणु, हेवलाक !
आंग्ल-क्षयम् आंगल-राज्य-नाशम्
इच्छामि, नान्या मम कामनाऽस्ति ॥

(९७)

स हेवलाको नृपशु क्रुधा तु
तां गोलिकाघात-वध दिदेश ।
'नाना'-जय[1] देश-जय वदन्ती
क्षणेन सा वीर-गति प्रपेदे ॥

(९८) (श्री वालवीर अप्पा)

जोरापुराधीश-वर स बाल
'अप्पेति' ख्यात[2] सह सैनिकैस्तु ।
शान्ते पुरा दक्षिण-भारतेऽपि
स्वातन्त्र्य-दावाग्नि-प्रसारमैच्छत् ॥

(९९)

सालारजंगस्तु निजाम-शाहो
निगृह्य तम् आंग्ल-नृपस्य प्रादात्[3] ।
कारागृहे टेलर[4]-नामकाऽऽङ्ग्ल
प्रलोभनैर्लोभयितुम् इयेष ॥

(१००)

उवाच—मुक्तिर्भविता तवात्र
प्रकाशयेस्त्व यदि मित्र नाम ।
उवाच त टेलरमेष वीरो
विश्वासघाती भवितु न चाहं ॥

---

१ नानासाहवस्य जयम । २ दक्षिणभारते जोरापुरस्य शासको वीर-बालक 'अप्पा' । ३ फरवरी १८५८ ई० । ४ आंग्ल-शासक टेलर-नामा ।

(१०१)

वृणे वर मृत्युमह स्वदेश-
हेतोर्मुदा शूलि-समाश्रयेण ।
तोपेन गोल्याऽथ प्रवासनेन
विश्वासघातेन न जातु मोक्षम् ॥

(१०२)

आजन्म कारागृह दण्डमाप्त्वा
समावसत् तत्र स वार्लसिह ।
पिस्तोलमाप्त्वा निज-गोलिकाभि
मृतोऽक्षर प्राप यश सुवीर ॥

(१०३) (श्री देवीबख्शसिंह)

गोडा-नरेश स हि बख्शसिह [१]
सिह-क्रमो भारत-भू-सुपुत्र ।
हज्रत्-महल्-धमसुत [२] प्रवीर
स्वदेश-स्वातन्त्र्य-कृतौ निमग्न ॥

(१०४)

त्यक्त्वाऽपि राज्य स हि देशभक्त
स्व-मातृभूमेश्चरणानुरक्त ।
गिरि वन प्राप्य नेपाल-राज्य
स्वदेशभक्तौ प्रजहौ निजाऽसून् ॥

(१०५) (श्री अमरचन्द बाठिया)

स्वातन्त्र्य युद्धे प्रसृते प्रदेशे
जयाजिरावो [३] निज-देश-द्रोही ।
यातो वहिर्ग्वालियरस्य क्षेत्रात्
स्व स्वामिभक्तेस्तु प्रदर्शनाय ॥

---

१ उत्तरप्रदेशे गोंडा-नरश श्री राजा देवीबख्शसिंह । २ बेगम-हजरत-महलाख्यया धमपुत्र इव मानित । ३ ग्वालियरनरेशो जयाजीराव-सिन्धिया ।

(१०६)

तत्रैव सा गैरिक-केतु-वाहिनी
सस्थापयामास निजाधिपत्यम्[१] ।
स चामरश्चन्द्रवरो[२] वदान्य
स्वातन्त्र्य-लक्ष्म्या परितोषणाय ॥

(१०७)

राज्यस्य कोषाद् दश-लक्ष-रूप्य
ददौ तु स्वातन्त्र्य-सुसैनिकेभ्य ।
ह्यूरोज-[३]सेना पुनरेव चक्रे
स्व-शासन ग्वालियरस्य राज्ये ॥

(१०८)

वन्दीकृतोऽसौ अमरस्तु चन्द्र
चतुष्पथे ग्वालियरस्य पुर्या ।
आरोपितो निम्बतरौ तु शूलौ
कीर्त्या युतो वीरगति प्रपेदे ॥

(१०९) (विद्रोही श्री दराव)

स्वातन्त्र्य-युद्धे निज-देश-भक्तौ
कारागृहे कर्णपुरस्य वीरौ ।
सम्प्रापतुस्तौ निधन प्रहारै
तद्दर्शनार्थं प्रसृतो जनौघ ॥

(११०)

तौ द्वौ तु राजा दरियाव-चन्द्र
सेनापतिश्चैव फकीर-शाह ।
नागौर-जातौ[४] निज-राष्ट्र-युद्धे
दिव गतौ मोक्षपद प्रपन्नौ ॥

---

१ १४ मई १८५८ ई० तिथौ । २ ग्वालियर राज्य-कोषाध्यक्ष श्री अमरचन्द बाठिया । ३ आङ्ग्ल-सेनापति ह्यूराज । ४ नागौर-निवासिनौ ।

(१११)

फकीर-पुत्रस्तु दराब-वीर[1]
पितुर्वधस्य प्रतिशोधनार्थम् ।
मुहुर्मुहु आंग्ल-चमू प्रहृत्य
तत्कोपजातम् उररीचकार[2] ॥

(११२)

देशद्रुहा ब्राह्मण-दानवेन
केनापि दत्त विष-मिश्र-दुग्धम् ।
निपीय तद् देश-हिते नियुक्त
तनु विहायाऽक्षर-कीर्तिमाप्त ॥

(११३) (वनिता-वाहिनी)

या वाहिनी भारत-भूमि-लक्ष्मी
लक्ष्मी[3]र्व्यधाद् वीर-सुयोपिता तु ।
तत्रैव देशार्पित-जीवनानि
योषित्-सुरत्नानि विकासमापु ॥

(११४)

झासी-नगर्यां तु यदैव दुर्गे
ध्वस्त प्रकोट खर-तोप-गोलै ।
स निर्मितस्तत्क्षणमेव रात्रौ
स्त्री-वाहिनी-घोर-परिश्रमेण ॥

(११५)

युद्धे तु बाई ललिता च वरिशन्[4]
श्री सुन्दरी वाइ-वरा[5] च वीरे ।
स्वदेश-स्वातन्त्र्य-हिताय रात्रौ
ते चक्रतु कायसर्ति मुदैव ॥

---

१ सेनापति-फकीरशाहस्य पुत्रो विद्रोही दराव । २ अगृह्णात् । ३ झासी-राज्ञी लक्ष्मीबाई । ४ ललिताबाई वख्शिन् । ५ सुन्दरबाई-नाम्नी ।

(११६)

आग्ली चमू ते तु निरोद्धुकामे
यावद्दिन तोप प्रचालनार्थम् ।
स्थिते तु बाई-ललिता च मोती[1]
थिते दिव ते वनिताग्र-गण्ये ॥

(११७) (क्रान्ति-वैफल्य-कारणानि)

सशस्त्र-क्रान्ति प्रथमा यथा तु
वैफल्यमाप्ता जन-शोक-हेतो ।
तत्कारण वक्तुमिहास्ति शक्य
ध्येय विचिन्त्य विबुधैश्च वीरै ॥

(११८)

प्राचीन-शस्त्रास्त्र-प्रयोग-शिक्षा
नवाऽऽयुधानामनभिज्ञता च ।
समुद्र-शक्तेर्विरहस्तथा च
द्राक्-तार-संसूचन-विध्यभाव[2] ॥

(११९)

राजन्यवर्गस्य च भीरुभावो
नेपाल-पजाव-चमू विरोध ।
सयोजनायामनुशासनस्य
नियन्त्रणस्यापि च दैन्यभाव ॥

(१२०)

देशद्रुहामाङ्ग्ल-समर्थन तु
पदे पदेऽभूद् व्यवधानकारि ।
क्रान्तेदवाग्नि प्रसृतस्तु देशे
गुप्तोऽपि सुप्तोऽपि क्षय न लेभे ॥

●

---

१ ललिताबाई वस्तिान्, मोतीबाई च । २ डाक-तार सूचना-विभागाभाव ।

५२. भारतीय-क्रान्ति-वृत्तम्, (ख) क्रान्ति-युद्धम्
(१८७१ ई०–१९४७ ई०)

(उपजातिवृत्तम)

(१) (श्री रणजीतसिंह)

पजावसिंहो रणजीतसिंहो
युद्धे मुहुर्दानव-वारणोऽसौ ।
प्रधपयन्नाङ्ल-चमू प्रवीरो
दिव ययौ शाश्वत-कीर्ति-युक्त ॥

(२) (कूका विद्रोह)

कूकेति[1] नाम्ना प्रथिता जगत्या
या क्रान्तिरिष्टा जनता वलेन ।
स नामधारी गुरु-रामसिंहो
नेतृत्व-कार्ये सुतरा नियुक्त ।

(३)

'रढ'-स्थले[2] ते विपिने प्रदेशे
वीरा महर्षं युधि युध्यमाना ।
विश्वासघातेन पराजितास्ते
वद्धा ययु 'कावन'[3]-समुख च ॥

(४)

आयुक्तकल्प स हि दैत्यरूपो
मालेर-कोट्ला-नगरे सुवद्धान् ।
तोपेन[4] सार्धं निवबन्ध वीरान्
क्षणेन ते वीरगति प्रयाता ॥

(५)

त्रयोदशाव्द समवेक्ष्य वीर
कावनस्य भार्या निजगाद रोषात् ।
त्व रामसिंह त्यज वीर-वाल ।
न चेत् प्रणाशस्तव निश्चितोऽयम् ॥

---

१ कूका-नामधेया नामधारिण सिक्खजना । २ पटियाला-राज्य-सीमान्तक्षेत्रे रढनामक-ग्रामसमीपस्थे वने । ३ आग्ल उपायुक्त श्रीकावन । ४ शतघ्न्या ।

(६)

क्रुधा स बाल परया समेत
काव्नस्य कूर्चं जगृहे बलेन ।
हस्तद्वय तस्य नरासुरेण
काव्नेन छिन्न, शिशुराप मृत्युम् ॥

(७)

मलौध-दुर्गे नव-सप्त[1] वीरा
शूलौ निरुद्धास्त्रिदिव प्रयाता ।
स्वदेश-रक्षा-व्रतमास्थितास्ते
स्व-मृत्युकाले ननृतुर्जगुश्च ॥

(८) (श्री वासुदेव बलवन्त फडके)

श्री वासुदेव फडके[2] सुवीरो
योधो महाराष्ट्रभुव सुपुत्र ।
रानाड-[3]वयस्य निशम्य घोप
क्रान्तेदवाग्नि परितो बभार ॥

(९)

निरीक्ष्य देशस्य सुदुर्दशा तु
समीक्ष्य चैवार्थिक शोपण च ।
व्याख्यानदानैर्निज-लेख-कृत्यै
आग्लाधिपाना कुनय बभाषे ॥

(१०)

रोमासि-[4]जात्या समवाप्य योग
क्रान्तेदवाग्नि ज्वलयन् समन्तात् ।
सह्याद्रिमाश्रित्य स्वदुर्ग-भूत
विद्रोह-काय-प्रयनेऽनुरक्त ॥

---

१ षोडश । २ श्रीवासुदेव बलवन्त फडके (जन्म ४ नव० १८४५ ई०
मृत्यु १७ फर० १८८३ ई०) । ३ श्री महादेव, ...
४ रोमासी जाति ।

(११)

य कोऽपि हत्वा फडके-शिरस्तु
दद्यात्, पुरस्कारततिं लभेत ।
रिचार्ड टेम्पुल्-[1]शिरस प्रदाने
सोऽघोपयत् लक्ष-पुरस्कृतिं तु ॥

(१२)

आग्लास्ततस्त्रस्तहृदो हताशा
पुणे-नगर्यां सहसा समेता ॥
निरोद्धुकामा फडके-वरं तु
सर्पपयन् सैन्यमशेषदिक्षु ॥

(१३)

श्री दौलतो[2] मित्रवरस्तु तस्य
सैन्यैर्हतो गोलिकया वने तु ।
'द्वारे'[3]सुहृत्तस्य गृहीत एप
जीवन् प्रदग्ध पुलिसालये[4]तु ॥

(१४)

श्री वासुदेवमनुसृत्य मेजर्
श्री डेनिलस्त[5] न्यरुणत् सुग्रामे ।
न्यायालये प्रस्तुत एप रुद्धो
निर्वासनाज्ञामलभिष्ट वीर ।

(१५)

स मृत्युपूर्वं जनता समक्षम्
उवाच—आग्ला सतत प्रणाश्या ।
स्याल्लोकतन्त्र निज-देशे-मध्ये
सदिश्य स वीरगतिं प्रपेदे ॥

---

१ बम्बई-राज्यपाल श्री रिचार्ड टेम्पुल-महोदय । २ श्री दौलतराव । ३ द्वारे-नामकोऽपर सुहृत । ४ रक्षि-पुरुषागारे । ५ मेजर डेनियल-नामा ।

(१६) (श्री चाफेकर-बान्धवा)

श्री रेण्ड[1] दैत्येन प्ररोपभावात्
पुण्य स्थले[2] यद् विहित नृशसम्।
तत् ग्राम-कार्यं जनता-मन सु
विक्षोभहेतुर्व्यजनिष्ट सद्य ॥

(१७)

चाफेकरा बन्धुवरा प्रवीणा
कीर्त्या श्रितास्ते 'हरिपन्त'-पुत्रा[3]।
दामोदर, कीर्तक-बालकृष्ण,
श्री वासुदेवश्च स्वदेश-भक्ता ॥

(१८)

विक्टोरिया-हीरक उत्सवो य
षष्टयब्द पूर्ते सुनियोजितोऽभूत्।
पुण्यस्थले रेण्ड-महोदयस्य
एयस्ट-[4]थापस्य वधाय जात ॥

(१९)

दामोदरोऽसौ नर-वीर-वर्यं
स्वकीय-कायम् उररीचकार।
स्वदेश-स्वातन्त्र्य-हिताय सर्वं
कृत्य मयेद विहित नृशंसम् ॥

(२०)

दामोदरो बालक-बालकृष्ण
तौ प्राणदण्डेन युतावभूताम्।
श्री वासुदेवो विनिहत्य पाप
विश्वासघात व्यवृणोच्च मृत्युम् ॥

---

१ आंग्ल आयुक्तो रेण्ड-महोदय । २ पुणे-नगर्याम । ३ श्री हरिपन्त चाफेकरस्य त्रय पुत्रा —दामोदर चाफेकर (ज० २५ जून, १८६९, मृ० १८ अप्रैल १८९८), बालकृष्ण चाफेकर (ज० १८७३, मृ० १२ मई १८९९), वासुदेव चाफेकर (ज० १८८०, मृ० ८ मई १८९९) । ४ आंग्ल लेफ्टिनेंट एयर्स्ट महोदय ।

(२१)

स्वमातृहेतोर्निज-राष्ट्र-हेतो
प्राणार्पणं ते व्यदधुस्त्रयोऽपि ।
स्वजीवनं मातृ-पदारविन्दे
समर्प्य ते शश्वतकीर्तिमीयुः ॥

(२२) (श्री वीर सावरकर)

दामोदरोऽसौ च विनायकाख्य[१]
सावर्कराख्या-प्रथितः स्वदेशे ।
स्वराष्ट्र-स्वातन्त्र्य-विधौ नियुक्तो
हिन्दुत्व-रक्षा-प्रवणो विजिग्ये ॥

(२३)

स्वबाल्यकाले प्रतिजज्ञ एष
क्रान्तेर्ध्वजम् उच्चतरं करिष्ये ।
योत्स्ये पुनर्यावदहं न मृत्युं
संप्राप्नुयां शत्रु-चमू-सुयुद्धे ॥

(२४)

संस्थाप्य संस्थां स हि 'मित्रमेला'[२]
क्रान्तेर्ध्वनिं सोऽप्रथयच्च देशे ।
मुक्तिर्विदेशीय-प्रशासनात् स्यात्
स्वातन्त्र्य-लाभोऽभवदेव लक्ष्यम् ॥

(२५)

आदर्शरूपेण शिवाजि-राजं[३]
संस्थाप्य देशस्य स्वतन्त्रतायै ।
हिन्दुत्व-राष्ट्र-प्रवणा प्रवृत्तिः
तत्-क्रान्ति-कार्ये सततं प्रवृत्ता ॥

---

१ श्री विनायक दामोदर सावरकर (१८८३-१९६६ ई०) । २ क्रान्ति-कारिणां संस्था मित्रमेला-नाम्नी । ३ शिवाजी-महाराजम् ।

(२६)

सम्प्राप्य सोऽयं तिलकस्य[1] योगं
गणेश-[2]भ्रात्रा सह संगमं च ।
न चाऽऽङ्ग्ल-वर्त्मस्य प्रदाहमेव
इयेष साम्राज्य विनाशमेव ॥

(२७)

स श्यामजी-कृष्ण-[3]धनादवाप्य
वृत्तिं ययौ आङ्ग्लभुवं प्रवीरः ।
लक्ष्यं प्रपेदे स हि देशभक्तिं
स्वदेश-स्वातन्त्र्य-सुलाभमेव ॥

(२८)

श्री श्यामजी-कृष्ण-वरस्य तत्र
श्री हरदयालस्य[4] च वापटस्य[5] ।
सम्प्राप्य योगं सुगृहीत-वृत्ति
क्रान्तेर्धुरं चारतरम् उवाह ॥

(२९)

स लन्दने क्रान्तिमहोत्सवस्य
आयोजयत् स्वर्ण-जयन्तिका[1] च ।
उत्साह-भावैर्जनता मनःसु
हुतात्म-श्रद्धामुदबोधयच्च ॥

(३०)

स क्रान्ति-ऐतिह्य प्रकाशनार्थं
क्लेशाननेकानसहिष्ट वीरः ।
प्रकाशितं पुस्तकमाङ्ग्ल-देशे
आङ्ग्लाधिपैर्गर्हितम्...

---

१ श्री लोकमान्य तिलक । २ [illegible]
३ श्री श्यामजी कृष्ण वर्मा । [illegible]
पांडुरंग महादेव बापट । [illegible]

(३१)

गणेश-सावर्करमत्र देशे
श्रीजैक्सनो[1] दण्डमदात् सुघोरम् ।
अनन्त-कन्हेर-वरस्तु[2] तस्य
वध व्यधाद् नाटय-सभागृहे च ।

(३२)

श्री कृष्णपन्तश्च[3] विनायकश्च
अनन्त-कन्हेर-वर नयस्तु ।
वधाऽपराधे विनिगृह्य शूलौ
आरोपितास्ते[4] निज-देश भक्ता ॥

(३३)

स पेरिसाद् लन्दनमाजगाम
खिन्नो विपण्णो निगृहीत एप ।
सकूद्य पोताद् जलधि प्रतीर्य
फ्रासावनि प्राप स वीर-वय ॥

(३४)

आग्लै पुन स निगृहीत एप
प्रवास दण्डात् प्रहितोऽण्डमानम्[5] ।
दीर्घं समाप्यैव प्रवासदण्ड
मुक्त पुनर्भारतमाजगाम ॥

(३५)

आजीवन देशहिताय तप्त्वा
क्रान्तेर्धुर देश-विदेश-मध्ये ।
उवाह स भारत-भू-सुपुत्रो
यशोऽक्षर प्राप च देशभक्त ॥

---

१ आग्लशासक श्री जैक्सन । २ अनन्त कन्हेरे-नामक ३ श्री कृष्णजीपन्त कर्वे, श्री विनायक दशपाडे, श्री अनन्त कन्हेरे च । ४ १९ अप्रैल १९१० ई० तिथौ । ५ अण्डमान-द्वीपम् ।

(३६) (श्री वारीन्द्रकुमार घोष)

श्री कृष्णधन् घोष[1]-सुतौ वदान्यौ
वारीन्द्रघोषो[2] ह्यरविन्दघोष ।
सुतौ स्वदेश-व्रतमास्थितौ तौ
स्वराज्य-हेतोर्ददतु स्वजीवम् ॥

(३७)

लार्ड्-कर्जनादिष्ट[3]-सुवङ्ग-भङ्गम्
उद्दिश्य देशे प्रससार रोष ।
स्वदेशि-आन्दोलन[4]मत्र वृत्त
स्वराज्य-प्राप्तिर्विवृते च लक्ष्यम् ॥

(३८)

'युगान्तर' पत्रमसौ प्रकाश्य
प्रासारयत् क्रान्ति-दवाग्निमेतम् ।
छात्रा युवानो निजदेश-भक्त्या
वारीन्द्रघोषस्य दल प्रविष्टा ॥

(३९)

वारीन्द्र उल्लासकर उपेन्द्रो[5]
निर्वासन प्रापुरिमे समेऽपि ।
स्वयातनाना विवृत्ति समस्ता
प्रकाशितैर्भिनरपुगर्वैस्तु ॥

(४०) (श्री अरविन्द घोष)

यश्चारविन्दो नर-वीर-घोष
सम्प्राप्य मुक्ति निगृहीत एष ।
स्वीयाश्रमे पाडिचरी प्रदेशे
अध्यात्म-योगाऽऽश्रयणे प्रवृत्त ॥

१ डॉ० कृष्णधन घोष । २ वारीन्द्र कुमार घोष , अरविन्द घोषश्च । ३ श्री लार्ड कर्जन । ४ स्वदेशी आन्दोलनम । ५ वारीन्द्र-कुमारघोष , उल्लासकरदत्त , उपेन्द्रनाथ बनर्जी च ।

(४१) (श्री खुदीराम बोस)

वारीन्द्र-निर्देशमवाप्य खूदी-
रामो[१] वसुर्वीर-प्रफुल्ल-चाकी[२] ।
श्री किंग्सफोर्ड[३] तु निहन्तुकामौ
मुदा प्रवृत्तौ नृ-यशोविनाशे ॥

(४२)

मुजफ्फर प्राप्य पुर[४] द्वय तत्
चिक्षेप याने बममेकमेव ।
कनेडि[५]-योषिद्-द्वयमाप मृत्यु
न किंग्सफोर्डो मृतिमाजगाम ॥

(४३)

प्रफुल्ल-वर्यो निगृहीत एष
स्वकीय-गोल्याऽऽम-विनाशमाप ।
राम खुदी[६] चापि गृहीत एव
शूलौ मृतेर्दण्डमवाप बाल ॥

(४४)

शूलौ सहर्षं मृतिमाप वीर
शव तु तस्यानुययौ जनौघ ।
लक्षाधिको, भस्म निधाय मूर्ध्नां
रक्षामणि[७] तस्य व्यधत्त प्रेम्णा ॥

(४५)

'राम खुदी' प्राप यशोऽक्षर स
श्रद्धाञ्जलि प्राप च देशभक्तै ।
ग्रामे नगर्यां सकलेऽपि वङ्गे
तन्नाम-ज्योति प्रसृत समन्तात् ॥

---

१ श्री खुदीराम बोस (जन्म ३ दिस० १८८९ ई०, मृत्यु ११ अग० १९०८ ई०)। २ श्री प्रफुल्ल चाकी। ३ आंग्लाधिकारी किंग्सफोर्ड । ४ मुजफ्फरपुरम्। ५ कनेडी-परिवारस्य स्त्रीद्वयम्। ५ श्री खुदीराम । ७ तावीज इति ।

(४६) (श्री रासविहारी बोस)

शूराग्रणी रासविहारिबोसो
विनोद-वर्यस्य[1] सुत प्रवीण।
स्वातन्त्र्य हेतोर्निज-भारतस्य
क्रान्तेर्वनाग्नि परितो बभार ॥

(४७)

सोऽयोजयत् क्रान्तिकृता समूह
स्वदेशभक्ति प्रददे जनेपु।
समर्प्य देशाय स्वजीवन स
प्राज्वालयत् क्रान्ति-सुवह्निमिष्टम् ॥

(४८)

सोऽमीरचन्द्रस्य[2] सुयोगमाप्त्वा
लाला हनूमन्त-सहाय[3]मिष्टम्।
स्व-क्रान्ति-कार्य-प्रथनेऽनुरक्त
स्वदेश-स्वातन्त्र्यमुवाच लक्ष्यम् ॥

(४९)

लाला हनूमन्तसहाय-वर्यो
ददौ स्वदेशाय तनु धन च।
अस्थापयद् राष्ट्रिय-ज्ञानपीठ
क्रान्ते सुशिक्षा प्रददे युवभ्य ॥

(५०)

दिल्ल्या शुभ पचम-जाज-द्वार-
महोत्सव प्रववृते समन्तात्।
तदा तु हार्डिज वरे[4] क्रुधैव
क्षिप्तो बमश्चादनि-चौक[5]-मध्ये ॥

---

१ श्री विनोदविहारी बोस-सुत श्री रासविहारी बोस (जन्म २५ मई १८८६, मृत्यु २१ जा० १९५५ ई०)। २ मास्टर अमीरचन्द्र। ३ लाला हनुमन्तसहाय। ४ लाट हार्डिजो नायसराय। ५ चादनीचौक।

(५१)

वसन्तको[1] रास-विहारि-श्रोसो
भाग न्यधाता विपमे तु कृत्ये ।
वसन्तको वालमुकुन्द-वर्य [2]
तदर्थमासौ प्रमुदैव शूलिम् ॥

(५२)

शस्त्रास्त्रमासु प्रहितो विदेश
विहारि-वर्यो निजदेशभक्तै ।
जापानमाप्त्वा स प्रचार-कार्ये
नित्य नियुक्तो निज-भाप लेखै ॥

(५३) (श्री शचीन्द्रनाथ सान्याल)

शचीन्द्र-सान्याल [3]वरोऽत्र देशे
नेतृत्व-कार्यं व्यदधाद् धुरीण ।
वाराणसी काण्ड गृहीत एप
प्रवासितो ह्यण्डमन तु द्वीपम् ॥

(५४)

मुक्त पुन स विदुपा वरेण्य
काकोरि-काण्डे[4] निगृहीत एप ।
कारागृहे क्लेश-तति विपह्य
क्षयेण[5] प्राप निधन प्रवीर ॥

(५५) (श्री लाला हरदयाल)

श्री हरदयालो[6] विदुपा वरिष्ठो
गौरीदयालस्य[7] सुतो वदान्य ।
आक्सफोडमाप्त्वैव सुछात्रवृत्त्या
स्वदेशभक्त्याऽध्ययन जहौ स ॥

---

१ श्री वसन्तकुमार विश्वास । २ भाई वालमुकुन्द । ३ श्रीशचीन्द्र नाथ सान्याल । ४ काकोरी-पड्यन्त्र-काण्डे । ५ क्षयरोगेण । ६ श्री लाला हरदयाल (जन्म १४ अक्टू० १८८४, मृ० ४ मार्च १९३९ ई०) । ७ पिता श्रीगौरीदयाल माथुर ।

(५६)

श्री श्यामजी-कृष्ण[१]-सुयोगमाप्त्वा
क्रान्ते शिक्षा सोऽप्रथयद् विदेशे।
अमेरिकाया विविधे प्रदेशे
प्रासारयत् क्रान्ति-दवाग्निमेष ॥

(५७)

मन्त्रित्वमास्थाद् गदरे दले[२] स
प्राकाशयत् पत्र-सुपत्रिकाश्च।
आंग्लाधिपत्यमपहर्तुकाम
क्लेशानशेषानसहिष्ट वीर ॥

(५८)

शर्मण्यदेशेन[३] सुयोगमाप्त्वा
आंग्ल-क्षय स चकमे तु युद्धे।
शर्मण्य-देशस्य पराजयेन
स्वाधीनताऽऽशा क्षयमेव याता ॥

(५९)

अमेरिकाया निधन प्रवासे
अवाप्य स वीरगति प्रपेदे।
ज्ञानेन स्मृत्या निज-देश-भक्त्या
वीराग्रणी शाश्वत-कीर्तिमाप ॥

(६०) (श्री श्यामजीकृष्ण वर्मा)

स श्यामजी-कृष्ण-वरो[४] वदान्य
स्वदेश-भक्तो विदुषा वरेण्य।
यतेदयानन्द-वरस्य शिष्य
क्रान्तेदवाग्निं सतत ददाह ॥

---

१ श्रीश्यामजीकृष्णवर्मा। २ गदर-नामके दले। ३ जर्मनी-देशेन।
४ श्रीश्यामजीकृष्णवर्मा (जन्म ४ अक्ट० १८५७, मृ० ३१ मार्च १९३० ई०)।

(६१)

प्रसार्य स वैदिकधर्म-ज्योति
प्रसार्य क्रान्तेर्दहन विदेशे।
आग्लेऽपि देशे धृत-क्रान्ति-ज्योति
सावरकरादे सहयोगमाप ॥

(६२)

संस्थाप्य स 'भारत-गेह'-[1]मत्र
ग्रन्थाननेकान् व्यलिखद् विपश्चित्।
स्वातन्त्र्य-हेतोर्बलिमेष दत्त्वा
लोकेऽक्षया कीर्तिमवाप वीर ॥

(६३) (श्री गेंदालाल दीक्षित)

श्री दीक्षित[2] क्रान्तिकृता वरिष्ठ,
अवाप्य स आर्यसमाज-शिक्षाम्।
स्वातन्त्र्य-हेतोर्निज देश-भूमे
प्राणार्पणेन सतत प्रवृत्त ॥

(६४)

संस्थाप्य संघ स शिवाजि-[3] नाम
ऐच्छत् स्वदेशस्य विमुक्तिमेताम्।
संप्राप्य स चम्बल-क्षेत्रमेव
स्वदेश मुक्त्यै समुवाच दस्यून् ॥

(६५)

स दस्यु-संघस्य सहायमाप्त्वा
कोपानलुण्ठद् विविधे प्रदेशे।
स्वातन्त्र्य-हेतोरनुभूय काराम्
अहर्निश देशहिते नियुक्त ॥

---

१ लन्दन-नगरे 'इण्डिया हाउस' इति। २ श्री गेंदालाल दीक्षित (जन्म २० नव० १८८८ ई०, मृत्यु २० दिस० १९२० ई०)।
३ शिवाजी-समिति।

(६६)

विश्वासघातेन निरुद्ध एष
कारागृहात् कूट प्रयोग-मुक्त ।
दिल्ल्या मुरुण समवाप मृत्युम्
अवाप च वीरगति सुवीर ॥

(६७) (श्री मानवेन्द्रनाथ राय·)

श्री मानवेन्द्रो[1] विदुषा वरिष्ठ
क्रान्तिप्रिय षोडश-भाष विज्ञ[2] ।
सप्राप्य रूस विविधाश्च देशान्
क्रान्ते पताका परितो दधार ॥

(६८)

लेनिन्-सुयोगेन स्वदेश मुक्त्यै
रूस-प्रदेशे अयतिष्ट नित्यम् ।
विलिख्य लेखान् विविधाश्च ग्रन्थान्
स्वातन्त्र्य-युद्धेऽक्षरकीर्तिमाप ॥

(६९) (श्री कन्हाईलाल दत्त)

तत्रैव श्री दत्त-कन्हाइ-लाल[3]
कृष्णोपम क्रान्ति-समथकोऽभूत् ।
स्व मातृ-दु खान्यपहर्तुकाम
स्वदेश-रक्षा-व्रतमेव वव्रे ॥

(६०)

वङ्गीयबालो नितरा सुशील
परोपकार व्रतमास्थितश्च ।
धैर्ये समुद्र सुवृत्तौ गिरिश्च
कर्तव्यमार्गे धृत शेष-शक्ति ॥

---

१ श्री मानवेन्द्रनाथ राय (मूलनाम-नरेन्द्र भट्टाचार्य) (जन्म १८९२ ई०, मृत्यु २४ जन० १९५४ ई० । २ षोडश-भाषा-वेत्ता । ३ श्री कन्हाईलाल दत्त (जन्म १८८७ ई०, मृत्यु १० नव० १९०८ ई०) ।

(७१)

स विप्लवाग्निं सकलेऽपि देशे
प्रासारयत् प्राणपणेन नित्यम् ।
भागीरथ तस्य प्रयास-जात
प्राज्वालयद् विप्लव-दाव-वह्निम् ॥

(७२)

सत्येन्द्र-नामा[१] वसुरस्य मित्र
प्रचार-कार्ये धृतिमाबवन्ध ।
नरेन्द्र[२]-गोस्वामिनमत्र पाप
विश्वासघात चकमे निहन्तुम् ॥

(७३)

रुग्णालये प्राप्य नरेन्द्रमेत
प्रद्रुत्य पाप निजघान सद्य ।
बद्धोऽभियुक्तो निज-कार्य-जात
स स्वीचकार वर-वीर-कान्ति ॥

(७४)

सत्येन्द्र-वर्योऽपि नरेन्द्र-नाशे
साहाय्यमिष्ट व्यदधात् सुधीर ।
स चाभियुक्तो निज-प्राण-दण्ड
मुदा प्रहृष्टो वरमेव मेने ॥

(७५)

कन्हाइ-वयस्तु यदैव शूलिम्
आरोपितो देह विनाश हेतो ।
मुदा युत स्थैर्य-समुद्भवेन
स ववृधे षोडश पौण्ड[३]-मात्रम् ॥

---

१ सत्येन्द्रकुमार वसु । २ नरेन्द्रगोस्वामी विश्वासघातक ।
३ १६ पाउण्ड मितम् ।

(७६)

गौराङ्ग एको मृत-देहमेत
प्रेक्ष्याब्रवीत् सहृतमिष्ट-वर्गम् ।
एतादृशा वीरवरा युवान
स्वदेश कीर्त्यै जनिमाभजन्ते ॥

(७७)

विलाप-लेशोऽपि च नेह कार्यं
प्रहर्ष-हेतु अयमस्य मृत्यु ।
न जन्म मृत्यु कति संलभन्ते ?
कीर्त्या श्रितो यो ह्यमर स एव ॥

(७८)

चिता श्रितो भस्मचय प्रपेदे
कीर्त्या श्रितो देवपद च लेभे ।
तद्-भस्म-जात शिरसा प्रणम्य
सर्वैर्गृहीत मणि-भस्म-तुल्यम् ॥

(७९)

कन्हाइ-लालस्य शव समीक्ष्य
य उत्सवोऽभूत् सकलेऽपि देशे ।
स आग्ल-लोकस्य विनाशरूप
समुद्गत पुच्छल-तार-भूत ॥

(८०) (श्री सत्येन्द्रकुमारो वसु)

सत्येन्द्रवय [१] स च वीरवन्द्य
शूलिं प्रपन्न प्रमुदा ननर्त ।
कन्हाइ-वद् वीरगतिं प्रपन्नो
यश शरीरेण धृतोऽत्र नित्यम् ॥

---

१ श्री सत्येन्द्रकुमार-वसु । (मृत्यु २१ नव० १९०८ ई०) ।

(८१)

कन्हाइ-लालस्य शवोत्सव त
सप्रेक्ष्य आग्ला भयमेव जग्मु ।
सत्येन्द्र-वयस्य शवोत्सवाय
भयाकुलैर्नानुमति प्रदत्ता ॥

(८२) (श्रीमदनलाल ढींगरा)

स ढीगरा[1] देश-व्रते नियुक्त
आग्ल प्र-देश समवाप्य धीर ।
सर् कर्जन वायलि[2]-मत्र दुष्ट
त भारताख्ये भवने[3] जघान ॥

(८३)

शूलि श्रित स निजगाद हृष्टो
भूयो भवेद् भारत भूमि-भागे ।
मज्जन्म पुण्य, निज-मातृ-हेतो
समर्पयेय सतत शरीरम् ॥

(८४)

या देश-पूजा परमेश-पूजा
कृष्णार्चना सा निज-राष्ट्र सेवा ।
स्व-मातृ-हेतोर्यदिहाप्यते सद्
देवार्चन विद्धि सुकीर्ति रम्यम् ॥

(८५) (श्री अमीरचन्द्र)

अमीरचन्द्र[4] कृतिना वरिष्ठ
प्राध्यापक क्रान्तिकृता धुरीण ।
शूलि श्रितो मोदयुतस्तु रज्जु
कण्ठे स्वहस्ताद् निवबन्ध धीर ॥

---

१ श्री मदनलाल ढीगरा (मृत्यु १७ अगस्त १९०९ ई०) । २ सर कर्जन वायली, भारतमन्त्रिण सहायक । ३ इण्डिया हाउस-नामके भवने । ४ मास्टर श्री अमीरचन्द्र (जन्म १८६९ ई०, मृ० ८ मई १९१५ ई०) ।

(८६)

पुत्रीकृतोऽसौ सुलतानचन्दो[1]
विश्वासघाती निज-देश शत्रु ।
उद्‌घाटच वृत्त धन-लिप्सयाऽसौ
जज्ञे पितु प्राण-विनाश-हेतु ॥

(८७) (श्री अवधविहारी)

अवधविहारी[2] सुकृताचारी
क्रान्ति-सुधा-रस-पान प्रमोदी ।
आग्ल-राज्य-सहार-सुकेतु
शूलिमवाप्य मुदा मृतिमाप ॥

(८८) (श्री भाई बालमुकुन्द)

औरगजेबस्य कुराज्य-काले
शूलि श्रितस्तेगवहादुरो[3]ऽपि ।
तेनैव सार्धं क्रकचेन भिन्नो
मृति ययौ श्री मतिदास[4]-वय ॥

(८९)

तद्-वशजा भाइ[5]-उपाधियुक्ता
वभूवुरेते निज-देश भक्ता ।
तद्-वशजो वालमुकुन्द[6]-वय
स्वदेश-हेतो प्रददौ स्व-देहम् ॥

(९०)

श्री हार्डिजस्य[7] वधाय दिल्ल्या
विस्फोटन यज्जनित वमेन ।
तत्कारण वालमुकुन्द-वय
शूलि श्रितो मोद भराश्ननतं ॥

---

१ श्री अमीरचन्द्रस्य दत्तकपुत्र (कुपुत्र)। २ श्री अवधविहारी (जन्म १८८९ ई०, मृत्यु ८ मई १९१५ ई०)। सिक्खनेता श्री गुरु तेगबहादुर । ४ श्री भाई मतिदास । ५ भाई (भ्राता)। ६ श्री भाई वालमुकुन्द (जन्म १८८९ ई०, मृत्यु ८ मई १९१५ ई०)। ७ वायसराय लार्ड हार्डिज महोदय ।

(९१)

भार्या सती रामरखो[1]-ति ख्याता
आकर्ण्य पत्युमरण तु शूलौ।
हृष्टा मुदा भर्तृ-समागमाय
सतीत्व-भाव[2] प्रययौ स्वगेहे ॥

(९२) (श्री वसन्तकुमार विश्वास)

वसन्त-वर्यो[3] गुण-शौर्य-धुय ,
पाञ्चाल देशे कृत-क्रान्ति-कृत्य ।
लाहौर-पुर्यां बम-पात-हेतो
शूलिं श्रितो देशहिताय सद्य ॥

(९३) (श्री भाई भार्गसिंह)

श्री भार्गसिहो[4] धृतिमद्वरिष्ठ
स्वदेश-रक्षार्पित-जीवनोऽसौ ।
कानाड-देश[5] समवाप्य तत्र
स्वदेश-स्वातन्त्र्य-कृतौ नियुक्त ॥

(९४)

ससह्य कष्ट विविध च घोर
धृतिं जहौ नैव स्वदेश-भक्त ।
द्वारे गुरो[6] पूजन-तत्परोऽसौ
पिस्तौल-घातेन[7] हतो वरेण्य ॥

(९५) (श्री भाई वतनसिंह)

तस्मिनवर्यो वतन-प्रसिह्[8]
सिंह क्रम शूर पराक्रमोऽसौ ।
श्री भार्गसिंहेन सहैव घाताद्
दिव ययौ गोलि सुविद्ध-देह[9] ॥

---

१ श्री भाईबालमुकुन्दस्य भार्या रामरक्खी। २ प्राणत्याग चक्रे। ३ श्री वसन्तकुमार विश्वास (मृ० १९१४ ई०)। ४ भाई भार्गसिंह (ज० १८७८, मृ० १९२२ ई०)। ५ कैनाडा-देश । ६ गुरुद्वारा-स्थले। ७ बेलासिंह-कृत पिस्तौल-गोलिकया। ८ भाई वतनसिंह (मृ० १९२२ ई०)। ९ पिस्तौलस्य सप्तगोलिकाभिविद्ध ।

(९६) (श्री मेवासिंह[*])

श्री मेव-सिंह[१] करुणार्द्र-चित्त
कानाड-देशे स्वजना[२]ऽऽर्ति-खिन्न ।
सेहे न रोष स्वजनाऽवमान
स क्रान्तिमिष्टा व्यवृणोद् मुदैव ॥

(९७)

हाप्‌किन्सन[३] शासकमन दुष्ट
न्यायालये गोलिकया जघान ।
आत्मार्पणाऽऽविष्कृत धैय-सिन्धु
मुदाऽऽश्रयत् शूलिममोघ-वीर्यं ॥

(९८)

स्वदेश-हेतोर्निज धर्म-हेतो
प्राणार्पण मे जन-ताप-शान्त्यै ।
न भारतीया अवमानिता स्यु
कानाड-देशे इति मे प्रणाश ॥

(९९)

शवोत्सवस्तस्य कनाड-देशे
अभूतपूर्वं गरिमाणमाप ।
स भारतीयाऽऽङ्ग्ल-जनै समेतै
प्रशसितो देवपद प्रपेदे ॥

(१००) (श्री प० काशीराम[*])

श्री काशिरामो[४] गुणिना वरिष्ठो
देशार्पित श्री परमार्द्र-चेता ।
सर्सर्पिवत् सप्त-सुहृद्भिरिद्ध
शूलिं श्रितो रक्षि विनाश-हेतो ॥

---

१ श्री मेवासिंह (मृ० ११ जन० १९१५ ई०) । २ भारतीयानाम् ।
३ प्रवास विभागे मुख्याधिकारिण हापकिन्सन-महोदयम् । ४, श्री प०
काशीराम (ज० १८८१ ई०), पिता श्रीगगाराम ।)

(१०१)

स तातमेव निजगाद खिन्न
मद्-देह-नाशो निज-देश-हेतो ।
स्वदेश-भक्ताऽऽर्य-पदाऽरविन्दे
मम स्थिति स्यादिति कामयेऽहम् ॥

(१०२) (श्री गन्धासिंह)

श्रीगन्धर्सिहो[१] बलिना वरिष्ठ
प्रज्वारय क्रान्तेर्दहन समन्तात् ।
स्व-सप्त-मित्रै सह देश-हेतो
शूलि श्रितो हर्ष-प्रकप हृष्ट ॥

(१०३) (श्री करतारसिंह)

कर्तारसिंहो[२] रिपु-नाग-सिंह
सिंह-क्रम सिंह-समान शक्ति ।
अमेरिका प्राप्य स्वदेशजाना
सघ व्यधात् शक्ति-समुच्चयार्थम् ॥

(१०४)

स 'विप्लव'[३] 'विप्लव-घोष'[४] नाम्ना
प्राकाशयद् ग्रन्थतति विदेशे ।
अमेरिकाया स त्रिवण-केतु
प्रासारयद् भारत-गौरवाय ॥

(१०५)

'स्वदेश भक्त्यर्पित-जीवितेभ्य
पदे पदे प्राण विनाश एव ।
न तत्र शान्तिर्न सुख धन वा
यशोऽक्षर केवलमेव लभ्यम्' ॥

---

१ भाई रामसिंहापरनामा श्री भाई गन्धासिंह (मृ० १९१६ ई०)। २ सरदार मगलसिंहस्य सुत श्री सरदार करतारसिंह (ज० १८९६, मृ० नव० १९१६ ई०)। ३ गदर-नामक समाचारपत्र ग्रन्थ च। ४ 'गदर दी गूज' इति ग्रन्थ ।

(१०६)

इत्थं जपन् सोऽयममोघशक्तिः
स्वातन्त्र्य-हेतोर्भरतावनेस्तु ।
आङ्ग्लाधिपानां समवेक्ष्य क्रूरं
कृत्यं तु चित्तं लभते न शान्तिम् ॥

(१०७)

स पिंगले-रासविहारि-सान्याल्[1]-
सुहृद्वराणां समवाप संगम् ।
क्रान्तेः प्रसारे धन-संग्रहे च
रात्रिन्दिवं ते निरता समेऽपि ॥

(१०८)

संप्राप्य युद्धं सरगोध[2]-क्षेत्रे
बन्दीकृतोऽसौ रिपुभिः समस्तैः ।
न्यायालये सर्वमुदारभावात्
कृतं स्वकृत्यं निजगाद हर्षात् ॥

(१०९)

'प्रवासनात् शूलिमहं वरं वृणे
यतो हि सद्यो मम देह-मोक्षः ।
पुनः पुनः प्राप्य जनिं स्वदेशे
शूलिं श्रयेयम्' इति मेऽभिलाषः ॥

(११०)

'स्वदेश-भक्तैः प्रथितं जगत्यां
देशार्थ-मृत्युः परमो हि मृत्युः ।
स मोक्ष-मार्गः स हि धर्म मार्गः
स राज-मार्गः स च क्रान्ति-मार्गः' ॥

---

१ श्री वी० जा० पिंगले, रासबिहारी बसु, शचीन्द्रनाथ सान्यालश्च ।

२ सरगोधा-स्थले ।

(१११)

एवं वदन् क्रान्ति-समिद्ध-चेता
अष्टादशाब्दो नर-वीर-वर्यः ।
गायन् मुदा भारत मातृ-गीतं
शूलिं श्रितो मोक्षमवाप सद्यः ॥

(११२) (श्री वी जी पिंगले)

श्री पिंगले[१] पिंगल-दाव-वह्नि
पुण्य-स्थले[२] प्राप्य शुभं स्वजन्म ।
सम्प्राप्य शिक्षां तु अमेरिकायां
स्वातन्त्र्य-युद्धे प्रमुदा प्रवृत्तः ॥

(११३)

प्रभ्रम्य देशे शुभ-दाव-वह्निं
प्रसारयामास पुरे च सैन्ये ।
क्रान्तेर्धुरं पञ्चनदे गृहीत्वा
प्राप्तः पुनर्मेरठ सैन्य-क्षेत्रे ॥

(११४)

सम्प्राप्य सैन्यान् दशभिर्वमैः सः
विद्रोह-वह्निं प्रदिधक्षुरेव[३] ।
विश्वासघातेन विरुद्ध एष
शूलौ मृतिं मोदपरः प्रपेदे ॥

(११५)

शूलिं श्रितः प्राह-'प्रभो, ममेयं
स्वातन्त्र्ययुक्ता भरतावनिः स्यात् ।
कृतं मया सैनिक-कृत्यमेतत्
प्रभो प्रसीदेति' दिवं ययौ सः ॥

---

१ श्री विष्णुगणेश पिंगले (जन्म जन० १८८८, मृ० १७ नव० १९ ई०)। २ तालेगाव (पूना)। ३ प्रज्वालयितुकाम ।

(१२६) (श्री यतीन्द्रनाथ मुकर्जी)

उमेशचन्द्रस्य सुतो वदान्यो
यतीन्द्रनाथो[1] नर-वीर-योध ।
क्रान्ते पताका स प्रसार्य वङ्गे
विद्रोह-कार्ये सतत प्रवृत्त ॥

(१२७)

अमेरिकादे समवाप्य शस्त्र
वालेश्वरे[2] योध-गृहीत एप ।
मुदैव सयुध्य सशस्त्र-योधै
कीर्ति श्रितो वीरगति प्रपेदे ॥

(१२८) (श्री नलिनीकान्त बागची)

स बागची श्री नलिनी-प्रवीर[3]
सशस्त्र-क्रान्ति प्रतिबाध्य वङ्गे ।
सशस्त्र सैन्यै क्षत एप वीर
कीर्त्या युतोऽसून् प्रजहौ सुयोध ॥

(१२९) (अन्ये)

अन्ये च शूरा बहव प्रवीरा
क्रान्ति श्रिता वीरगति प्रपन्ना ।
श्री सन्तसिंहो वरयामसिंह
श्री कर्मसिंहश्च दिलीपसिंह ॥

(१३०)

श्री नन्दसिंहो गुणि-रामसिंह
श्री भानसिंह अरुण-प्रसिंह ।
श्री कृष्णसिंहो हरिनामसिंह
श्री भक्तसिंहस्य[4] सखाय एते ॥

---

१ श्री यतीन्द्रनाथ मुकर्जी (जन्म ८ दिस० १८८०, मृ० १० सित० १९१५ ई०)। २ वालेश्वर (बालसोर, उडीसा)। ३ श्री नलिनीकान्त बागची (जन्म १८९६ ई०, मृ० १६ जून १९१८ ई०)। द्रष्टव्य —सरदार भगतसिंह-कृत 'मेरे क्रान्तिकारी साथी ग्रन्थ, पृष्ठ ८१-१२६ ।

(१३१) (श्री रामप्रसाद बिस्मिल)

रामप्रसाद[1] कृतिना वरिष्ठो
बिस्मिल्-उपाख्या-प्रथित स्वदेशे ।
स सोमदेवात् समवाप्य मन्त्र
स्वातन्त्र्य-मन्त्र सतत जजाप ॥

(१३२)

मुर्लीधरस्यैष[2] सुतो हुतात्मा
सप्राप्य चैवाऽऽर्यसमाज-सगम् ।
सुदीक्षितश्चाऽऽर्य-विधौ सदैव
स्वदेश-स्वातन्त्यमियेष नित्यम् ॥

(१३३)

अश्फाक[3]-वर्येण विधाय मैत्रीम्
ओदर्शमस्थापयदेप शश्वत् ।
स्वातन्त्र्य-हेतोर्यवनाऽऽर्य-मैत्री
युक्ता सुपुष्टा सततऽभिनन्द्या ॥

(१३४)

विलिख्य लेखान् विविधाश्च ग्रन्थान्
अजीवन क्रान्ति-कृतौ निमग्न ।
काकोरि-काण्डे[4] दशभिस्तु छात्रै
सहैव युक्तो निगृहीत एष ॥

(१३५)

धैयस्य मूर्तिश्चरितेन शुद्धो
निर्भीक-योद्धा पतिताऽऽत-त्राता ।
गोरखपुरे शूलिमुपागतोऽसौ
शश्वत् प्रपेदे सुयशोऽक्षर स ॥

---

१ श्री रामप्रसाद बिस्मिल (जन्म ज्येष्ट शु० ११,१९५४ वि०, मृ० १९ दिस० १९२७ ई०)। २ पिता मुरलीधर निवारा। ३ अशफाक उल्ला खा। ४ काकोरी-काडे।

(१३६) (श्री अशफाक उल्ला)

स्वातन्त्र्यमूर्तिर्यवन सुवीर
अश्फाक[1]-वर्य शफिकुल्[2]-सुतोऽसौ।
काकोरि-काण्डे सह विस्मिलेन
स्व-शौर्यमस्थापयदेष लोके॥

(१३७)

स मातृवेदी[3] समवाप्य सस्था
स्व शौर्य-धैय-प्रगति दिदेश।
काकोरि काण्डे समवाप्य शूलि
यशोऽक्षर स तनुते ह्यजस्रम्॥

(१३८) (श्री राजेन्द्र लाहिडी)

राजेन्द्रनाथ[4] स क्षितीश-पुत्रो[5]
वीराग्रणीर्बङ्गभुवोऽभिमानम्।
स दक्षिणेश्वर्-बम-काण्ड-मध्ये
बद्धो निरुद्धो बम-काय-विज्ञ।

(१३९)

स क्रान्तिकृत्-सघ-सदस्य-भक्त
काकोरि-काण्डादिषु भागमेत्य।
गोडा-स्थले शूलिमवाप्य वीरो
लब्ध्वा यशो वीरगतिं प्रपेदे॥

(१४०) (श्री यतीन्द्रनाथदास)

स बकिमस्यैष[6] सुतो यतीन्द्र[7]
सप्राप्य जन्म कलिका[8]-नगर्याम्।
लाहौर-षड्यन्त्र-कृतौ निरुद्धो
लाहौर-कारागृह-वासमाप॥

---

१ श्री अशफाक उल्ला खा (जन्म अक्टू० १९००, मृ० १८ दिस० १९२७ ई०)। २ पिता-शफीकुल्ला खा। ३ क्रान्तिकृता मातृवेदी-नाम सस्था। ४ श्री राजेन्द्र लाहिडी (जन्म १८९२ ई०, मृ० १७ दिस० १९२७)। ५ पिता-श्री क्षितीशमोहन लाहिडी। ६ पिता श्री वकिमचन्द्रदास। ७ श्री यतीन्द्रनाथदास (जन्म १९०४, मृ० १३ सित० १९२९ ई०)। ८ कलिकातापुरी।

(१४१)

श्री भक्तसिंह-वटुकेशदत्त-[1]
योगेन क्रान्तेर्दहन प्रवर्त्य ।
गिरिष्टयह्[2] सोऽनशन विधाय
यशोऽक्षर प्राप्य दिव प्रपेदे ॥

(१४२) (श्री रोशनसिंह)

श्री रोशन सिंह[3]-वरो वरिष्ठ
सुक्रान्तिकृन् श्री जगदीशसिंह- ।
सुतो[4] गुणज्ञश्च सुमातृवेदी-
सस्था-सदस्यो निजदेश-भक्त ॥

(१४३)

श्री बिस्मिलादे सतत सुमित्र
काकोरि-काण्डे विनिरुद्ध एष ।
नैनी-स्थले शूलिमुपागतोऽसौ
यशःश्रिया राजत एव नित्यम् ॥

(१४४) (श्री सरदार भगत सिंह)

वीराग्रणी क्रान्तिकृता वरेण्य
श्री भक्तसिंहो[5] नर-वीर-सिंह ।
प्रज्वाल्य क्रान्तेदहन समन्तात्
शूलि श्रितोऽसौ शलभावतार ॥

(१४५)

श्री कृष्णसिंहोऽस्य पिता[6] सुधीरो
विद्यावती मातृवरा[7] वदान्या ।
पितृव्यवर्यौ च सुवर्णसिंह-
अजीतसिंहो निज-देश-भक्तौ ॥

---

१ श्री भगतसिंह-बटुकेश्वरदत्तौ । २ ६३ दिवस यावद् अनशन कृत्वा । २ श्री रोशनसिंह (ज० १८९४ ई०, मृ० २० दिस० १९२७) । ४ पिता-श्री जगदीशसिंह । ५ श्री भगतसिंह (ज० २७ सित० १९०७, मृत्यु २३ मार्च १९३१ ई०) । ६ पिता-श्री किशनसिंह । ७ माता-श्रीमती विद्यावती ।

(१४६)

कुल समस्त निज-देश-भक्त
देशार्पित-श्री-मुख-वैभव च ।
उपास्य कारा च प्रवासन च
स्वदेश-भक्तौ सतत प्रवृत्तम् ॥

(१४७)

डी-ए-वि-[1] विद्यालयमेत्य शिक्षाम्
अवाप्य स राष्ट्रिय-कालिज[2] च ।
मित्रत्वमागाद् निज-देश-भक्तै
सुवीर-वर्यैर्निज छात्र-मित्रै ॥

(१४८)

विहाय वैवाहिक-वागुरा स
स्वातन्त्र्य-युद्धे नितरा प्रवृत्त ।
समाजवादाश्रय-सघमेक[3]
सस्थाप्य तत्कार्य-धुरम् उवाह ॥

(१४९)

लाला-वरे[4] दण्ड-निपात-रोषात्
सॉन्डसमेष[5] विजघान रोषात् ।
दिल्ल्या वम चाक्षिपदेष वीर
चिक्षेप ससद्भवने स्वलेखान् ॥

(१५०)

ससत्प्रकोप्ठे निगृहीत एष
कारागृहे चानशन प्रपेदे ।
लाहौर-षड्यन्त्रमुपास्य सोऽय
शूलौ मृतेदण्डमवाप वीर ॥

---

१ डी ए वी स्कूल, लाहौर । २ नशनल कालेज लाहौर । ३ हिन्दुस्तान-समाजवादी प्रजातान्त्रिक सघम् । ४ लाला लाजपतराये । ५ उप-पुलिस निरीक्षक जे पी साडर्स (J P Saunders) ।

(१५१)

श्रयोऽपि ते क्रान्तिकृता वरिष्ठा
श्री भक्तसिंह सुखदेव-राज-।
गुरू[1] त्रिनाम्ते सममेव सर्वे
शूलिं मुदा देश-स्वतन्त्रतायै ॥

(१५२)

प्रान्तोत्तरे[2] पञ्चनद-प्रदेशे
स एव क्रान्तिदहन ददाह।
'क्रान्तिर्जयेत्'[3] मन्त्रवर प्रवर्त्य
समाजवाद च जुघोष लक्ष्यम् ॥

(१५३)

समाजवाद च स्वातन्त्रता च
लब्धु मुदा दत्तमनेन देहम्।
श्री भक्तसिंहो निज-देश-भक्तो
न कस्य श्रद्धाञ्जलि-भाजनं स ॥

(१५४) (श्री सुखदेव)

स क्रान्तिकृत् श्री सुखदेव वर्य[4]
श्री रामलालस्य सुत सुधीर ।
श्री भक्तसिंहेन सहैव शूलिं
श्रितो यश प्राप स देशभक्त ॥

(१५५) (श्री शिवराम-राजगुरु)

शूर प्रवीर शिवराम-वर्य[5]
पुणे-स्थित श्रीहरिराज-पुत्र[6]।
श्री भक्तसिंहेन सहैव शूलिं
सप्राप्य लेभेऽक्षयकीर्तिमेष ॥

---

१ सरदार भगतसिंह, सुखदेव, राजगुरुश्च। २ उत्तरप्रदेशे। ३ 'इनकलाब जिन्दाबाद' इति उद्घोष। ४ श्रीसुखदेव (मृ० २३ मार्च १९३१ ई०)। ५ श्री शिवराम राजगुरु (राजगुरु) (मृ० २३ मार्च १९३१ ई०)। ६ पिता—श्री हरिराजगुरु।

(१५६) (श्री वटुकेश्वरदत्त)

श्री भक्तसिंहस्य सुहृत् प्रवीर
सुक्रान्तिकृत् श्री वटुकेशदत्त ।
ससत्प्रकोष्ठे बम-पात-हेतो
ख्यातिं गतो वीरगतिं प्रपेदे ॥

(१५७) (श्री चन्द्रशेखर आजाद)

श्री भक्तसिंहस्य सुहृद्वरोऽसौ
आजाद-चन्द्रान्वित शेखरोऽयम्[1] ।
आजीवन देश-हिते नियुक्त
स्वदेश-सेवा-तप एव तेपे ॥

(१५८)

स भावरा-नामक-ग्राम-मध्ये
मध्य-प्रदेशे जनिमाप वीर ।
पिताऽस्य 'सीता'-पति-'राम' एव[2]
वृत्त्या प्रवृत्त्या ह्यधनस्तु विप्र ॥

(१५९)

स संस्कृत ज्ञानमवाप्तुकाम
काश्यामुषित्वाऽध्ययने प्रवृत्त ।
सत्याग्रहे गान्धिवरस्य भाग
सगृह्य कारागृह-वासमाप ॥

(१६०)

'आजाद' इत्येवमुवाच नाम
'स्वाधीन' इत्येव पितुश्च नाम ।
'कारागृह' वास-गृहस्य नाम
न्यायालयेऽवोचदसौ प्रवीर ॥

---

१ श्री चन्द्रशेखर आजाद (जन्म २३ जुलाई १९०६, मृ० २७ फर० १९३१ ई०)। २ पिता—श्री सीताराम तिवारी ।

(१६१)

मुक्तो ह्यसौ क्रान्तिदल निगृह्य
समाजवादाऽऽश्रित-पक्षमाप ।
काकोरि-काण्डे विविधे च काण्डे
श्री विस्मिलस्यैष[1] चकार योगम् ॥

(१६२)

स्व-त्याग-निष्ठा-पुरुपाथ वृत्त्या
आयोजना-सघटना-गुणेन ।
समाजवादाश्रित-सघ-सैन्य-
सेनापतित्वे सतत नियुक्त ॥

(१६३)

यत्रापि कुत्रापि भवेत् प्रहार-
कार्यं तदाऽग्रेसरता प्रपन्न ।
सॉन्डर्स-नाशे बम क्षेपणे च
सहायता स निदधे ह्यजस्रम् ॥

(१६४)

स निधने प्राप्य कुले स्व-जन्म
सदाऽश्रयद् निर्धनता-प्रकोपम् ।
जन-प्रियो निर्धन-बान्धवोऽसौ
सदा जनाना हितमेव चक्रे ॥

(१६५)

आजाद-पार्के[2] सहसा निरुद्धो
विश्वासघातेन प्रयाग-मध्ये ।
युद्धे पुनर्योध-गणै प्रसिद्धे
गोल्याऽऽहतोऽसौ निधन प्रपेदे ॥

---

१ श्री रामप्रसाद विस्मिलस्य । २ प्रयागस्थे आजादपार्के ।

(१६६)

'आजाद' इत्येवमवाप्य नाम
स्वाधीन-वृत्ति चकमे सदैव।
समर्प्य देशाय स्वकीय-सर्वं
स्वदेशभक्तोऽक्षर-कीर्तिमाप ॥

(१६७) (श्री सुभाषचन्द्रो वसु)

श्री जानकीनाथ-सुतो[1] वरेण्य
प्रभावती पुत्र[2]-तपस्वि-रूप ।
अवाप जन्म कटकाख्य[3]-भूमौ
सुभाष-बोसो[4] वर-वीर-धुर्य ॥

(१६८)

कुशाग्रबुद्धिर्नितरा तरस्वी
तपस्वि रूपो निज-मान-मूर्ति ।
दुर्भाषमाग्ल गुरुमेकमेष
दत्त्वा चपेटा समवाप नाम ॥

(१६९)

गत्वाऽऽङ्ग्लदेश निज-ज्ञान-भूत्या
उत्तीर्य चाऽई-सि यम[5] परीक्षाम् ।
विदेशि-सेवा-व्रत-रोष भावात्
तत्याज वृत्ति निज-देश-भक्त ॥

(१७०)

अवाप्य सोऽय चितरजनस्य
दासस्य योग निज-देश-भक्तौ ।
समर्प्य सर्वं नितरा प्रवृत्त
क्रान्त्या च शान्त्या च स्वदेश मुक्त्यै ॥

---

१ पिता-श्री जानकीनाथबोस । २ माता-श्रीमती प्रभावतीबोस ।
३ कटक (उडीसा)। ४ श्री सुभाषचन्द्र वसु (जन्म २३ जन० १८९७, मृत्युतिथि अपुष्ट १८ अग० १९४५ ई०)। ५ आई० सी० एस० परीक्षाम् ।

(१७१)

विरोध्य स आग्ल-युवाधिराज-
महोत्सव[१] प्राप निरोधमेव ।
अनेकवारमनुभूय कारा
सोऽदीप्यत स्वणरुचिस्तु वह्नौ ॥

(१७२)

कांग्रेस-अध्यक्ष-पद द्विवारम्
अशोभयत् स युव-नेतृ-भूत ।
स चाग्रगामी-दल[२]-स्थापनेन
यूना सदा नेतृ-पद दधार ॥

(१७३)

पठान-वेषेण विदेशमाप्त्वा
क्रान्त्यै च मुक्त्यै सतत प्रयेते[३] ।
आजाद-हिन्दाख्य[४]-चमू विधाय
स्वदेश मुक्त्यै अयतिष्ट वीर ॥

(१७४)

शर्मण्य-जापान-सुयोगमाप्त्वा
इम्फाल-क्षेत्र समवाप सेना ।
शर्मण्य-देशस्य पराजयेन
चमूर्निवृत्ता निहता गृहीता ॥

(१७५)

जापान-देश प्रति प्रस्थितोऽसौ
विमान-दुवृत्तमवाप वीर ।
विवाद-ग्रस्त निधन विमाने
तथापि सोऽदर्शनमाप तत्र ॥

---

१ प्रिन्स ऑव् वेल्स-समारोहम् । २ फार्वर्ड ब्लॉक मन्याम् । ३ प्रयत्न चकार । ४ आजाद-हिन्द-फौज इति ।

(१७६)

स्वाधीनचेता नितरा जयिष्णु
देशार्पित-श्रीनिज-देश-वन्द्य ।
आग्लाधिपाना भय-हेतु-भूत
सुभाषचन्द्रोऽक्षयकीर्तिमाप ॥

(१७७) (श्री ऊधमसिंह)

श्री ऊधम सिंह-वरो[1] विजेता
तेहालसिंहस्य सुत[2] सुधीर ।
नारायणी-पुत्र[3]-सुवीर-वय
पित्रोर्वियोगात् सतत प्रतप्त ॥

(१७८)

अमृतसरे स जलियानवाला-
बागे नृशस प्रविलोक्य हत्याम् ।
ओडायरस्यैव[4] वध विधातु
स शैशवादेव विनिश्चिकाय[5] ॥

(१७९)

स लन्दन प्राप्य पठन् सुशिल्प[6]
काक्स्टन्-प्रकोष्ठे[7] निजघान दुष्टम् ।
ओडायर पाप-समूह-मूर्ति
निहत्य स स्वार्पणमेव चक्रे ॥

(१८०)

स्वदेश-रोप जन-ताप-दोप
साम्राज्य-दोप परित प्रदर्श्य ।
शूलि श्रित कीर्तिमवाप सद्यो
लेभे गति वीर-विभूति-युक्ताम् ॥

---

१ श्री ऊधमसिंह (जन्म २६ दिस० १८९८ मृ० १२ जून १९४० ई०)। २ पिता–श्री तेहालसिंह (कूहडग्रामो वा)। ३ श्रीमती हरनाम कौर (नारायणी इति नाम्नी वा)। ४ सर माइकेल ओडायर, पञ्जाब-राज्यपाल (Sir Michael O dwyer) ५ निश्चयम् अकरोत। ६ इन्जीनियरिंग विद्याम्। ७ Caxton Hall, London (१३–३–१९४० तिथौ)।

५३ भारतीय-क्रान्ति-वृत्तम्, (ग) शान्ति-युद्धम्
(१८८५ ई०-१९४७ ई०)
(उपजातिर्वृत्तम्)

(१) (श्री दादाभाई नौरोजी)

नौरोजि-वर्यो[1] निज-देश-भक्त
स पारसीको विधिशास्त्रवेत्ता ।
देशे विदेशे परिभ्रम्य नित्य
लोके जनान्दोलनमाचकाक्ष ।।

(२)

स ह्यूम ब्नेर्जि-[2] सहायमाप्त्वा
अस्थापयद् भारत-कागरेसम्[3] ।
सोऽघोपयद् भारत-दीनतायै
आग्ला समेऽप्युत्तरदायिन स्यु ।।

(३)

यूरोप-जातीय-जना न श्रेष्ठा
यस्मिस्तु कस्मिन्नपि कार्यजाते ।
स दूतरूपेण जगाम आग्ल
देश पुनर्भारत-गौरवाय ।।

(४)

यद् भारते व्यापकमस्ति राज्यम्
आग्ल तदन्याय-नयेन पुष्टम् ।
'स्वाधीनतैवास्ति समस्त-दोप-
विनाशहेतु ' इति स प्रपेदे ।।

(५) (श्री फिरोजशाह मेहता)

फिरोजशाहो[4] विधिशास्त्र विज्ञो
लोकप्रियो राजरतश्च विद्वान् ।
काग्रेस-कार्ये रुचिमादधानो
नीते कृतेर्निर्मिति-साधकोऽभूत् ।।

---

१ श्री दादा भाई नौरोजी (ज० ४ सित० १८२५, मृ० १९१७ ई०) । २ श्री ए ओ ह्यूम, उमेशचन्द्र बनर्जी च । ३ भारतीय-राष्ट्रीय-काग्रेस ।

(६)

शान्तिप्रियो राजरतोऽपि धीर
सोऽन्याय-कार्यस्य विरोधकोऽभूत् ।
आग्लस्य दुर्नीति-विरोध कर्ता
हित जनानामनिश चकार ॥

(७) (श्री सुरेन्द्रनाथ वनर्जी)

सुरेन्द्रनाथो[१] गुणिना वरिष्ठो
वाग्मि-प्रवीरो रचना-प्रवीण ।
सत्कल्पनाया नितरा सुदक्षो
वीरत्व-हुकारयुतो ह्यधृष्य ॥

(८)

स भारतस्यैक्यमवाप्तुकाम
सर्वान् जनान् धर्म-प्रदेश भिन्नान् ।
सोऽबोधयद् नैव विभेद-भिना
सुभारतीया वयमेकरूपा ॥

(९)

देशस्य एकत्वमपाम्य नास्ति
सभावना भारत-राष्ट्र-भूते ।
स जाति-भेदेन च वणभेदात्
तिरस्कृतो नाऽप्य वरिष्ठ डिग्रीम्[२] ॥

(१०)

क्षुब्ध प्रकुद्धो निज-राष्ट्र-सेवा-
व्रते निमग्नो नगरे प्रदेशे ।
प्रबोधयन् लोक-मत त्वभीक्ष्णम्
आन्दोलन ज्वालयितु ययौ स ॥

---

१ श्री सुरेन्द्रनाथ वनर्जी (जन्म नव० १८४८ ई०, मृ० १९२५ ई०) ।
२ वैरिस्टर-उपाधिम ।

(११)

स वङ्गभङ्गस्य कुनीति मूले
आन्दोलने युद्धपरो बभूव।
आश्रित्य शीत दलमेव[1] नित्य
वैधानिक युद्धमियेष कर्तुम् ॥

(१२) (श्री महादेव गोविन्द रानाडे)

गोविन्द-रानाड-वर[2] सुधीरो
न्याय-प्रियो न्याय-विभूतिरेव।
स न्यायमूर्तिर्निजदेशभक्त
सेवा-नियुक्तोऽपि स्व-देश-रक्त ॥

(१३)

शृङ्ग-प्रभ सौम्य-विशाल-मूर्ति
कीर्त्या श्रिया चैव सदैव जुष्ट ।
दीनोद्धृतौ सततमेव लग्न
समाज-सेवा-व्रतमाचकाक्ष ॥

(१४)

स ह्यर्थशास्त्री इतिहास-विज्ञो
ग्रन्थाननेकान् प्रणिनाय नव्यान्।
समाजसेवा-नव-राष्ट्र-कार्ये
स्मरिष्यते तस्य शुभ तु नाम ॥

(१५) (श्री गोपालकृष्ण गोखले)

गोपालकृष्णो[3] बुध-गोखलेऽसौ
अवाप्य दीने सुकुले स्व-जन्म।
सघपसक्तो निज-धैर्य-बुद्ध्या
शिक्षा विशिष्टामलभिष्ट शीघ्रम् ॥

---

१ नरम-दलम्। २ श्री महादव गाविन्द रानाडे (ज० १८ जन० १८४२, मृ० १६ जन० १९०१ ई०)। ३ श्री गोपालकृष्ण गोखले (ज० ९ मई १८६६, मृ० १९ फर० १९१५ ई०)।

(१६)

देशे त्वपूर्वा जन-जागृतिर्या
व्याप्ता नवोत्थान-परपरा च ।
आश्रित्य ता 'भारत-सेवकानाम्'[१]
अस्थापयत् स समिति प्रपुष्टाम् ॥

(१७)

तथैव 'शिक्षा-समिति'[२] तु दक्षिणे
सस्थाप्य, फर्गूसन-कलिजस्य[५] ।
सर्वां व्यवस्था सुनिरीक्ष्य, चक्रे
'बाल' गुरु त 'तिलक'[४] सुविज्ञम् ॥

(१८)

स मञ्जु-वाक्योऽपि कटु सुतीक्ष्ण
अन्याय-नाशे सतत प्रवृत्त ।
सदैव दीनोद्धरणे नियुक्तो
दीनाऽऽर्ति-नाशाय न्यबोधयन्च ॥

(१९)

महात्म-गाधेर्गुरु-वय-भूत
त्यागस्य दानस्य गुणस्य मूर्ति ।
राष्ट्रेषु स्याद् भारत-गौरवर्द्धि
ऐच्छत् स्वदेशस्य सुखस्य वृद्धिम् ॥

(२०) (श्री बालगगाधर तिलक)

मान्यो ह्यसौ भारत-भूमि-भाले
देदीप्यमानस्तिलक[५] सुरम्य ।
'गगाधरो' भूधर एव मत्य
'बालो' ऽप्यबालस्तरणस्तरस्वी ॥

---

१ भारत-सेवक-समिति । २ डक्न एजुकेशन सोसाइटी इति ।
३ फर्ग्यूसन कालेज, पूना । ४ तिलक स्व-गुरु चक्र । ५ श्री बाल-गगाधर तिलक (जन्म २३ जुलाई १८५६, मृ० १ अगस्त १९२० ई० ।

(२१)

स राष्ट्र वन्धुर्जनताऽन्तरात्मा
न्याय प्रियो नीतिविदा वरिष्ठ ।
नेतोष्ण-वर्गस्य[1] च राष्ट्र-धर्मा[2]
'स्वाधीनता'-मन्त्र-प्रदो[3]ऽभिमानी ॥

(२२)

किरीट हीनोऽपि स भारतेश
शिवाजि-वीर-स्मृति-नायकोऽसौ ।
स्वीयेन लेखेन च भाषणेन
प्रसारयत् क्रान्ति-दवाग्निमेतम् ॥

(२३)

स उग्रनीतिर्वचने क्रियायाम्
आंग्ल तु राज्य तरसा दिधक्षु[4] ।
कांग्रेस-नीतौ परिवर्तनेच्छु
अस्थापयद् उष्णदल[5] स्वदेशे ॥

(२४)

स्वदेश-सेवा-व्रतमास्थितोऽसौ
सुकण्टकाकीर्ण पथ तु वव्रे ।
प्राचालयत् पत्रद्वय[6] 'मराठा'
स 'केसरी' च निज-भाव-व्यक्त्यै ॥

(२५)

शस्त्र च शास्त्र द्वयमेव तन्त्रम्
आदाय हस्ते तु युयुत्सुरेष ।
शास्त्रेण यन्नैव हि शक्यमाप्तु
शास्त्रेण प्राप्य तु स्वराज्यमेतत् ॥

---

१ गरम-दलस्य । २ राष्ट्र धर्मोपासक । ३ 'स्वातन्त्र्यमस्माक जन्म-सिद्धोऽधिकार' इति मन्त्र । ४ दग्धुमिच्छु । ५ गरम-दलम् ।
६ समाचार-पत्र-द्वयम्—मराठा केसरी चेति ।

(२६)

स लेख-भाषैर्भरतावनौ तु
क्रान्ते प्रसार नितरामियेष ।
न भिक्षया प्राप्यमिद स्वराज्य
लोकस्य शक्त्या सुतरा तु लभ्यम् ॥

(२७)

'स्वराज्यमस्मत्सहजाऽधिकारो'
लभ्य सुरक्ष्य निज देश-भक्तै ।
क्रान्त्यैव लभ्य निज-देश-राज्यम्
आग्ल च राज्य तरसा समाप्यम् ॥

(२८)

वन्दीकृतोऽसौ अवदत् सुधीर
अह निरागा[१] नहि वन्धयोग्य ।
अन्यैव शक्तिजगतो नियन्त्री
वन्धो ममास्त्वेष हि देश-मुक्त्यै ॥

(२९)

गाधेर्गुरुर्देश-समाज-मुक्तौ
देशस्य नेतृत्वमधात् सुवीर ।
कारागृहे स व्यलिखत् सुग्रन्थान्
गीता-रहस्य च श्रुतेस्तु धाम[२] ॥

(३०)

स लोक-मान्यो तितग वदान्यो
देशार्पित-श्रीर्जन-नायकोऽसौ ।
प्राप्यापि दु खौघमजस्रमेव
दिव ययौ भारत-वन्धुरेष ॥

१ निरपराध । २ गीतारहस्यम्, Arctic home of the Vedas ।

(३१)

स्वदेश-भक्तस्य त्रिमूर्तिरेषा
वाल च लाल सुनिगृह्य पालम्[१] ।
क्रान्तेस्त्रयी भारत भूमि-भागे
प्रासारयत् क्रान्ति-दवाग्निमेतम् ॥

(३२) (श्री लाला लाजपतराय)

शूराग्रणी'र्लाजपतस्तु रायो'[२]
'लालो' भुवो देश-सुधर्म-निष्ठ ।
यतेर्दयानन्द-वरस्य शिक्षा
सम्प्राप्य देश व्रतमादधार ॥

(३३)

आ-जन्मनो देश समाज-कार्ये
मुदा प्रवृत्तो जन-जीवनोऽसौ ।
सुधार-कार्ये पतितोद्धृतौ च
शिक्षा-प्रसारे रुचिमाबबन्ध ॥

(३४)

अस्थापयद् आर्यसमाजमेष
ग्रामे पुरे पञ्चनद-प्रदेशे ।
अस्पृश्य-दीनोद्धरणे निमग्न
क्रान्ते प्रचारे सतत नियुक्त ॥

(३५)

वक्तृत्व-शक्तौ प्रखर सुवाग्मी
बभ्राम देश च विदेशमेव ।
सिंह् क्रम पञ्चनद-प्रदेशे
आग्लाधिपाना भयमेव तेने ॥

---

१ श्री बालगंगाधर-तिलक, लाला लाजपतराय, विपिनचन्द्रपालश्च ।

२ श्री लाला लाजपतराय (जन्म २८ जन० १८६५, मृ० १७ नव० १९२८ ई०) ।

(३६)

अस्ताश्च रुष्टाश्च हि आग्ल देश्या
निदेश-वास वरमस्य जज्ञु ।
काग्रेस-अध्यक्ष पद[1] प्रशोभ्य ॥
युद्ध-प्रियो युद्ध-रतिर्बभूव ॥

(३७)

सोऽस्थापयद् भारत-सेवकाना
ममाजमेक[2] निज-देश मुक्त्यै ।
आयोग[3]- विद्रोह-निमित्तमेप
वृद्धोऽपि दण्डै प्रहृत समन्तात् ॥

(३८)

सोऽघोपयद् दण्ड-निपात एप
आग्लाधिपाना शव-कीलक स्यात् ।
मुदा प्रवृत्तो निज-देश-भक्तौ
दिव ययौ राष्ट्र-समाज-नेता ॥

(३९) (श्री विपिनचन्द्र पाल)

स पाल-वर्यो विपिनस्तु चन्द्रो
वग-प्रदेशाऽऽप्त-सुकीर्ति-पुष्ट ।
वाग्मित्व-हेतो प्रथित स्वदेशे
लेखैरकयद् युव शक्तिमेताम् ॥

(४०)

वग प्रभङ्गे च स्वदेशि-युद्धे
सोऽनारत[5] युद्ध-तति ततान ।
यातो विदेश च स शिष्ट-वर्गे
ययौ दिव देश-ममाज निष्ठ ।

---

१ कलिकातानगर्यां १९२० ई० काग्रेसाध्यक्ष । २ भारत-सेवक-समाजम् (Servants of India Society) । ३ साइमन आयोगस्य (Simon Commission) विरोधस्वरूपम् । ४ श्री विपिनचन्द्रपाल (ज० १८५८, मृ० १० मई, १९३२ ई०) । ५ निरन्तरम् ।

(४१) (श्री मदनमोहन मालवीय)

श्री मालवीयो मदन-प्रमोहो[1]
धर्मं श्रितो धम परायणोऽसौ ।
कष्टेन वात्ये ममवाप्य शिक्षा
मुदा नियुक्तो निज-देश कार्ये ॥

(४२)

सस्थाप्य काश्या सुचिरूढ-मूल
ज्ञानगृह[2] राष्ट्र-समाज-वृद्ध्यै ।
लेभेऽक्षया कीर्तिमसौ विपश्चिद्
महामना मानव-सौख्य-दायी ॥

(४३)

स निधनाना हित-साधनार्थं
प्रादात् सुवृत्तीर्गुण-ज्ञान वृद्ध्यै ।
वक्तृत्व-शक्त्याऽऽहृत-लोक-प्रीति
स राजनीतौ गरिमाणमाप ॥

(४४)

काग्रेस-अध्यक्ष पद द्विवार[3]
सशोभ्य कारा स ययौ सुभक्त ।
हिन्दुत्व भक्तो निज-देश-रक्तो
हिन्दी-सुभक्तश्च परार्थ-युक्त ॥

(४५) (श्री मोतीलाल नेहरु)

स मातिलालो[4] गरिमाऽनवद्यो
मुक्तामयो लाल-मयो गुणैश्च ।
सशोभ्य वश निज-नेहरूक
स्वातन्त्र्य-युद्धे रुचिमादधार ॥

---

१ श्री महामना मदनमोहन मालवीय (जन्म २५ दिस० १८६१, मृ० १२ नव० १९४६ ई०)। २ काश्यां हिन्दू विश्वविद्यालय । ३ सन् १९०९ ई० लाहौरे, १९१८ ई० दिल्ल्याम । ४ श्री मोतीलाल नेहरु (जन्म ६ मई १८६१ मृ० ६ फर० १९३१ ई०)।

(४६)

सम्प्राप्य गाधेस्तु निदेशमेष
विहाय सर्वां निज-वैभवाऽऽभाम् ।
देशानुरागेण सुखानुराग
जिगाय त्यागेन धनानुरागम् ॥

(४७)

स प्राड्विवाको विधिशास्त्र-वेत्ता
प्रयाग-भूर्तिर्विभवस्य कोष ।
सम्प्राप्य गाधेर्गुणिनस्तु सग
स्वदेश-सेवा-व्रतमाश्रयत् स ॥

(४८)

निर्भीक-योध कुशल सुवाग्मी
दृढ-प्रतिज्ञ स्थिरधीर्विपत्तौ ।
देशोद्धृतौ दत्त-समस्त वित्त
आनन्द गेहस्य[1] च गेह-लक्ष्मी ॥

(४९)

सशोभ्य वारद्वयमेष विज्ञ
काग्रेस-अध्यक्ष-पद प्रवीण ।
संसह्य कारा-गृह-वास-दु ख
स्वातन्त्र्य-यज्ञाऽऽहुतिमाश्रयत् स ॥

(५०) (श्री चितरजनदास)

दास स शूर चितरजनाख्य[2]
कीर्त्या श्रिया साधुगुणस्य मूर्ति ।
स्वातन्त्र्य-भावाऽऽहृत-धीर-बुद्धि
आग्लालये[3]ऽप्यात्त-निजाभिमान ॥

---

१ आनन्दभवन-नामकगृहस्य । २. श्री दशबन्धु चितरजनदास (ज० ५ नव० १८७०, मृ० १६ जून १९२५ ई०) । ३ इगलैंड-देशे ।

(५१)

स प्राड्विवाकस्य विहाय वृत्ति
गाधेर्निदेशाद् निज-देश-रक्त ।
क्रियात्मक भागमधत्त नित्य
स्वातन्त्र्य-युद्धे समराग्रणी स ॥

(५२)

त्यागेन शौर्येण च देशबन्धु
स्वराज्य-पार्टी-प्रथनाऽनुरक्त ।
शवाऽनुयातैस्त्रय-लक्ष-लोके [1]
चिता श्रितो वीर-गति प्रपेदे ॥

(५३) (श्री महात्मा गाधि)

स्वातन्त्र्य-हेतु सुख शान्ति-सेतु
सत्यस्य केतु रिपु धूमकेतुम् ।
देशोन्नतौ त्यक्त-समस्त-वित्त
नमामि गाधि गुण-गौरवाब्धिम् ॥

(५४)

महात्म-गाधि[2] र्जन-प्राण-रूप
सत्याग्रहे दत्तरुचिर्वदान्य ।
प्राप्याऽफ्रिका[3] भारत-भूमिजाना
सहृत्य क्षोभ निज-देशमायात् ॥

(५५)

सत्याग्रहान्दोलनमेप वीर
सचार्य देशस्य स्वतन्त्रतायै ।
आग्लाधिराज्य विनिनीपुरेप [4]
देशे विदेशे भ्रमण चकार ॥

---

१ लक्ष-त्रय-लोक । २ राष्ट्रपिता श्री मोहनदास करमचद गाधी (ज० २ अक्टू० १८६९ ई०, मृ० ३० जन० १९४८ ई०) । ३ दक्षिण-अफ्रीका-देशम् । ४ विनाशयितुकाम ।

(६६)

अनेकवार समुपास्य कारा
स आग्ल-निष्कासन-तत्परोऽभूत् ।
'त्यजन्तु आग्ला भरतस्य भूमिं'
मोऽघोपयद् गाधिवरेण साधम् ।

(६७)

स्वातन्त्र्य-युद्धे विजय प्रलभ्य
प्रधान-मन्त्रित्वमशोभयत् स ।
आजीवन मन्त्रिपदे नियुक्त
स्वदेश-सेवा-व्रतमाचकाक्ष ॥

(६८)

स भारतेऽस्थापयदात्मतन्त्र
स पञ्चशील च समाजवादम् ।
धर्मैक्यमाचार-विचार शुद्धि
विश्वस्य वन्धुत्व-समत्व शान्तिम् ॥

(६९) (श्री सरदार-पटेल[1])

'पटेल'-वर्यो 'गुण-गौरव-श्री
स 'वल्लभो' भारत-मातुरेव ।
शौर्येण धृत्या 'सरदार' एप
'भाई' स दीनाऽऽर्त-हितैपणाच्च ॥

(७०)

सिंहाकृति सिंह-पराक्रम स
'लौहो नर[2]' ख्यातिमुपागतश्च ।
व्रती तरम्वी दृढ-निश्चयोऽसौ
स्वराष्ट्र निर्माण-कृतौ नियुक्त ॥

---

१ श्री सरदार वल्लभ भाई पटेल (जन्म ३१ अक्टू० १८७५, मृ० १६ जन० १९५१ ई०) । २ लौह-पुरुष इति ।

(७१)

न जात्वशक्यमिति वक्तुकाम
साध्य सम[1] घोर-परिश्रमेण ।
अनेकवार समुपास्य काराम्
आग्लाधिपाना भयमेव तेने ॥

(७२)

स्वराष्ट्र-मन्त्रित्व-पद सुशोभ्य
अमेलयद् देशज-राज्य-वर्गम् ।
स्व-धर्म शिक्षा-गुण सस्कृतीना
सरक्षक शत्रु-निबर्हणश्च[2] ॥

(७३)

देशैक्य-कृत्ये जनता-समृद्धौ
स्वातन्त्र्य-सिद्धौ धन-धान्य-वृद्धौ ।
सस्थाप्य नामाक्षरमेव लोके
दिव ययौ भारत-भू-सुपुत्र ॥

(७४) (श्री डॉ० राजेन्द्रप्रसाद)

राजेन्द्र वर्यो[3] विदुषा वरिष्ठो
'विहार-गाधि' प्रथित स्वदेशे ।
मेधावि-छात्रेषु धुरीण एष
लोकोद्धृतौ दत्तमना बभूव ॥

(७५)

गाधे सुशिष्यत्वमवाप्य सोऽय
विहाय वाक्कील-सृति सुधीर ।
चम्पारने[4] ख्यातिमवाप्य युद्धे
स गाधि-वाद-व्रतमाश्रयच्च ॥

---

१ सवम । २ शत्रु-नाशक । ३ श्री डा० राजेन्द्र प्रसाद (ज० ३ दिसम्बर १८८४, मृ० २८ फर० १९६३ ई०) । ४ चम्पारन (विहार)-सत्याग्रहे ।

(७६)

सारल्य-मूर्तिर्वचने क्रियाया
सत्यप्रिय सत्यव्रती व्रती स ।
स्वदेश-भाषा-निज-संस्कृतौ च
नित्याऽनुरक्तो जनताऽनुरक्त ॥

(७७)

सशोभ्य राष्ट्राधिपते[1] पद स
कीर्त्या श्रिया गौरव-गीतिमाप्त ।
'राजेन्द्र बाबू' इति प्रेमपात्र
दिव श्रितो देश-समाज निष्ठ ॥

(७८) (श्री मौलाना आजाद)

आजाद-वर्यो[2] निज-देश-भक्तो
मक्का-स्थले जन्म-ग्रहचकार ।
स भारत प्राप्य गृहे स्वकीये
शिक्षा च दीक्षा विधिवत् प्रपेदे ॥

(७९)

अनेक-भाषा-प्रवण सहिष्णु
स भारतीयो यवनोऽपि जात्या ।
देश-प्रियो देश-हिते निमग्नो
धर्मान्ध-धीना प्रबलो विरोद्धा ॥

(८०)

हिन्दुर्भवेद् वा यवनोऽपि वा स्यात्
सर्वेऽपि देशस्य हिताय जाता ।
स्व राष्ट्र-रक्षा व्रत-पालनेन
देशोन्नति सभवतीह नियम् ॥

---

१ राष्ट्रपति-पदम् । २ श्री मौलाना अबुल कलाम आजाद (ज० दिसं० १८८८ ई०, मृ० २२ फर० १९५८ ई०) ।

(८१)

बन्धुत्व-शिक्षा प्रतिपाद्य सर्वान्
देशोन्नती आह् वयदेप देश्यान् ।
समाधिकारोऽस्ति स्वदेश-भूमौ
सम च कर्तव्यमतो नियुक्तम् ॥

(८२)

न धमभेदेन हि प्रेम-भेद
स्वदेश-धर्मं परमो हि धम ।
तदथमास्थाय व्रत समेऽपि
स्वदेश-रक्षा-व्रतमाश्रयध्वम् ॥

(८३)

धर्माश्रिया या सकलाऽपि भेद-
नीति श्रिताऽऽङ्ग्लै परिशोपणाय ।
सा शोपणार्था भय-दु ख-दात्री
हेया विनाश्या निज-देश-हेतो ॥

(८४)

इत्थ व्रत देश-हिताय रक्षन्
ग्रन्थाननेकान् व्यलिखत् सुविज्ञ ।
धीर सुवीर कृतधीर्नयज्ञो
दिव श्रितो देश-समाज-भक्त ॥

(८५) (श्री गोविन्दवल्लभ पन्त)

श्री पन्त-वर्यो[1] विधिशास्त्र-विज्ञो
'गोविन्द'-नामा जन-'वल्लभो' ऽसौ ।
कूर्माचल[2] जन्म-सुकार्यजाते
अशोभयत् पवत्त-राजि-राजम् ॥

---

१ श्री गोविन्द वल्लभ पन्त (ज० १० सित० १८८७, मृ० ७ माच १९६१ ई०) । २ कुमायू-क्षेत्रम् ।

(८६)

कांग्रेस-संस्था समुपास्य नित्यं
तदर्थमास्थाय च कार्य-जातम् ।
प्रान्तोत्तरे[1] मन्त्रिपदे नियुक्त
स्वदेश-सेवा व्रतमादधार ॥

(८७)

गान्धेर्गुरोश्चायमवाप्य दीक्षां
जनोद्धृतौ देश-हिते प्रसक्तः ।
धराऽऽधिपत्य[2] महसा समाप्य
स चाऽऽर्यभाषोद्धरणं व्यधत्त ॥

(८८)

स्वराष्ट्र-मन्त्रित्वमवाप्य केन्द्रे
स्वभाषणे पुष्ट क्रिया-कलापे ।
सम्प्राप्य कीर्ति विपुलां विधिज्ञ
स्वदेश-हेतोर्दिवमाश्रयन् स ॥

(८९) (श्री पुरुषोत्तमदास टंडन)

श्री टण्डनो[3] भारत-भूमि-भूति
स्व-ज्ञान-लक्ष्म्या 'पुरुषोत्तमो'ऽसौ ।
स ईश-'दासो' जन-मानसेश
प्रयागराजं जनुषाऽन्वभूषत्[4] ॥

(९०)

स हिन्दि-भाषा प्रयतानुरक्त
सम्मेलन[5]-स्थापनमेष चक्रे ।
प्रयाग एवैष विधान-विज्ञ
समाज-कार्यं प्रमुदा व्यधत्त ॥

---

१ उत्तरप्रदेशे । २ जमींदारी प्रथोन्मूलनम् । ३ श्री पुरुषोत्तमदास टंडन (ज० ११ अगस्त १८८२, मृ० १ जुलाई १९६२ ई०) । ४ जन्मना अभूषयत । ५ प्रयागस्थ हिन्दी-साहित्य-सम्मेलनम् ।

(९१)

श्री मालवीयस्य[१] सुशिष्य-भूत
तपस्विरूपो विपदा सहिष्णु ।
विहाय सर्वं सुख-साधन स
यतिव्रतो देश-हिते नियुक्त ॥

(९२)

समाज-सेवा-व्रतमास्थितोऽय
कारागृहे च न्यवसत् सुधीर ।
सशोभ्य चाऽध्यक्षपद विधान-
सभा-गृहे प्राप सुकीर्तिमिष्टाम् ॥

(९३)

सिद्धान्तवादी शुचिताऽनुरागी
हिन्दी-प्रियो हिन्दि-प्रसार-रक्त ।
सस्थाप्य हिन्दी स हि राष्ट्रभाषा-
पदे ददौ राष्ट्रहिताय देहम् ॥

(९४) (आचार्य नरेन्द्रदेव)

नरेन्द्रदेवो[२] विदुषा वरिष्ठ
स्वदेशभक्त स्वगुणै प्रसिद्ध ।
शिक्षा-जगत्या समवाप्य कीर्तिम्
आचार्यभार स उवाह काश्याम्[३] ॥

(९५)

समाजवाद-प्रथनाऽनुरक्तो
विवेचको वाग्मिवरो वदान्य ।
शिक्षा-विशेषज्ञ-वरो विपश्चित्
सुलेखको दर्शन-शास्त्र-दक्ष ॥

---

१ श्री मदनमोहन मालवीयस्य । २ आचार्य नरेन्द्रदेव (जन्म ३१ अक्टू १८८९ ई०) । ३ काशी विद्यापीठे ।

(९६)

वैदुष्य-वाग्मित्व गुणैरजस्र
समाजवादोद्धरणेन देशे ।
राष्ट्रीय-कार्योद्धरणेन नित्य
लोकार्चन प्राप्य दिव ययौ स ॥

(९७) (श्री लालबहादुर शास्त्री)

गुणाकरो लाल-बहादुरोऽसौ[1]
शास्त्रीति ख्यातो वर-वीर-योध ।
त्यागी तपस्वी शुचिताऽनुरागी
जयत्यसौ भारत-भूमि-लाल ॥

(९८)

दीने कुले प्राप्य जनि सुवीर
स्वपौरुषेणाऽऽप्त गुणोच्चय-श्री ।
स्वालम्बन चात्मबल निगृह्य
स्वदेश-मूर्धाऽऽभरण बभूव ॥

(९९)

त्यागे रति चाऽऽत्मबलेऽनुरक्ति
देशेऽनुरक्ति जनताऽनुरक्तिम् ।
कार्यानुरक्ति शुचिताऽनुरक्ति
समाश्रितो लोकप्रियो बभूव ॥

(१००)

प्रधानमन्त्रित्व-पद श्रितोऽसौ -
युद्धे खरे पाकचमू दधर्ष ।
पाकैर्विपाको विनिपात-रूपो
लेभे स्व शस्त्रास्त्र विनाश-रूप ॥

---

१ श्री लालबहादुर शास्त्री (ज० २ अक्टू० १९०४, मृ० ११ जन० १९६६ ई०)।

(१०१)

योधो जयत्वेष कृषीवलश्च[1]
उद्‌घोष-मन्त्रस्य स जन्मदाता ।
शस्त्रास्त्र-वृद्धौ धन धान्य वृद्धौ
लेभे यशश्चैष स्व देश-भक्त ॥

(१०२)

कारामुपास्यैव मुदाऽष्टवार
क्लेशानशेषानसहिष्ट धीर ।
काश्या यशो भारत-भूमि-भागेऽ-
वर्धिष्ट वीरो निज-वीर-कृत्यै ॥

(१०३)

मृदु प्रकृत्या युधि धीरमूर्ति
वीराग्रणी सार्थक-नामधारी ॥
देशोन्नतौ मन्ततमेव लग्नो
रूस-प्रदेशे दिवमाश्रयत् स ॥

(१०४)

अन्येऽपि केचित् प्रथिता सुवीरा
स्वदेशभक्ता निज-देश-भक्त्या ।
तेषा यशोऽप्यक्षरमत्र पूत
सनामग्राह कवि-वर्णनार्हम् ॥

(१०५) (श्री बंकिमचन्द्र चटर्जी)

कविर्वरो बकिमचन्द्र-वर्य
प्रणीय प्रेष्ठ निज-राष्ट्रगानम् ॥
विरच्य चाऽऽनन्दमठ गरिष्ठ
लेभे यश स्थास्नु स्वदेशभक्त्या ॥

---

१ 'जय जवान' 'जय किसान' इति उद्‌घोष ।

(१०६) (श्री स्वामी श्रद्धानन्द)

स स्वामि-'श्रद्धा'दिक-'नन्द'-वर्यो[१]
यतेर्दयानन्द-वरस्य शिष्य ।
सस्थाप्य शिक्षा तु गुरो कुलस्य
स 'कागडी'-[२]जन्म-प्रदो जिगाय ॥

(१०७)

स्वातन्त्र्य-युद्धे सतत प्रवृत्तो
गाधेर्गुरोर्नीति-प्रचारकश्च ।
समर्प्य देशाय स्वकीय-लक्ष्मी ।
यशोऽक्षर प्राप स्वदेश-भक्त ॥

(१०८) (श्री भाई परमानन्द)

स भ्रातृ-वर्य परमाऽऽख्य-वीर [३]
सधुक्ष्य क्रान्तेर्दहन समन्तात् ।
सोढ्वाऽण्डमाने विषमा विपत्ती
देशोद्धृतौ सन्ततमेव लीन ॥

(१०९)

आर्य-ध्वनि क्रान्ति-ध्वनि विदेशे
प्रसार्य दीनाऽऽर्त्त-हिते नियुक्त ।
आर्यत्व-भावे परिपुष्ट-कीर्ति
देशव्रत सोऽक्षयकीर्तिमाप ॥

(११०) (श्री अली-बान्धवौ)

स्वातन्त्र्य-युद्धे यवनान् प्रबोद्धुम्
अली-द्वयस्याऽऽस्ति[४] महान् सुयोग ।
वक्तृत्व-शक्त्या निज-देश-भक्त्या
• काग्रेस-नेतृत्वमिमौ व्यधाताम् ॥

---

१ श्री स्वामी श्रद्धानन्द (महात्मा मुशीराम) (जन्म १८५६ ई०, मृ० २३ दिस० १९२६ ई०)। २ गुरुकुल कागडी विश्वविद्यालयस्य जन्मदाता। ३ श्री भाई परमानन्द (जन्म १८७६, मृ० १८ दिस० १९४७ ई०)। ४ मौलाना मुहम्मद अली, मौलाना शौकत अली च ।

(१११)

श्री शौकतोऽली च मुहम्मदोऽमौ
स्वदेश-भक्त्याऽऽहृत-मानमौ तौ ।
विरोध-आन्दोलन[1]-प्राप्त-कीर्ती
तौ सन्यधाता यवनाऽऽर्य-प्रीतिम् ॥

(११२) (श्रीमती एनी बेसेंट)

एनी वसन्तेयमुदारभावा[2]
समाज-सेवा-व्रतमादिधित्सु[3] ।
अध्यात्म-शिक्षा-समिते[4] प्रधाना
लोकोद्धृतौ स्व समय निनाय ॥

(११३)

वैदेशिको चापि स्वतन्त्रतायै
साऽयुद्ध योधेव ममाज-निष्ठा ।
स्वायत्तता स्वीय-प्रशासन च
साऽघोपयद् देशहिताय मुक्त्यै ॥

(११४) (श्री रवीन्द्रनाथ ठाकुर)

रवीन्द्र-वर्यो[5] गरिमाऽनवद्यो
गीताञ्जलेर्गीत-सुगीत-कीर्ति ।
देशोद्धृतौ काव्य-समुच्चये च
यश स लेभे निज-गीति-पद्यै ॥

(११५) (श्रीमती सरोजिनी नायडू)

सरोजिनी[6] भारत-कोकिलेति
ख्याता गुणैर्देश-विदेश-मध्ये ।
समाज-दीनोद्धरणे निमग्ना
स्वजीवन देश हिताय प्रादात् ॥

---

१ खिलाफत आन्दोलनम् । २ श्रीमती एनी बेसेन्ट (१८४८–१९३३ ई०) । ३ चरितुम् इच्छुका । ४ थियोसोफिकल सोसाइटी इत्येतस्या । ५ श्री रवीन्द्रनाथ टैगोर (१८६१–१९४१ ई०) । ६ श्रीमती सरोजिनी नायडू (१८७९–१९४९ ई०) ।

(११६) (श्री राजगोपालाचार्य)

विज्ञान वारानिधिरेव राजो
गोपाल-वर्यो[1] निज-देश-भक्त ।
स्वातन्त्र्य-सेनापति-कार्य-निष्ठ
सोऽशोभयद् राष्ट्रपते पदं च ॥

(११७) (श्री भीमराव अम्बेडकर)

श्री भीमरावो[2] विधि शास्त्र-विज्ञो
दीनोद्धृतौ न्यस्त-समस्त शक्ति ।
स संविधानं निज-भारतीयं
निर्माय लोकेऽक्षर-कीर्तिमाप ॥

(११८) (खां अब्दुल गफ्फार खां)

खां अब्दुलोऽसौ[3] कृतिनां वरिष्ठो
देशार्पित-श्रीर्निज-देश-भक्त ।
गाधेव्रतं बोधयितुं समन्तात्
सीमान्त-क्षेत्रे श्रमभाग् बभूव ॥

(११९)

सीमान्त-गाधीति प्रसिद्धिमाप्तो
रक्ताशुके[4] क्रान्ति-निबोधकोऽभूत् ।
सीमान्त-क्षेत्रे यवन-प्रदेशे
स्वातन्त्र्य-युद्धं सफलीचकार ॥

(१२०) (श्री गणेशशंकर विद्यार्थी)

विद्यार्थिवर्यो निजदेशभक्तः
प्रान्तोत्तरे क्रान्तिधुरं बभार ।
सुलेखकोऽसौ यवनार्य-मैत्रीम्
इच्छन् हतः कीर्तिमवाप शश्वत् ॥

---

१ श्री चक्रवर्ती राजगोपालाचार्य (१८७९-१९७६ ई०)। २ श्री भीमराव अम्बेडकर (१८९३-१९५६ ई०)। ३ श्री खान अब्दुल गफ्फार खां। ४ लाल-कुर्ती-सेना।

(१२१) (श्री रफी अहमद किदवई)

स किद्वई[1] नाम-गुणैरुदारै
ख्यातिं गतो देश-हितार्थ-जीवी ।
निरीक्ष्य हिन्दून् यवनान् सम स
वन्धुत्व-भावोद्भवमेव चक्रे ॥

(१२२) (श्री आचार्य जे० वी० कृपलानी)

आचार्यवर्यं कृपलानि-जे० वी०[2]
शिक्षा-विधि-ज्ञो निज-देश-भक्त ।
कांग्रेस-अध्यक्ष-पद सुशोभ्य
कीर्त्या युतो गांधि-सृतिं श्रितोऽसौ ॥

(१२३) (श्री आचाय विनोवा भावे)

आचायवर्यस्तु विनोव-भावे[3]
महात्मगाधे प्रबलस्तु शिष्य ।
देशाय दत्त्वा निज-जीवन स
सर्वोदये स्वीयमतिं ववन्ध ॥

(१२४)

भूमे प्रदान च श्रमस्य दान
रक्तस्य दान समयस्य दानम् ।
सोऽघोपयद् देश-समृद्धि-हेतो
सर्वस्य-दान परम हि दानम् ॥

(१२५) (श्री जयप्रकाश-नारायण)

'जयप्रकाशो' विजय-प्रकाशो
'नारायणो' धीरवर सुधीर ।
'जे० पी०'-ति ख्यातो नय-वर्त्म-विज्ञ
समाजवादे सुरुचि सहिष्णु ॥

---

१ श्री रफी अहमद किदवई (१८९४-१९५४)। २ आचाय जे० वी० कृपलानी (ज० १८८८ ई०)। ३ आचार्य विनोवा भावे। ४ श्री जयप्रकाश नारायण (ज० १९०१ ई०)।

(१२६)

क्लेशानशेपानसहिष्ट सोऽयम्
आपातकाले नियम चरिष्णु ।
आपातकाल-क्षयमेप दृष्ट्वा
अस्थापयद् लोक-समाज-तन्त्रम् ॥

(१२७)

क्रान्तेर्धुर वोढुमसौ समर्थं
समग्र-क्रान्ति सतत तनोति ।
सर्वोदया नीतिमुपास्य चाय
दरिद्र-दीनोद्धरणे समर्थं ॥

(१२८)

आचार-दीक्षा-व्रत-पालनेन
लोकप्रियो लोक-सुनायकोऽसौ ।[1]
निरव्य लोके त्वधिनायकत्वं
जयत्यसौ दीन-समाज-बन्धु ॥

(१२९)

स्वातन्त्र्य युद्ध यदिद् प्रवृत्त
क्रान्त्यात्मक शान्ति-समन्वित च ।
महातम-गाधेस्तु सुनायकत्वे
स्वातन्त्र्यमाप्त सुखद वरेण्यम् ॥

(१३०)

स्वातन्त्र्य-रक्षा जनता-समृद्धि
दरिद्र-दीनाऽन्त्यज-रक्षणं च ।
बन्धुत्व-भावोदय-देशभक्ति
व्याप्नोतु देशे जन-मङ्गलाय ॥

●

१ 'लोकनायक' इति ख्यात ।

१ शान्ति-स्तोत्रम्

(वसन्ततिलका वृत्तम्)

(दिवगताया श्रीमत्या ओम्शान्तिद्विवेदिन्या स्मृतौ विरचितम्)

(१)

प्रातर्भजे भुवनभास्वरि ! भास्वराङ्गा
चिन्तासमाकुलमति करुणावनम्र ।
दीनो विनीतहृदयो हृदयावतप्त
त्वा देवि ! दिव्यसुमते ! शरण प्रपद्ये ॥

(२)

त्व ब्रह्ममूर्तिरपरा किमु शक्तिरन्या
किं वा जगद्धितकरी करुणा विशिष्टा ।
किं चित्तवृत्तिरथवा जगतो हिताय
त्वा देवि ! दिव्यसुमते ! शरण प्रपद्ये ॥

(३)

त्व जीवन त्वमसि मे मतिरेव शान्ता
त्व प्राणरूपिणि ! सदा गतिरेव हृद्या ।
ज्योत्स्ना हृदो मम मते सुखदा सुधैव
त्वा देवि ! दिव्यसुमते ! शरण प्रपद्ये ॥

(४)

हे धर्मचारिणि ! सदा सुकृतानुबन्धे !
हे सत्यनिष्ठनिजवृत्ति-कृतात्ममोक्षे !
हे साध्वि ! सत्त्वपरमे ! सुकृतानुयाते !
त्वा देवि ! दिव्यसुमते ! शरण प्रपद्ये ॥

(५)

हे मानसैकललिते ! दयिते ! दयार्द्रे !
हे ज्ञानभक्ति-करुणा सुखशान्तिरूपे !
हे स्नेहसौख्य-सुषमा गुरुतानिधाने !
त्वा देवि ! दिव्यसुमते ! शरण प्रपद्ये ॥

(६)

ज्ञान त्वमेव मम देवि ! त्वमेव विद्या
त्व सौख्यराशिरसि देवि ! त्वमेव कान्ता ।
ज्योतिस्त्वमेव मम लोचनयो सुधेव
त्वा देवि ! दिव्यसुमते ! शरण प्रपद्ये ॥

(७)

त्व मे मतिर्मम गतिर्मम शक्तिरूपा
त्व मे सुधा मम सदा वसुधा सुधार्द्रा ।
त्व कान्तिराशिरसि मे मम शान्तिरूपा ।
त्वा देवि ! दिव्यसुमते ! शरण प्रपद्ये ॥

(८)

त्व मोह-शोक-दुरितार्ति-विदारणासि
त्व दु ख-कष्ट भय-ताप निवारणासि ।
त्वं शान्ति-सौख्य-करुणा-वरुणालयासि
त्वा देवि ! दिव्यसुमते ! शरण प्रपद्ये ॥

(९)

त्वं चेतसश्चितिरहो भुवनस्य भर्त्री
शक्ति शिवस्य सुमति सुमते सुखार्द्रा ।
ज्योति रव सुखकरी सुषमा सुधाशो
त्वा देवि ! दिव्यसुमते ! शरणं प्रपद्ये ॥

(१०)

अर्थोऽसि शब्दनिवहस्य भवस्य भूति
चैतन्यशक्तिरपरा जगतो विधातु ।
त्वं भूति भक्ति-मति-शक्ति-विरक्तिरूपा
त्वा देवि ! दिव्यसुमते ! शरण प्रपद्ये ॥

२ भारत-वन्दना

(१)

ज्ञान विज्ञान-सन्दोहा, क्रान्ति-शान्ति-स्वरूपिणीम् ।
अमरा भारती देवी, वन्दे मातरमन्वहम् ।।

(२)

षष्टि-कोटि-नरैर्युक्ता, द्विषष्टि कोटि-हस्तकाम् ।
गुणिभि र्धर्मिभिर्जुष्टा, वन्दे मातरमन्वहम् ।।

(३)

बङ्ग-पञ्चनदैर्हृद्याम्, असमोत्कल-शोभिनीम् ।
कश्मीर-राजस्थानाढ्या, वन्दे मातरमन्वहम् ।।

(४)

मध्योत्तर-प्रदेशाभ्या, विहारेण च भास्वतीम् ।
गुजरैस्तमिलै कान्ता, वन्दे मातरमन्वहम् ।।

(५)

केरलेनान्ध्रकेणेष्टा, हिमाचल-मनोरमाम् ।
महाराष्ट्रेण सदीप्ता, वन्दे मातरमन्वहम् ।।

(६)

कर्णाटगीत-सगीता, हरियाणा-विभास्वराम् ।
मेघालयेन सहृष्टा, वन्दे मातरमन्वहम् ।।

(७)

त्रिपुरा-मणिपूर्भ्या च, सिक्खिमेन मनोहराम् ।
नागालैंड गुर्णैरम्या, वन्दे मातरमन्वहम् ।।

(८)

स्वच्छ-कीर्ति-सुधा-सिक्ता, विद्वन्मौक्तिक-मालिनीम् ।
वीरागना-यश -शुभ्रा, वन्दे मातरमन्वहम् ।।

(९)

ज्ञान-विज्ञान-सपुष्टै, राष्ट्रोत्थान-परायणै ।
क्रान्ति-दूतै स्तुता हृद्या, वन्दे मातरमन्वहम् ।।

(१०)

रोग-शोक-भय क्रोध-दु ख-दारिद्रय-नाशिनीम् ।
सर्वज्ञा देवजुष्टा ता, वन्दे मातरमन्वहम् ।।

ग्रन्थकृतो वंश-परिचय*

चकास्त्युत्तर-प्रदेशस्य, पूर्वस्या दिशि विश्रुतम् ।
गाजीपुर[१] जनपद, जाह्नवी-तोय-पावितम् ॥ १ ॥
गृहमरो[२] ग्रामवर, तत्राऽऽस्ते प्राज्ञ-सेवित ।
धीरैर्वीरै समायुक्त, प्रथित क्षत्रकर्मणि ॥ २ ॥
'छेदीलाल' साधुवर[३], तत्राऽऽसीन्महित सताम् ।
दानवीरो गुणै श्रेष्ठो, वैश्य-वंश-विभाकर ॥ ३ ॥
तस्य सूनु मता मान्यो, 'बलराम'[४]-महोदय ।
जन्मना पावयन्नासीत्, सत्कुल साधु-सेवितम् ॥ ४ ॥
त्यागी तपस्वी धर्मार्थी, देशार्थं त्यक्त-जीवन ।
देश-जात्युन्नती लग्न, सदा निष्काम-कर्मकृत् ॥ ५ ॥
अष्टादशाधिके वर्षे, ऊनविंश-शतोत्तरे ।
दिसम्बरस्य मासस्य, षष्ठे[५] शुभदिने तदा ॥ ६ ॥
'वसुमत्या'[६] सुतो जात, तस्य 'कपिल'-नामक[७] ।
ज्वालापुर गुरुकुल[८], योऽगाद् ज्ञानोपलब्धये ॥ ७ ॥
लब्ध्वोपाधि कुलात्तस्माद्, 'विद्याभास्कर'-सज्ञिताम् ।
प्राच्य प्रतीच्य-विद्या यो, विविधा ह्यात्ममाद् व्यधात् ॥ ८ ॥
यजुर्वेद सामवेद, योऽकरोत् कण्ठहारताम् ।
'द्विवेदि'-नाम्ना विख्यातो, ग्रन्थ त्रिशत-लेखक ॥ ९ ॥
सस्कृतोद्धार-सलग्नो, वेद-विद्या-विशारद ।
भाषाशास्त्र-रुचि-'र्देवो', दश-भाषा विचक्षण ॥ १० ॥
'ओम् शान्ति'[९]-मुपायस्त, साध्वी शीलवती प्रियाम् ।
सप्त-सतति-सयुक्तो, 'भारती'-भाव-पेशल ॥ ११ ॥
'भारतेन्दु'श्च 'धर्मेन्दु', 'ज्ञानेन्दु' 'प्रतिभा'-भिधा ।
'विश्वेन्दु'श्च गुणै श्रेष्ठ, 'आर्येन्दु' लभता शिवम् ॥ १२ ॥

●

---

१ गाजीपुर-मण्डलम् । २ गहमर-ग्राम । ३ पितामह काश्यपगोत्रात्मज श्री छेदीलाल साहु । ४ पितृवर्य श्री बलरामदास साहु । ५ जन्म-तिथि—६ दिसम्बर १९१८ ई० (हाईस्कूल-प्रमाणपत्रानुसारम् १६ दिस० १९१९ ई०) । ६ माता—श्रीमती वसुमतीदेवी । ७ कपिलदेव । ८ ज्वालापुरीय गुरुकुल महाविद्यालयम् । ९ भार्या—श्रीमती ओमृशान्ति द्विवेदी ।